
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

(=स्वव्यतिरूपाभावसमानाधिकरणनिरूप्यतावच्छेदकत्वमेवच्छेदकावच्छेदेन स्मारकसंबंधः =) ५ पेज्ञानर्कसंबंधेर (=एतस्य सद्धेतुसाधारण्येपि स्मारकसंबंधातिप्रसंगदोषापत्तिभावः =) २

॥श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ तत्वनिर्णयविजयप्रयोजकत्वादिति मूले पंचम्यर्थस्य तु ज्ञानजन्यजिज्ञासाधीनतस्य निरूपणे ऽन्यथा दैवसंगतिप्रदर्शन
सिद्धौ तस्य संगत्यादितिपूरणमनुचितमिति साकांक्षापरिहरन्निहेत्वाभासेति। प्रसंगस्यापीति। स्मृतत्वे सत्युपेक्षानर्हत्वादिपंचकमित्यस्य हेत्वाभासतस्यापीत्यर्थः विरोधीति
तत्र प्रतिबंधकग्रहविषयेत्यर्थः वस्तुतस्तु तदसमानाधिकरणेत्यर्थः तद्भिन्न इति एतावता स्वव्यतिरूपाभाववत्वं स्मारकसंबंधत्वमः दीधितावपि सपरिकरमिति तदानी
सेत्यर्थात्तस्यैव लक्षणत्वेनात। व्याप्तिपक्षधर्मतेत्यादि। यद्यप्येते सस्वसंकीर्णबोधितादेः कथं स्मृतित्वं तथापि विनिरूप्यतावच्छेदकसामानाधिकरण्येन स्मारकसंबंध
स्य तदवच्छेदेन निरूपणोपयिकत्वेनैव संगतिः अत एव तद्विरहवतो दुष्टहेतोः स्मरणादिति भट्टाचार्येणापि पुनर्दुष्टपदं लिखितं। यद्यपक्षः साध्यविशिष्टत्वेन विशेष्यः
तेनाबोधितत्वानुपाधानेप्यसंकीर्णबोधितस्य दुष्टत्वेन निरूप्यत्वं न त्वाभासे तत्र तत्सद्धेतुपरामर्शत्वं प्रसंगः। यदुभयरूपवतः संबंधो गृहीतः तद्रूपाव
च्छिन्नैकज्ञानात्तद्रूपावच्छिन्नापरस्मरणं अत्र चैत्रत्वेन हस्तिपकेभद्रत्वेन हस्तिनः संबंधग्रहे मनुष्यत्वेन ततज्ञानात् गजत्वेन हस्तिस्मरणवारणाय संबंधि
तावच्छेदकरूपयोर्निवेशः एवं च सद्धेतुदुष्टसंबंधीति ज्ञानादेव दुष्टत्वेन स्मृतिसंभवात्तस्यनिरूप्यतावच्छेदकत्वमक्षुण्णं। ननु सपरिकरहेतुप्रसंगादित्येवास्तु
किं निरूप्येसंतेनेत्यत आह निरूप्येति। पूर्वकालीनत्वं ... तथा च व्याप्त्यादिविशिष्टहेतुनिरूपणोत्तरम्प्यहेतुनिरूपणकाले ... सप्रतियोगितलाभेन संबं
धिज्ञानादिरूपसामग्रीलाभादिति भावः उक्तक्रमेणेति सद्धेतुनिरूपणानंतरं विशिष्यार्थानि ... व्याप्तिपक्षधर्मताविरोधितद्विरहवतो हेत्वाभासा इति ज्ञानं जायते
अनंतरं च तेषामेव हेत्वाभासानां स्मरणं तत्स्मरणे हेत्वाभासे प्रसंगपदार्थः उपेक्षानर्हत्वादिपंचकमित्येते तत्र अनंतराभिधानप्रयोजकजिज्ञासाजनकत्व

3116

१

न३ रानु२

रणप्रकारत्वमिति॰ न च प्रसंगपूरे नैवस्तु तत्वलाभसंभवे निरूप्ये सति व्यर्थमेव त्विति वाच्यं तेन तादृशनिरूपणस्य सिद्धत्वोत्त्याऽवसरत्ला
भात्॰ एतेन यस्मिन् [illegible] कसंगतस्य चेत्याप्रसंगपूरणं व्यर्थं यावत्तत्पूर्वोक्षायाम वसो[illegible] त्तन्ने निरस्त्यपास्तं॰ तथा च दीधितावेताव तात्पर्यं वधेनान्वयबोधेन
ति२ ग्रथेनास्तृतीयार्थोऽभिरुः धात्वर्थेन बोधिनेन निरूपणे तदन्वयः हेतुलिंगं विषयित्वं द्वितीयार्थः निरूप्ये सत्र प्रतिपत्त्यनुकूलव्यापारो निरूपणं तदेकदेशे
प्रतिपत्तौ द्वितीयार्थान्वयः त्यप्रत्ययार्थ आनंतर्यं तच्च ध्वंसाधिकरणक्षणवृत्तित्वं तस्य तदाभासनिरूपणमित्यत्र सानानुकूलव्यापाररूपे नि
रूपणपदार्थेऽन्वयः अत्रैव पञ्चमीद्वयार्थयोरन्वयोन्वयश्चास्य निरूपणमित्यनेन [illegible] दर्शितः तदाभासेति तत्पदे न हेतुमात्रपरा
मर्शः ननु सपरिकरहेतोः तद्दोषाणामप्रसिद्धत्वात् अत एव सपरिकरहेतुमित्यसमासेन लिखितं हेतुश्च [illegible] पंचम्यन्तार्थः हेतुसहशाब्दतस
दर्थः पूर्वकल्पे च मौलहेत्वाभासपदं हेतुरूपाभासपरमिति बोध्यं निरूपणपदोत्तरद्वितीयाया विषयित्वमर्थः प्रतिपूर्वकज्ञाधातोरुत्तरका
लीनक्तिविषयत्वे प्रकारकत्वानानुकूलव्यापारोऽर्थः वर्तमानत्वमाख्यातार्थः निरूपणस्य निरूपितत्वसंबंधेन द्वितीयार्थेऽन्वयः द्वि
तीयार्थविषयितायाश्चोक्तव्यापाररूपधात्वर्थे कर्तृशानेन्वयः व्यापारस्य जनकतासंबंधेन अथशब्दोप्यत्र हेत्वाभासानामौलवाक्य
परः इति शब्दः स्वरूपार्थकः अथपदार्थस्येति पदार्थे तस्य च व्यापारेऽभेदसंबंधेनान्वयः तथा च नयबोतम्य धाभिन्नायः सपरिक
रहेतुसानानुकूलव्यापारस्तदुत्तरकालीनं पंचसपरिकरहेतुनिरूपित सत्संगसंगतिस्तानजन्यप्रतिज्ञा सा प्रयोज्यं तत्र सोनिर्णयादित

क्ताविनन्वयः तत्रैव वर्तमानत्वान्वयः तदभावं वा तेश्च मणिकारे आश्रयतासंबंधेन ३

१

(प्रतिभासेवात्र लिङ्गकरणतापक्षः समीचीनः)

कारकज्ञानानुकूलव्यापारे

पतत्कार्यकारित्वे ज्ञानजन्यजिज्ञासाप्रयोज्यं च यत्तद्भासनिरूपणमनुमितिकारणीभूताभावेत्यादिग्रन्थात्मकं तद्विरोध्यकाव्यवहितोत्तरकालकर्तव्यताप्रकारो [illegible] थहेत्वाभा
सेत्यादिग्रन्थात्मकसन्दर्भानुकूल इति मानमणिकार इति बोध्यः द्वितीयायाः विषयतार्थ इति मते तद्विरोध्यकत्वं तन्निष्ठविरोध्यतानिरूपकत्वं बोध्यं अवयवान्तर्गतं व्याप्तिज्ञानत्वं सद्धेतुनि
रूपणस्य केवलमिति चेदित्थं मूलेऽनुमितिकरणमनुमानमिति ग्रन्थेनानुमानलक्षणप्रकारकज्ञानानुकूलव्यापारो दर्शितः तच्च लिङ्गपरामर्श इति स्वरूपनिरूपणं अप्र
माणसाधर्म्यसादिना प्रामाण्यनिरूपणं च लक्षणस्वरूपप्रामाण्यप्रकारकज्ञानानुकूलव्यापारो निरूपणं तच्चेदमनुमानस्येति वाक्यं सपरीकरहेतुशब्देनानुमानस्ये
वोपादानात् स्वविषयरूपाभाववत्त्वस्येव तत्प्रतिबन्धकग्रहविषयत्वस्य रूपतद्विरोधित्वस्य वा स्मारकसंबन्धत्वसंभवात् व्याप्तिपक्षधर्मताविशिष्टहेतुप्रतिपत्त्यनुकूलत्वेन तन्नि
रूपणरूपत्वाच्च अनुमानप्रामाण्ये अवश्याप्यमाने व्याप्तिनिश्चयाय व्याप्तिग्रहोपायस्य तदुपयोगिव्याप्तिस्वरूपं निरूप्य निरूपणं तत्सहितं च व्यभिचारशङ्काविधूनना

त

र्थकस्य व्याप्तिज्ञानस्य कारणतानिर्वाहार्थं व्याप्त्यनुगमस्य परामर्शार्थं सामान्यलक्षणायाः कारणसंपत्त्यर्थं पक्षतायाः अनुमितिकारणत्वरूपलक्षणज्ञानस्य प्रमा
त्वनिर्वाहाय परामर्शस्य हेतुतायाः ततः स्वार्थं परार्थं चेति पदद्वयस्य स्वानुमानविभागस्य परार्थानुमानं न्यायसाध्यमिति तदर्थमवयवनिरूपणं एवं रीत्या सद्धेतुरूपानुमा
नेनिरूपिते प्रसक्तोपजीवकत्वात् इत्यादिग्रन्थमारभ्यावयवान्तनिरूपणं सद्धेतुनिरूपणमित्यभिहितमिति एतावता थहेत्वाभासा इति मूलग्रन्थोपि व्याख्यापितः अथशब्दस्यानन्तर्य
मर्थः तच्च ध्वंसाधिकरणकालवृत्तित्वं ध्वंस एव वा समानकालीनत्वं संसर्गः ध्वंसे चावयवान्तर्गतं यात्मकसद्धेतुनिरूपणस्यानन्तर्यावधितायां अर्थतो लभ्यतया अनुयोगि
ताविशेषसंबन्धेनान्वयः वस्तुतस्तु शब्ददिप्पण्यां अथशब्दस्य पूर्ववाक्यस्थक्रियानन्तर्यार्थकतायाः स्वयमभिधानात् असद्धेतुनिरूपणानन्तर्यमेवार्थः ज्ञानजन्यजि
ज्ञासाधीनत्वं च [illegible]र्थः अनयोर्लक्षणादिप्रकारकज्ञानानुकूलव्यापारे [illegible]र्थेऽन्वयः प्रतिज्ञाविषयत्वे बहुत्वं च कर्मत्वाख्यातार्थः वर्तमानसामीप्ये तद्विधानात् प्रतिज्ञा

पातं १

(:तदाभासानन्तप्रसव्यापार्थविवक्षाभिप्राये ण ग:)

७विषयत्वं-७

२

योत्तरकालीनत्वं कृतिश्चोत्तरत्वे प्रकृतवाक्यस्यावधित्वेनान्वयः कर्माख्यातविवरणामथेस्याध्याहारः कृतित्वं तृतीयार्थः तस्योत्तरकालीनत्वस्य च कृतावन्वयः तादृशकृते
श्च धात्वर्थव्यापारे विषयतासंबन्धेनान्वयः उक्तव्यापाररूपधात्वर्थस्य निरूपितत्वसंबन्धेनाख्यातार्थे विषयत्वेऽन्वयः तस्य प्रथमान्तपदोपस्थाप्ये हेत्वाभासे आ
श्रयतासंबन्धेनान्वयः बहुत्वरूपसंख्यान्वयोऽपि तत्रैव तथा च सद्धेतुनिरूपणध्वंसाधिकरणकालवृत्तित्वनिर्णयादिज्ञानजन्यजिज्ञासाप्रयोज्यः पञ्चत्वसादि
रूप्यात्मकवाक्योत्तरकालीनकृतिविषयः शब्दप्रयोगादिप्रकारकज्ञानानुकूलव्यापारः तद्विषया बहवो हेत्वाभासा इति बोधः शब्दात्मकव्यापारस्य विषयताश्र
(विषयतासंबं:) यानुबन्धिनी। वस्तुतस्तु यत्नस्यार्थः फलं जन्यत्वं संसर्गः आश्रयत्वं माख्यातार्थः तादृशव्यापारजन्यफलाश्रया इत्याकारको बोध इति हेत्वाभासा इत्यस्य
दुष्टा हेतव इत्यर्थो व्यक्तीभविष्यति। ननु तस्य हेतुदोषपरत्वे वाऽर्थ इति दीधितावपि तदाभासपदं दोषपरमेवेति तत्र तथा सति पक्षधर्मतां निरूपयितुमा
हेति यदुष्टान्निरूपयितुं प्रतिजानीते इत्येव वाच्यं स्यात् ग्रन्थकारस्य दुष्टसंगत्युपपादनश्रमवैफल्यापाताच्च यदि च दुष्टानां दोषाणां च निरूपणद्वयमपि तादृ
शव्यापारः मूले च दोषव्याख्यातार्थान्वयः दीधितौ दुष्टहेतुप्रतिपत्त्यनुकूलो दोषनिरूपणात्मकोऽपि व्यापारो भिन्नतया इष्टव्यतोनदाहेत्वाभासपदस्य दुष्टहेतुपर
तायाः आवश्यकत्वे किं दोषेषु सद्धेतुसंगत्युपपादनश्रमेण। तस्माद्दुष्टत्वे ज्ञानस्य दोषत्वज्ञानाधीनत्वेन दुष्टत्वघटकतयैव दोषनिरूपणं कृतं इत्येव सम्यगि
ति ननु तदाभासशब्देन तेन च ते आभासा इति तेषामाभासा इति वा न व्युत्पत्तिः तथा सति तत्सद्धेतुसपक्षिकरहेतुपरामर्शित्वे तदाभासत्वाभावेनाभासाभावेन त्वा
संगत्यापत्तेः केवलहेतुपरामर्शित्वेऽपि प्रथमव्युत्पत्त्यसंगतिः द्वितीयव्युत्पत्तौ यद्धर्मावच्छिन्नहेतुकाप्रकृतानुमितिः तत्सद्धेतुतद्धर्मावच्छिन्नपरतया तत्संगतावपि ते

(=अत्रैतादृशपरत्वे व्यर्थं केवलहेतुपरामर्शोपिनदोषः=)

३दुष्टत्वज्ञानस्य दोषत्वज्ञानजन्यत्वादेककार्यकारित्व३

२

१६ वस्तुतस्तु सादृश्यं भेदागर्भमेव न निवेश्यं अन्यथा निवेशे प्रमेयादिसाधारणसद्धेतुभेदासिद्ध्या सादृश्यस्यैवाप्रसिद्ध्यापत्तेः अथ यात (?) धर्मशून्यत्वमेव तत्त्व = ) १

चेत्यादिविभागासंगतिः मैवं तत्तद्रूपवत्त्व आभासं तदिति श्रुतत्वेन तत्सदस्यव्याप्यत्वादिविशिष्टहेतुपरामर्शतया तत्सादृश्यं तद्भिन्नत्वे सति

हेतुसत् २

जन्यप्रतीतिविषयत्वेन बोध्यं तादृशसादृश्यप्रकारकज्ञानविषयताद्युक्तमित्यर्थः यद्यत्तद्धर्मवत्त्वं (?) सादृश्यमित्यर्थः सादृश्यं चेतद्भिन्नत्वे सति परम्परया तत्परोक्षत्वेन पंचम्यंतपद

पा३ सदृशा आभासाः इत्येवं आभासा इत्यस्यानुमितिप्रतिबंधकज्ञानविषयतावानित्यर्थः आभासं तेरिति आप्ययमेवार्थः सादृश्यं चेतद्भिन्नत्वे सति अनुमितिजनकज्ञानविषयत्वेन मूलेपि हेतु

रेव प्रकारतया तदिति तद्विशिष्टत्वं अनोपमानस्य क्रियान्वयार्थं संतेरिति अध्याहार्यं तेनानन्वयेऽपि न केपि दृष्टदर्शितं इति न तेनानुपपत्तिः एवं च तेन ते आभासा इति न व्युत्पत्तिसंभवः सद्धेतो

विषयत्वं तत्स्वज्ञानेति । शिष्यस्य गुरुस्मृतिविषयत्वेन प्रथमतः प्रसंगज्ञानं ततः गुरुस्मृतिविषयव्याप्यज्ञानं मदिष्टसाधनमिति इष्टसाधनताज्ञानेन ततो गुरुस्मृतिविषयव्याप्य... तत्र निरूपितत्वं तदधीनज्ञान

विषयवान् कः इत्याकांक्षायां गुरुस्मृतिविषयव्याप्यत्वेन हेत्वाभासत्वप्रकारकज्ञानविषयविणी ख्यातमप्रयोज्यत्वादित्यर्थः अवयवनिरूपणानंतरं येन व्याप्तिपक्षधर्म

ताविशिष्टहेतुनिरूपणानंतरं शिष्यस्य तज्ज्ञानं तेन तत्र निरूपितप्रसंगसंगतिर्यत्किंचित्स्यादिति प्रसंगरूपा आनंतर्याभिधानप्रयोजकीभूतजिज्ञासाजनकतायां ज्ञान

नित्यायाविषयिता संबंधावच्छिन्नावच्छेदकता विषयितासंबंधावच्छिन्नतदवच्छेदकतायां अवच्छेदकतापर्याप्त्यधिकरणत्वमिति संगतिलक्षणं सामान्यधर्मप्रकारकज्ञा

नं गुरुस्मृतिविषयवानिति तदनात्मकं वा ततः प्रसंगसंगतिव्याप्यत्वोपलक्षितधर्मप्रकारेण तद्विषयज्ञानं मदिष्टसाधनमिति इष्टसाधनताज्ञानं कृतिसाध्यताज्ञानादिकमपि

ततः प्रसंगसंगतिव्याप्यत्वोपलक्षितधर्मप्रकारकज्ञानं मे भूयादिति इच्छा ततः व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपितप्रसंगसंगतिमान् कइति गुरुं प्रति जिज्ञासाजनकरा

द्रप्रयोगः किंशब्दस्य स्वसमभिव्याहृतपदार्थतावच्छेदकावातरधर्मप्रकारकज्ञानेच्छायां शक्तत्वात् ततः गुरोः प्रसंगसंगतिमत्त्वावातरधर्मप्रकारकशिष्यज्ञानं मदिष्टसा

धनं इतीष्टसाधनताज्ञानं शिष्यज्ञानधर्मिकं कृतिसाध्यताज्ञानादिकमपि ततः शिष्यस्य प्रसंगसंगतिमत्त्वावातरधर्मज्ञानं भूयादिति गुरोर्बुबोधयिषा ततो हेत्वाभासनिरूपणं

२ ततो गुरोर्गुरुस्मृतिविषयव्याप्यत्वोपलक्षितधर्मप्रकारकज्ञानेच्छाविषयकशाब्दबोधः २

३

क्रियत इति चेत् सामान्यधर्मप्रकारकज्ञानविषयाप्रसंगसंग[illegible]ति ज्ञानजन्यविशेषधर्मप्रकारकजिज्ञासाया हेत्वाभासनिरूपणप्रयोजकत्वेन नु क इति प्रश्नं प्रति शिष्यजिज्ञासायाअनुबोधपधियांप्रतिप्रश्नार्थबोधस्य हेतुत्वे च मानाभावादिति चेदत्र भट्टाचार्यैः स्वजिज्ञासाया निरूपणप्रयोजकत्वे शाब्दप्रयोगात्मकनिरूपणानुकूलवक्तृबुबोधयिषानुकूलेच्छा सति पाद्यज्ञानस्यासिद्धत्वे ज्ञानं न तत्संपादकस्यासिद्धत्वव्याप्येद्याविषयत्वप्रतिपाद्यस्य को हेत्वाभास इति प्रश्नवाक्यस्य व्यवहारेऽज्ञानविषया निर्णीतैकपदत्वजिज्ञासाप्रसक्तविषम[illegible]विधयातदानुकूल्येन युक्तमायं तथा चेन को विशेषः। ननु सर्वमिदं तदा संगच्छते यदि व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणानंतरं तन्निरूपितसंगतिमानक इति शिष्यस्य जिज्ञासायाः सेवनानुभवसिद्धेति चेन्न एकनिरूपणानंतरं इतः परं गुरुणा किं वक्तव्यं गुरोः स्मृतिविषयः क इत्याकारकजिज्ञासाया सर्वानुभवसिद्धत्वोपोद्घातादिपंचकभिन्नत्वविशिष्टस्मृतिविषयत्वस्यैव प्रसंगत्वपर्यवसानेन ताद्दशजिज्ञासाया निर्वाहात्। ननु तथापि हेत्वाभासनिरूपणे हेत्वाभासत्वप्रकारकज्ञाने इच्छाया एव प्रयोजकत्वात् तन्निर्वाहो न जायत एवेति चेन्न हेत्वाभासत्वस्यैव प्रसंगसंगतिरूपत्वेन तस्य तद्व्याप्यत्वेन च ताद्दशजिज्ञासायाः सास्वरूपतान नचैतस्यैव तद्व्याप्यत्वेन तत्प्रकारकजिज्ञासातः पूर्वं सामान्यधर्मप्रकारकज्ञानविषयात् तत्प्रकारकज्ञानस्यानन्यथकत्वेन पूर्वमेव ताद्दशजिज्ञासाविषयस्यासिद्धत्वेन कथं जिज्ञासेति वाच्यं ज्ञानमिकारूपीभूताभावप्रतियोगिययोर्थज्ञानविषयत्वेन व्याप्यत्वस्य गुरुस्मृतिविषयत्वेन व्यापकत्वस्य स्वीकारेण च प्रसंगसंगतित्वं पुरस्कृत्य हेत्वाभासत्वप्रकारकज्ञानस्य प्राक्सत्वेऽपि ताद्दशयथार्थज्ञानविषयतया तेन तत्प्रकारकज्ञानस्यासिद्धत्वेन ताद्दशजिज्ञासायाः संभवात्। एवं चानंतर्याभिधानप्रयोजकजिज्ञासाजनकतायाया ज्ञाननिष्ठविषयितासंबंधावच्छिन्नावच्छेदकताविशिष्टविषयितानिष्ठायास्तदवच्छेदकताया अवच्छेदकतापर्याप्त्यधिकरणत्वरूपसंगतिलक्षणसमन्वयः। एवं जिज्ञासायां प्रसंप्रसंगति ज्ञानजन्यत्वे निरूप्यतावच्छेदकसंगतिज्ञानं उपोद्घातादिपंचकभिन्नत्वे सति अनंतराभिधानप्रयोजकजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रकारकस्मरणप्रयोजको निरूप्यनिष्ठसंबंधः प्रसंगः। प्रकृते हेत्वाभासनिरूपणप्रयोजकीभूता को हेत्वाभास इति हेत्वाभासपदार्थतावांतरधर्मप्रकारकजिज्ञासा[illegible]तज्जनकनिरू

(निरूप्यतावच्छेदकमिसमर्थः २)

३

6

प्यता॥ वबाधेदकप्रकारकस्मरणं च हेत्वाभासपदार्थत्वप्रकारकं स्मरणं स्मरणोजि तास्ताजनकत्वं सामान्यधर्मप्रकारकज्ञानविषयतातादृशस्मरणप्रयोजकनिरू
प्यनिष्ठसंबंधश्च व्याप्तिपक्षधर्मतादिरूपत्वादिः संबंधे स्मरणप्रयोजकत्वं स्मरणजनकज्ञानविषयत्वमेव स्मरणजनकसंबंधत्वानं च सद्धेतुनिरूपणानंतरमि
तः परं गुरूणां किं निरूपणीयं प्रसंगादि किंचित्संगतिमदिति सामान्यतः शिष्याणामसत्त्वभातितांतरादेः श्रूयमाणत्वात्संबंधज्ञानस्य स्मरणजनकत्वमेकसंबंधिज्ञा
नविषया अन्यविधेयस्य देतत् इतिप्रकारांतरं द्रष्टव्यं न तु दीधितिकृतां तत्र प्रसंगादिसनेन संगतिं प्रदर्श्य तत्त्वनिरूपणादिसादिना फलप्रदर्शनेऽर्थं न च संगति
प्रदर्शनेन तद्भावरूपकतया तत्त्वनिधानभावरूपकमिति वाच्यं तत्त्वनिर्णये सादिनेव तद्धाभादिसाक्षायेन त्रां कृततात्तत्वेति। हेत्वाभासनिष्ठपक्षतत्वनिर्णयादिजनकज्ञान
विषयत्वमिति योजना शिष्यप्रश्नस्तूपयोगीति तत्र प्रश्नस्तु द्वेधा सर्वः अस्य प्रयोजनपदार्थेऽन्वयः प्रयोजनप्रदर्शनमिति हेत्वाभासत्वज्ञानतत्त्वनिर्णययोः कार्यकारणभा
वग्राहकमि सर्वः तथा च मूले तत्त्वनिर्णयविजयप्रयोजकत्वादि स्वत्र प्रयोजकत्वं जनकज्ञानविषयत्वं हेत्वाभासानामिति पूरणीयं निष्ठत्वं षष्ठ्यर्थः तस्य निरुक्तविषय
तेऽन्वयः प्रयोज्यत्वं पंचम्यर्थः अस्य च धात्वर्थनिरूपणेऽन्वयः एवं च हेत्वाभासनिष्ठतादृशप्रयोजकत्वे निष्ठप्रयोजकतानिरूपिता या प्रयोज्यता तत्त्वालियं निरूपणं तद्विष
यादृ सर्वः शिष्यस्य निरूपणघटकहेत्वाभासत्वज्ञानसाध्यकप्रयोजनमीमांसा हेत्वाभासत्वज्ञानधर्मिकेष्टसाधनताज्ञानस्यापेक्षिततया तत्त्वनिर्णयेत्यादिग्रंथस्य फलप्रदर्श
नपरत्वं संभवतीति भावः यद्यपि प्रयोज्यत्वं तत्त्वज्ञानजन्यजिज्ञासाधीनत्वमेव फलतीति तथापीदानीं तत्त्वनिर्णयादि प्रयोजकत्वं न संगतिरूपमिति विशेषः तन्मूलस्य फलेऽप्र
दर्शनपरत्ववत् संगतिप्रदर्शनपरत्वमप्यानुरूपकमिति चेत्तत्त्वाभावे दीधितिकृतां पुनः तत्कार्येति पूरणसंवलितं विक्तमिति न तद्धेय्यर्थमिसा त्रायेन समाधेनत्तथापीति
मूनतेति प्रसक्तोपजीवकत्वादि स्वत्र प्रथमं मणिकारेण संगतिप्रदर्शनात् अनेनावच्छिन्नं तग्रंथसाकांक्षेत्वानुमितिसर्वं संगतिः प्रदर्शनीयेति किमधिकेनेति वाच्यं यस्याप्रदर्श

८

नेतत्स्यैव साकांक्षत्वात् साधकत्वं अमसुत्साधर्थं आपेक्षिकसंगतिप्रदर्शनात् अतएव प्रसंगे कार्यकारित्वयोरन्योन्यनिरपेक्षयोः क्रमनियामकत्वसूचनाय पदाधिपतौ चकार अपी
तिजिज्ञासायां निरूपणप्रयोजकत्वं दर्शितं नरीत्या प्रसिद्धत्वव्याप्येच्छाविषयत्वप्रतिपादकस्य केस्तत्कार्यं तत्त्वनिर्णयादिप्रयोजककरतिप्रश्नवाक्यस्य व्यवहृतैव
ज्ञानं विधाय निर्वाक्यं यत्तु जिज्ञासाप्रत्यक्षं विषयविधया तदानुकू[illegible]ल्येन। एवं सङ्केतु[illegible] निरूपणानंतरं सङ्केतुनिष्ठं तत्त्वनिर्णयादिप्रयोजकत्वज्ञानं शिष्यस्य
ततः तत्त्वनिर्णयादिप्रयोजकान्तरस्मरणेन विशेषधर्मप्रकारेण तत्तद्दृशाप्रयोजकज्ञानं इष्टसाधनताज्ञानात् तत्त्वनिर्णयादिप्रयोजकान्तरं किमिति तादृशप्र
योजकत्वावांतरहेत्वाभासत्वरूपधर्मविषयिणी जिज्ञासा ततः प्रश्नः ततस्तदर्थशाब्दबोधः ततः हेत्वाभासास्तत्त्वनिर्णयादिजनकज्ञानविषयतावंतः इति ज्ञान
तच्छिष्यसमवेतं तत्कार्यतत्त्वनिर्णयादिप्रयोजकत्वावांतरधर्मवत्त्वेन हेत्वाभासज्ञानमदिष्टसाधनमिति नीष्टसाधनताज्ञानं कृतिसाध्यताज्ञानादिकं च गुरो
स्तेनावबोधयितव्येति तज्ज्ञानजन्यजिज्ञासाधीनत्वं निरूपणान्वयि मिषं च व्यर्थः। हेत्वाभासानामुक्तिति परणीयं तथा च हेत्वाभासनिष्ठं यत्तादृशप्रयोजकत्वं तज्ज्ञा
नजन्यजिज्ञासाधीनत्वं तादृशनिरूपणोऽक्षतं एवं हेत्वाभासास्तत्त्वनिर्णयादिजनकज्ञानविषया इति ज्ञाने तुल्यवित्तिवेद्यतया हेत्वविषयकज्ञानं तत्त्वनिर्णया
दिजनकमिति कार्यकारणभावः शिष्याणां ज्ञायते ततः तेषां श्रवणे प्रवृत्तिरिति तन्न तस्य प्रयोजनप्रदर्शनपरत्वमप्यव्याहतमेव। विजयः परात्कुत्रवं
उंनं अहंकारस्याहमुत्कृष्ट इति ज्ञानं तत्खण्डनं तज्ज्ञानानुकूलव्यापारः यद्वायमुत्कृष्ट इति मध्यस्थज्ञानानुकूलव्यापारो विजयः सुखविशेषो विजय इत्यन्ये। प
ननु तत्कार्यकारित्वादिलिङ्गाधिगतिगम्या संगतिः प्रमितकोटिनिश्चयस्य सदसत्त्वकार्यत्वादिस्यत आह सपरीति। ननु तत्त्वनिर्णयादिप्रयोजकत्वस्य सङ्के
तुज्ञाने हेत्वाभासज्ञाने एव च सत्त्वेन सद्धेतुनिरूपितहेत्वाभासनिष्ठत्वं कथमत आह प्रयोजकत्वं चेति। एवं च तत्कज्ञानस्य प्रयोजकत्वे तत्र विषयमतमा

(अयमुत्कृष्ट इति)

६ (पपपदिदं पुनरुक्तं आधिपूर्वं फलप्रदर्शनं दृष्टान्तसंगतिप्रदर्शनमिति) ६ हेत्वाभाव ५

अवच्छेदकयोः सहसन्देहे वाः तथात्वमेवोक्तमेवेति भावः कार्यतत्त्वनिर्णयादिस्वस्य हेत्वाभासस्य तथात्वं प्रयोजकत्वं प्रमितत्वं स्वनिष्ठप्रमाघटकत्वं प्रमानुमितौ सल्लिङ्गकपरा
मर्शहेतुतामभिसंधायोक्तं व्याप्तीति। अप्रामाण्येति पर्वतो वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शः ततोऽसंनिकर्षविशेषेण पाषाणमयत्वं वह्न्यभावव्यभिचारीति दोषज्ञानं ततस्तत्का
लीनतदनुव्यवसायेन व्यभिचारिविशेष्यकव्याप्तिप्रकारकपरामर्शवानिति साकाररूपाव्यभिचारिविशेष्यकत्वे सति व्याप्तिप्रकारकत्वरूपमप्रामाण्यं विषयीक्रियते एवं पर्वतस्ताह्रदा
ह्रदत्ववानिति साकारकपरामर्शे ह्रदत्वाभाववति ह्रदत्वग्रहे ततस्तत्कालीनतदनुव्यवसायेन ह्रदत्वाभाववति तादृशह्रदत्वं परामर्शामी साकारेण ह्रदत्वाभाववद्विशेष्यकत्वे सति ह्रदत्वप्र
कारकत्वरूपमप्रामाण्यं विषयीक्रियते इति दोषज्ञानस्याविशेष्यिकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वं अथवा प्रथमतो धूमाभाववद्वृत्तित्वविशिष्टवह्निमान्वह्निरिति दोषप्र
कारकज्ञानं ततो दोषविशेषाद्धूमव्याप्यवह्निमान् ह्रदः धूमाभावव्याप्यजलवांश्चेति समूहालम्बनं तृतीयक्षणे धूमनिरूपितव्याप्यभाववति वह्नौ धूमव्याप्तिप्रकारकमिदं ज्ञान
मिति यत्र तत्रोऽप्रामाण्यग्रहः ततः अप्रामाण्यज्ञानाभावविशिष्टविरोधिकोटिव्याप्यवत्ताज्ञानरूपप्रतिबन्धकापसरणात् ह्रदो धूमाभाववानिति प्रमितकोटिनिश्चयो भवति
एवं प्रथमक्षणे धूमसामानाधिकरण्याभावविशिष्टजलत्ववज्जलत्वमिति विरोध[illegible]ग्रहः अनन्तरं दोषविशेषेण धूमव्याप्यजलत्ववान् धूमाभावव्याप्यह्रदत्ववांश्चेति स
मूहालम्बनं तृतीयक्षणे धूमसामानाधिकरण्याभाववति जलत्वे धूमसामानाधिकरण्यप्रकारकमिति विरोधिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्रहः ततः स्वकारणवशात् ह्रदो धूमाभा
ववानिति प्रमितकोटिनिश्चयः एवमसिध्यैदावृत्त्यं बाधस्थले तु प्रथमतः वह्निमत्पर्वतवज्जलत्वमिति बाधज्ञानं अनन्तरं पर्वते वह्निमत्त्वेन हेतुना वह्न्यभावव्याप्याभावोऽनुमेयः
अनन्तरं च दोषविशेषादिना वह्निव्याप्यधूमवान् वह्न्यभावव्याप्यजलत्ववांश्चेति समूहालम्बनं अनन्तरं च इदं ज्ञानं वह्न्यभावव्याप्याभाववति पर्वते वह्न्यभावव्याप्यप्रकारकं इत्यप्रा
माण्यज्ञानं ततः पर्वतो वह्निमानिति प्रमितकोटिनिश्चयः एवं वह्निव्याप्यधूमवत्पर्वतवज्जलत्वमिति सत्प्रतिपक्ष[illegible]ग्रहः ततः पर्वते वह्निव्याप्यवत्त्वेन हेतुना वह्न्यभावव्याप्याभावोऽनुमेयः
ततो दोषविशेषेण वह्निव्याप्यधूमवान् वह्न्यभावव्याप्यजलत्ववांश्च पर्वत इति समूहालम्बनं ततोऽप्रामाण्यग्रहः ततः प्रमितकोटिनिश्चयः असंकीर्णबाधस्थले तु प्रथमतः उस

कांचनमयमिनो धूमः पर्वतो वह्निमानिति ज्ञानं तद्दोषमेतद्वह्निव्याप्यकांचनमयधूमवान्पर्वत इति ज्ञानं तत्र कांचनमयधान्यधूमवान्वह्निव्याप्यालोकवानिति च ज्ञानं वह्निव्याप्यधूमवान् कांचनमयः पर्वतः वह्निव्याप्यालोकवांश्चेति कांचन

मयधान्यपर्वत इति ज्ञानं तत्र कांचनमयधान्यधूमवान्कांचनमयधान्यपर्वतो वह्निमानिति प्रमितकोटिनिश्चयः एवं च वह्निमान्वह्निमानिति ज्ञानोत्तरं निर्वह्निर्वह्निव्याप्यधूमवानिति परामर्शेऽप्रामाण्यग्रहो जायते

निकालीयवच्छिन्नो घटयोगं यथाभाववानिति बाधग्रहः अनंतरं कथंचित्तदुत्पत्तिकालावच्छिन्नो घटयोगं यथाभाववानिति ज्ञानं तद्द्वितीयक्षणे तत्राप्रामाण्यग्रहो न भवति तत्क्षण एव च घटयोगं यथाभावव्याप्य

यप्रागभाववानुत्पत्तिकालावच्छिन्नो घट इति परामर्शः तत्र उत्पत्तिकालावच्छिन्नो घटयोगं यथाभाववानिति प्रमितकोटिनिश्चयो भवति इति बाधादेर्ज्ञानस्य विरोधिकोटिमत्ताज्ञाने

अप्रामाण्यग्राहकत्वमित्यादिरीत्या दोषज्ञानस्योपयोगित्वमिति बहुतरमूहनीयं तत्र निर्णयादौ सत्यत्वं तत्रावस्य प्रमितकोटिप्रत्वे गौरवात्तापत्तिरिति तत आह अथ चेति । तत्रेति सद्धेतुप

रामर्शकालीनस्वोपनानुव्यवसायेनोत्तेन साध्यव्याप्यवत्तिसाध्यावगाहित्वमनुमीयते व्याप्यवत्तिव्यापकप्रकारकत्वे व्यापकत्वेति व्यापकप्रकारक

त्वनियमात् यद्यपि धूमवति वह्निप्रकारकत्वं यत्र तत्रैव वह्निमति वह्निप्रकारकत्वमित्येव नियमः तथाप्यप्रयोजकत्वशंकानिरासाय सद्धेतुत्वज्ञानानुसरणं । वस्तुतस्तु सल्लिंगपराम

र्शजन्यानुमितिः प्रमैवेति प्राचीनसिद्धांतेन सद्धेतुत्वं ज्ञानं येन तद्गतरं सल्लिंगपरामर्शजन्यत्वज्ञानं जायते तदुत्तरं तादृशानुमितौ प्रमात्वज्ञानं जायत इति [illegible] साध्यवत्ता

ज्ञाने प्रमात्वप्रयोजकं यत्र सल्लिंगपरामर्शजन्यत्वज्ञानं तदनुकूलसद्धेतुमापकहेतौ व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानं विषयाविषयात्तदनुकूल्येन सद्धेतोः साध्यवत्ताज्ञानप्रमात्व

निश्चयप्रयोजकत्वं बोध्यं एवं च पक्षः साध्यवानिति साकारकसाध्यवत्ताज्ञानोत्तरं पक्षसाध्याभावव्याप्यहेतुमान् पक्ष इति ज्ञानं तद्विषयहेतौ साध्याभावव्यभिचारित्वज्ञानं विरोधज्ञ

विधया व्यसाभावव्यभिचारविशिष्टहेतुमद्विशेष्यताकत्वरूपहेतुज्ञानसंपादकं अन्यथा दृष्टत्वग्रहेण साध्याभावव्याप्तिविशिष्टहेतुमद्विशेष्यताकत्वरूपसाध्याभाववद्विशे

ष्यताकत्वरूपाप्रामाण्यसाधकलिंगोपस्थानापत्तेः तदभावव्याप्यवति तत्प्रकारकत्वस्य तदभाववति तत्प्रकारकत्वव्यापकस्य निरूपकज्ञानकालीनस्वोपनानुव्यवसायेन ग्रहणे

संभवादेवं च विषयाविषयात्तदनुकूल्येन हेत्वाभासानां साध्यवत्ताज्ञाने साध्यवद्विशेष्यकत्वरूपप्रमात्वनिश्चयप्रमात्वप्रयोजकत्वं यद्वा स्वोपनानकालीनोक्तग्रहानुव्यवसा

येन दृष्टत्वग्रहकाले गृहीतं यद्धूमाभावव्यभिचारविशिष्टहेतुमद्विशेष्यताकत्वविशिष्टवह्निप्रकारकत्वं तद्धूमाभाववत्विशेष्यताकत्वविशिष्टवह्निप्रकारकत्वव्यापकीभूताभाव

प्रतियोगि इति तेन हेतुना साध्यवत्तिसाध्यप्रकारकत्वरूपं प्रामाण्यमनुमीयते । तदेवाभिसंधाय वह्निसाभाववति वह्नित्वप्रकारकत्वव्यापकेन साहसमर्थं विशेष्यकवह्नित्वे

प्रकारकत्वाभावेन निरूपितेन व्यापकमपि वह्नित्ववति वह्नित्वप्रकारकत्वमनुवर्तत इति प्रसक्षमणादुक्तं यद्वा पर्वतो वह्निव्याप्यधूमवानिति परामर्शाद्धन्यनुमितिः तत्रो वह्न्यभावव्या

(कपिसंयोगव्याप्यपिपीलिकासंयोगवान्मूलावच्छिन्नो वृक्षः इत्यादिपरामर्शजन्यायमानाया मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यनुमितेः प्रमात्वासिद्धेस्तस्य प्राचीनानामसंमतिरिति यद्यपि तथा-

पि सल्लिंगे व्याप्यवत्त्वमिति ज्ञानविशेषणान्न दोष इति भाति)

१ हेतो वह्निमान् इत्यनुमितिः ततः वह्न्यभाववान् इत्यनुमितौ अप्रामाण्यज्ञाने ततः पूर्वानुमितौ प्रामाण्यघटकविरोध्यता यथा विरोध्यकत्वसाधकस्य तादृशविरोध्यतावच्छेदकावच्छिन्नतत्स्वरूपलिङ्गस्योपस्थिति

प्यहृदत्ववानिति परामर्शाद्वह्न्यभाववानुमितिः तत्र हृदत्वरूपहेतावदुष्टत्वग्रहे सति वह्न्यभाववानुमितौ सल्लिङ्गपरामर्शजन्यत्वज्ञानं तदधीनस्तत्र प्रमात्वनिश्चयः तदधीनं पूर्वोत्पन्ना
नुमितावप्रामाण्यज्ञानं तत्र प्रमात्वाभावनिश्चय इति तत्र प्रमात्वनिश्चयो न जायते तत्र स्वरूपासिद्धित्वरूपदुष्टत्वग्रहे तु वह्न्यभाववानुमितौ न सल्लिङ्गपरामर्शजन्यत्वज्ञानं तदसत्वे च
तत्र प्रमात्वज्ञानाभावः तस्मिन् पूर्वोत्पन्नवह्न्यनुमितौ अप्रमात्वज्ञानानुत्पत्तिः तत्सत्वे च न प्रमात्वाभावनिश्चयः तत्सत्वे प्रतिबन्धकनिष्ठा तादृशानुमितौ प्रमात्वनिश्चयो जायते
तथा च प्रमात्वाभावनिश्चयाभावरूपप्रतिबन्धकाभावसंपादनद्वारा साध्यवत्ताज्ञाने प्रमात्वनिर्णयसंपादकत्वमाभासत्वज्ञानस्येति तथा चोक्तं विपरीतकोटिसाधकहेता
वदुष्टत्वग्रहे जाते दुष्टविषयकपरामर्शजन्यत्वेन हेतुता विपरीतकोटौ प्रमात्वनिश्चयो जायते ततश्च प्रमात्मैकज्ञानीयप्रकारतानिरूपितविशेष्यतासमानाधिकरण्या
विशेष्यतानिरूपितप्रकृतसाध्यप्रकारताकत्वेन हेतुता साध्यवत्ताज्ञाने तद्वति तत्प्रकारकत्वाभावरूपप्रामाण्याभावप्रकारको ग्रहो भवेत् तु तत्र दुष्टत्वग्रहे जाते तु विप
रीतकोटिज्ञानधर्मिकप्रमात्वविधेयकानुमितिसंपादकोऽयं ज्ञानादृशपरामर्शजन्यत्वरूपो हेतुः स एव न संभवतीति अतः विपरीतकोटौ प्रमात्वनिश्चयो न जायते तत
श्च प्रकृतसाध्यवत्ताज्ञाने प्रमात्वाभावनिश्चयो नैव जायते तत्साधकस्य प्रमात्मकज्ञानीयप्रकारतेसाधकहेतोरसत्वात् किन्तु प्रकृतानुमापकहेतौ आप्त्यादि
विशिष्टत्वरूपसद्धेतुत्वज्ञानात् तादृशी साध्यवत्ताज्ञाने प्रमात्वनिश्चयो जायत इति अनयैव रीत्या सर्वेषां दुष्टत्वग्रहाणामुपयोगित्वं बोध्यम्। मूले केति दुष्ट
हेतुनिरूपणस्यैव प्रतिज्ञातत्वेन तल्लक्षणस्यैवाकाङ्क्षितत्वात् अतिव्याप्तिरिति सर्वत्र लक्षणसत्वस्य हेतुदोषाभेयसमूहालम्बनमादाय सत्वात् न च दोषाणां कथ
मलक्ष्यता दुष्टत्वात् इति वाच्यम्। पर्वतपक्षकवह्निसाध्यकानुमाने धूमस्यापि द्रव्यत्वादिना दुष्टत्वापत्तेः स्वरूपावच्छिन्नहेतुकप्रकृतानुमितिविरोधियथार्थ
ज्ञानविषयत्वं तस्य तेन रूपेण दुष्टत्वमिति वाच्यम्। एवं च वह्न्यभाववद्ध्रदे धूमत्वादिना दुष्टत्वमिति सति व्याप्तिरित्यर्थः अवच्छेदकेति न च दोषैकदेशे एवमप्यतिव्याप्तिरेव
अज्ञानतिमिरत्वजितरूपावच्छेदकत्वनिवेशः विशेषणान्तर्भावेन पर्याप्तिविषयतापर्याप्तत्वावच्छेदकत्वं च पर्वतो वह्निमानिति ज्ञानमादाय दोषवारणाय यथार्थ

मितिनसंभवतिभ्रमसाधारणविषयितायाएवनिवेशे असंभवापत्तेस्तच्छरावच्छिन्नविषयतानिवेशे प्रतिबंधकतानतिरिक्तवृत्तिविषयतापर्याप्त्यधिकरणाप्रसिद्धेर्यथार्थ
पदवैयर्थ्यापत्तेरिदितियाच्यं साध्यादेरपिहेतुत्वापत्तिरित्यादिनातद्देपस्यवाच्यत्वात् ॰ ह्रदोवह्निमान्द्रव्यत्वात्‌ह्रदत्वाघटत्वमनिरूपघटत्वादित्यादौ हेतुविषयिताया
अवच्छेदकत्वात्प्रयत्नात्रेति ॰ ननुवह्निमान्धूमादित्यादौ हेतुविषयतायाबाधज्ञानप्रतिबंधकतायामनवच्छेदकत्वेप्यनुमितिपदस्याग्नेसमहालंबनानुमितिप
रत्वस्यविवक्षणीयतयास्वरूपासिद्धिज्ञानप्रतिबंधकतामादायतत्रलक्षणसमन्वयः एवं ह्रदोवह्निमान्दोषाभावादित्यादौव्यभिचारज्ञानप्रतिबंधकतायाँ [६४]
तुविषयत्तामादायतत्रापिलक्षणसमन्वयोअस्त्वेवेतिचेन्नबाधादितिपदस्यासंकीर्णबाधादिपरत्वेनोत्पत्तिकालीनोघटोगंधवान्पृथिवीत्वादित्यादावसंकीर्णबाध
स्थलेहेतुविषयतायाः कथमप्यनुमितिप्रतिबंधकतायामवच्छेदकत्वाँनचैवंक्वचिदप्यसंकीर्णबाधितस्थलेहेतुविषयतायानवच्छेदकत्वेनप्रायसैरसंगतमितिवाच्यं ॰
उत्पत्तिकालावच्छिन्नघटोगंधवान्घटत्वादित्यादौहेतुविषयतायास्तादृशप्रतिबंधकतावच्छेदकत्वेनतत्संगतेः नचोत्पत्तिगंधाभावे व्याप्यत्वे निर्णये तादृशायां गंधा [६५]
उत्पत्तिकालावच्छिन्नघटोगंधवान्... भावव्याप्यवत्तापरामर्शेणानुमितिबंधाभाव्यामितिवाच्यं तादृशाभावविशिष्टबाधज्ञानस्यप्रतिबंधकत्वेपितथाविधतद्भावव्याप्यवत्ताज्ञानादेः प्रति
बंधकत्वानुपपत्तेः नचगंधाभावव्याप्यपृथिवीत्वाविशिष्टसत्तिकालावच्छिन्नघटरूपसत्तापक्षज्ञाननिष्ठप्रतिबंधकतायांहेतुविषयतायाअवच्छेदकत्वा
नोत्पत्तिःपक्षतावच्छेदकीभूतोत्पत्तिकालावच्छेदेनगंधवत्ताज्ञानप्रतितेकालावच्छेदेनगंधाभावव्याप्यवत्तेस्यवत्तिकालावच्छेदेनतादृशपृथिवीत्वज्ञानस्यापिप्रतिबंधकत्वादितिवाच्यम्
तथाविधव्याप्यविशिष्टपृथिवीत्वस्वरूपसंबंधस्तावच्छेदकतावगाहित्वेनतज्ज्ञानस्यायथार्थत्वेनहेतुविषयतायायथार्थज्ञाननिष्ठप्रतिबंधकतानवच्छेदकत्वेनाव्याप्तेरवारणात्
तथाचदोषलक्षणस्याप्रकृतत्वेनसंकीर्णबाधितोदेशहुष्टत्वसंभवेप्यसंकीर्णबाधितात्राव्याप्तिरित्यर्थः ॥ अथमूलावच्छिन्नोक्ताः केचित्संयोगवत्त्वहेतुकादित्यादावसंकी

=अवच्छेदकत्वपोर्वस्तुनो र्भेदादिति समाधानान्तरानुसारेणाह =) ५

र्णबाधत्वोपपादनाय संसर्गे तद्वृक्षत्वस्य तत्समवायस्य वा मूलानवच्छेद्यतया मूलावच्छेद्यसमवायसंबंधावच्छिन्नैतद्वृक्षत्वाभाववत्त्वस्यैतद्वृक्षत्वे मूलानवच्छेद्यत्वस्य वास्त
रूपासिद्धिरूपत्वसंभवात् कथमसंकीर्णबाधत्वमित्याशंकां निराकर्तुं व्याप्यत्वे नैरपेक्ष्यैतद्वृक्षत्वादेर्मूलावच्छेद्यत्वे घत्वं बाधगंधोऽपी करिष्यते दीधितिकृता एवं चोत्पत्ति
कालावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादावपि [illegible] दावपि तत्कालावच्छेदेन पृथिवीत्वपरामर्शेपि पक्षे व्याप्यत्वेति पृथिवीत्वे उत्पत्तिकालावच्छिन्नत्वस्य बाधात् उत्पत्तिका
लानवच्छिन्न पृथिवीत्वस्य पक्षधर्मताज्ञानस्य स्वरूपासिद्धिरूपत्वेऽपि यथार्थज्ञानविषयत्वाभावे तत एव न तादृशस्वाभिमतपक्षस्य विषयकज्ञानस्य यथार्थत्वहानिरिति नाव्याप्तिः न चैवं
व्याप्यत्वे नावच्छेदकत्वमिति प्रवाद विरोधः व्याप्यत्वे सर्वदेशकालावच्छिन्नत्वेन यत्किंचिद्देशकालमात्रावच्छिन्नत्वेनास्तीत्येतत्स्यात् अथ एवं मास्तु व्याप्यत्वे स्वावच्छिन्न
व्याप्तिकत्वं दीधितिकृतां व्याप्यत्वे मूलावच्छिन्नत्वे कथनं मतांतरमाश्रित्य न तु स्वमते [illegible] वक्तं रोक्तत्वान्न व्याप्यसंकीर्णबाधस्थले नाव्याप्तिः उत्पत्तिकालीनो घटो गंधाभाव
व्याप्यपृथिवीत्वगुणो गंधाभाववानिति व्याप्यत्वेति सत्प्रतिपक्षविषयकज्ञानस्य यथार्थत्वेन तादृशप्रतिबंधकतावच्छेदकपृथिवीत्वविषयकतासत्त्वात् न च पृथिवीत्वगुणा
भयाभावप्रतियोगिताव[illegible]च्छेदकं न गंधवत्वात् गंधत्वमेव तथा च पृथिवीत्वरूपहेतुविषयकताया अनवच्छेदकत्वादिति वाच्यं प्रकृतसाध्यावच्छेदेन पृथिवीत्वगुणोभयवति परमाणौ
गंधो नास्तीति प्रतीतेर्गंधत्वस्य तादृशोभयाभावप्रतियोगितानवच्छेदकत्वादिति चेन्न अनुमितिपदस्य न समूहालंबनानुमितिपरत्वमिति यथाश्रुतार्थाभिप्रायेण रूपादौ व
ह्रिमान् धूमादित्यादावव्याप्त्यभिधानात् ह्रदो धूमाभाववानिति ज्ञानस्य प्रकृतानुमितिप्रतिबंधकत्वेन हेतुविषयतामात्रस्यानवच्छेदकत्वात् अथ तु सत्प्रतिपक्षघटकीभूत
व्याप्यत्वं तदभाववद्वृत्तित्वरूपं न तु व्यापकसामानाधिकरण्यरूपं गौरवात् तादृशव्याप्यत्वावच्छिन्नविषयकत्वेनैव प्रतिबंधकत्वं न तु प्रतिबंधकतावच्छेदककोटौ हेतु
तावच्छेदकावच्छिन्नविषयतायां निवेशयते तथा चानुमितिपदस्य समूहालंबनानुमितिपरत्वेऽप्यसंकीर्णबाधस्थले व्याप्तिर्नवृत्त्येव तथा हि पृथिवीत्वगुणोभयाभाववत्त्वेनाक्रान
निष्ठप्रतिबंधकताया हेतुविषयतानवच्छिन्नत्वादिति तन्तु [illegible] सत्प्रतिपक्षस्वरूपघटकव्यापकसामानाधिकरण्यरूपव्याप्तिर्मानाभावेऽविशेषं उत्पत्तिकालावच्छिन्न घटो गंधवान्

८

गंधव्याप्यपृथिवीत्वं यांश्चेति समूहालंबनानुमितिं प्रति तु गंधाभाववन्निरूपितव्यापकत्वसामानाधिकरण्यरूपव्याप्तिविशिष्टपृथिवीत्वगुणोभयाभाववत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानविधया प्रतिबंधक
तायाः सकलसंमितत्वात्तदवच्छेदकहेतुविषयतासंभवात्पर्यदपि हृदो वह्निमान् धूमादित्यादावपि घटाभाववान्स्वभावव्याप्यः घटाभाववान् हृद इति ज्ञाने विशिष्टज्ञाननिष्ठप्रतिबंधकतावच्छेदकवि
षयतायाः उदासीनपक्षादिसाधारण्यादतिव्याप्तिवारणाय प्रतिबंधकताकं ज्ञानवैशिष्ट्यानवच्छिन्नत्वं देयं तथा चोक्तरूपेण तथाविधव्याप्तिविशिष्टतदुभयाभाववत्ताज्ञानप्रतिबंधकताव्युदासा
दव्याप्तिसंगतिरिति तदपि न ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्याने प्रतिबंधकतायां किंचिद्विशिष्टविषयिताप्रयुक्तत्वस्यैव निवेश्यत्वे उदासीनपक्षाद्यभावेनैः बाधितहेतौ लक्षणासंगतेश्च सत्वात्पर्यदपि
उत्पत्तिकालावच्छिन्नघटो रूपवान् पृथिवीत्वादित्यादौ पृथिवीत्वगुणोभयाभावस्य न रूपाभावव्याप्यत्वे जले परमाणोरूपादेः सत्वादिति हेतुविषयतायामनवच्छेदकत्वाद्व्याप्तिरिति तदपि न चारु
तथापि पृथिवीत्वे जलेतेजोन्यतमत्वगुणोभयाभावादेः पृथिवीत्वान्यतमत्वगुणोभयाभावादेश्च रूपाभावव्याप्यत्वे न यथार्थज्ञाननिष्ठप्रतिबंधकतावच्छेदकपृथिवीत्वविषयतामादाय लक्षणसमन्वय इति
अनुमितिपदस्य समूहालंबनानुमितिपरत्वे साध्यपक्षपरिष्कारैः प्रकारो व्यापानन्बोधाधीसादिना गंधवदुसन्निकालीनघटादेः पक्षता साध्यता साधनतावच्छेदकत्वे पक्षत्वे च न्याश्रयासिद्धा
दिपरिग्रहः कांचनमयपर्वतो वह्निमानित्यादौ कांचनमयत्वाभाववद्वृत्तित्वस्य धूमादिरूपहेतुघटितत्वेपि कांचनमयत्वाभावव्याप्यवद्वृत्तत्वस्य केवलहेतुघटितत्वं संभव... सेव कांचनमयवन्यादेः सा
ध्यत्वे कांचनमयत्वाभावव्याप्यधूमवद्वृत्तित्वादेरप्रसिद्धावपि कांचनमयाभाववद्वृत्तिधूमादेरेव हेतुघटितत्वेन मयवन्यादेः साध्यत्वे तु साध्याप्रसिद्धिसदघटितेत... न्यविचक्षपस्यैवासत्वात्तद
तिनसंग्राहकमप्यादिपदं न व्याप्तिश्चेति चकारो दोषातिव्याप्तिसमुच्चायकः यथाश्रुतमिति श्रुतं निरूढं तरलक्षणानवीनार्थप्रतिपत्तिपरः शब्दस्तमनतिक्रम्य तदधीनमिति यावत् तो हृद्य
प्रमाविषयत्वलक्षणाभिन्नेवेति फलितार्थः यत्वेनुमितिप्रतिबंधकप्रकारकयथार्थज्ञानविषयत्वविवक्षायां विनैवेतित न्नो केचित्तु प्रतीयताहवविवक्षामपेक्ष्य स्वयं यथाश्रुतत्वोक्तेरसंगतेः इदपद
मेकमेव लक्षणं बोधयेत् सन्निकृष्टार्थकत्वात्तथा सत्युत्तरयोर्दुष्टलक्षणतापत्त्या दोषतादवस्थ्यमिति समीपतरार्थकताभावात्तदिति एवं चैतल्लक्षणमिसन्न्वयः एतत्सदोषस्यैकलक्षणत्वो
भावात् एतोऽप्रतीकमेव लक्षणमिति मात्रवच्छेदे लक्षणत्रयमपीति तल्लक्षणमपीति तल्लक्षणवाक्येपि दुष्टहेतुप्रतिपत्त्यनुकूलव्यापारत्वसत्वात् न चैत्यादिमूले सव्यभिचारादिपदे भावप्रधा
ननिर्देशात् नासंगतिरिति सत आहैवं चेति तथा च तेत्वेसादिग्रंथस्य हेत्वाभासविभागपरत्वेपि रूढस्य व्यभिचारादिघटितत्वेन हेतूनां पंचत्वे कथं नासंगतेरिति सोरकायाए वानवृतो राद्दोषरूपो
पाधिभेदाद्धेतूनां भेद इत्यर्थकस्योपाध्येरसंकरादिति समाधानग्रंथस्याप्यसंगतिरिति भावः व्याकनिरूपविभागफलोनुपपत्त्यसंगतिमाशंक्य विभिन्नव्यवहाररूपविभागफलमुक्तमि

सिद्धं पा ॥

८

स्य

अत्र दुष्टप्रतिपत्त्यनुकूलव्यापारो दुष्टनिरूपणं तच्चोद्यो पदुष्टोभयलक्षणवाक्यात्मकं तत्र मूले दुष्टलक्षणं न दत्तमिति न्यूनतेति तत्कालिकाकारेणानादृता नैयायिकपक्षो यत्रेति व्यधिकरणबहुव्रीहि-
रण्याश्रितस्तन्निराकरणायाह स्फुटमिति स्फुटत्वं तद्विषयकजिज्ञासानधीनप्रतिपत्तिविषयत्वं तत्राप्रतिज्ञानस्यैव तद्बाधानोपयोगितया तत्त्वोधकगुरुवाक्यं विनापि तदज्ञानरूपलक्षणवाक्य-
ज्ञानसंभवान्न शाब्दापेक्षा नापि शाब्दभेदपर्यवसायि बुससंतरापेक्षेति केचित्तु एतद्वाक्यं दोषलक्षणं ज्ञापयित्वा दुष्टलक्षणं ज्ञापयतीति नीयत एव धूमवत्त्वमयं पर धूमोस्तीति वाक्यवद्वाक्यांतरपूरणं
विनैवानुमानादिना दुष्टलक्षणलाभ इति भावः यद्वा मूले तत्र लक्षणादिना निरूपणाये दुष्टहेत्वाभासत्वे पदार्थदोषत्वे घटे कृत्वे रूपसे सम्यमर्थान्वयाचेत्लाभ इत्याहुः नोक्तानुपप-
त्तिरिति दोषलक्षणस्यापि दुष्टज्ञानानुकूलव्यापाररूपदुष्टनिरूपणतयानाप्रतिज्ञानं च मिति भावः दुष्टलक्षणेति अनुमितिप्रतिबंधकप्रमाविषयत्वे तु तावच्छेदकवत्त्वरूप-
पारिभाषिकदुष्टलक्षणेन निर्णायः तथा सत्युपध्येयसंकरेपी निहूरग्रंथसंवादकथनासंगतेः नचेत्यादि समीपग्रंथसंवादस्यैवोचितत्वात् किंतु यौगिकदुष्टस्येपः तथा च यदि
भाषिकलक्षणकरणेपि न तेचेत्यादि विभागग्रंथस्यासंगतिः किंतु उपधेयसंकरेपीत्यादिरेव तत्स्वदोषास्मारकत्वेन विरुद्धसव्यभिचारयोः भेदानुपस्थापनादि-
निरलेन समीपग्रंथसंवादसंभवे दूरग्रंथसंवादकथनमनुचितं न मिश्रपादास्तु यत्तु तदभिप्रायेणान्यस्य दोषलक्षणाभिप्रायेणेत्यर्थः सन्निताश्रये सर्वनाम्नां ध्य-
वहितपरामर्शकत्वात् एतद्रूपेन दोषासांकर्यकथनस्यनादराभिप्राय नियतत्वात् इति तन्न दुष्टविभागव्याघातान्तरीकायाअसंगत्यापत्तेः नन्वनुमितिप-
दस्यार्थकरणमनुचितं व्याप्त्याद्यनुमितिमात्रायसर्वत्र लक्षणासंगतेरत आह तत्राश्रयेति सतोवन्हिमानित्यनुमितिनिष्ठानुमितित्वसमानाधिकरणप्र-
तिबध्यतानिरूपितप्रतिबंधकतावच्छेदकं ह्रदो वन्ह्यभाववानिति यथार्थज्ञानं तद्विषयीभूतवन्ह्यभाववद्ह्रदादिः पर्वतो वन्हिमान् धूमादित्यादौ दोषता
प्रसंगादित्यर्थः हेतुकेति ह्रदीयवन्ह्यभाववद्ह्रदवारणाय प्रकृतपक्षनिवेशः तत्रैव जलत्वाभाववैशिष्ट्यवारणाय प्रकृतसाध्यनिवेशः प्रकृतहेतुकेत्यु-
पादानं चाग्निमताद्द्रनोर्घच्चनलाभार्थं अन्यथा प्रमेयादिहेतुकानुमितिमात्रायवन्हिव्याप्यप्रमेयवत्तापरामर्शविरोधिनी विन्हिव्यभिचारिप्रमेयादौपर्व-
तपक्षकवन्हिसाध्यकधूमहेतावतिव्याप्तिः स्यादिति न च पर्वतो वन्हिमान् धूमादित्यादौ विवक्षितावन्हिव्यापकीभूताभावप्रतियोगित्वे अतिव्याप्तिः नस्य

जलं हेतुत्वनाद्वारानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वादित्यत्रापि हेतुकांतोपादानमिति वाच्यं धूमलिंगकत्वाद्वारानुमितिं प्रत्यपि जलवत्ताज्ञानसहकारेण
तज्ज्ञानस्य प्रतिबंधकत्वेन तदुपादानस्याकिंचित्करत्वात् अजहत्स्वार्थेति जहत्स्वार्थेति न जहत्स्वः जहत्स्वोऽर्थो यस्याः सा अजहत्स्वार्थेति द्विलाः अजहत्स्वार्थेति वि
ग्रहः गंगायां घोष इत्यादौ स्वं गंगापदं तीररूपमर्थं जहत्स्तो अजहत्स्वसंतीररूपोऽर्थः स एवार्थो जहत्स्वार्थलक्षणा सा च प्रकृते गंगाप्रवाहनिरूपित संयोगसंबंधः संबं
धित्वं चार्थः स्वज्ञानज्ञाप्यत्वं बोध्यं परे तु गर्भबहुव्रीहे विग्रहघटकस्य स्वपदस्य लक्ष्यपरत्वात् एतो विषयत्वाभावार्थकत्वात् नञः प्रयोजकत्वं चार्थकत्वात् क्यार्थरूपा
न्यपदार्थविषयकत्वप्रयोजिके तिविग्रहार्थविपरीतः स्वप्रयुक्ताभावप्रतियोगि विषयताश्रयोऽर्थः ततो गर्भबहुव्रीहे स्याद्वाराविषयता क्रिर्प्रयीभूता क्रिया
र्थसंबंधित्वेन लक्षणाबोधः नञ्समासे च स्वप्रयुक्तविषयताश्रयत्वस्यार्थसंबंधित्वेन न बोधः संबंधो घटकत्वं रोक्यार्थस्य विशेष्यतया प्रवेशापत्तेः अज
हत्स्वार्थेति लक्षणं चेत्याहुः पर्वतो ह्रदो वा वह्निमानित्याद्यनुमितिं प्रति वह्निव्याप्यद्रव्यवत्तापरामर्शस्यापि कारणतया वह्निव्यभिचारिद्रव्यत्ववह्निव्याप्य
घटवत्तापरामर्शस्यापि कारणतया वह्निव्यभिचारिघटादेश्यता द्वारानुमितिनिष्ठकार्यतानिरूपकसंबंधीभूतता द्वारापरामर्शप्रतिबंधकीभूतपदा
र्थज्ञानविषयितासत्वात् अतिव्याप्तिरतः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकेति तथा च धूमपरामर्शलिंगकानुमितिप्रयोगत्वं धूमपरामर्शस्यैव न द्रव्या
दिपरामर्शस्येति न दोषः तत्साक्षात्कारजनकसाक्षात्कारे नितत्साक्षात्कारे अनुमितिनिष्ठकार्यता साक्षात्कारः अनुमितिः परामर्शरूपेति साक्षात्का
रे अनुमितिसाक्षात्कारः परासाक्षात्कारश्च हेतुः किंचित्प्रतियोगिकाकिंचिदनुयोगिकपदार्थसाक्षात्कारे तदुभयसाक्षात्कारकारणत्वस्य स
र्वसिद्धत्वेन संयोगादियत्कार्यता याअपि नपात्वात्तत्साक्षात्कारे परामर्शानुमित्युभयसाक्षात्कारस्य हेतुत्वात् संबंधिद्वयनिरूप्यपदार्थप्रत्यक्षं

प्रतिसंबंधिद्वयप्रसक्तस्य हेतुत्वमितिमिति सामान्यत एवोक्तं दीधितिकृता। तथापि अधिकरणत्वाधेयत्वसंयोगादिप्रसक्तत्वादिवत् विशिष्यैव कार्यतासाक्षात्कारत्वं कार्यतावच्छेदकं न
तु संबंधसाक्षात्कारत्वं समवायसाक्षात्कारे व्यभिचारात्। ननु परामर्शानुमितिसाक्षात्कारयोः कथं कार्यतासाक्षात्कारजनकत्वं संभवेत् क्रमेण जायमानपरामर्शानुमित्योरेकदा क्रमे
ण वा साक्षात्कारासंभवात् अनुमितिद्वितीयक्षणे परामर्शरूपविषयस्यैवासत्त्वादनुमित्युपरागेण कार्यतासाक्षात्कारसमयेऽनुमितेरपि नाशादिति चेत् अपेक्षाबुद्ध्यात्मकयोः परामर्शा
नुमित्योः साक्षात्कारसत्त्वाप्रसिद्धिः न च ज्ञानादीनां क्षणिकत्वे कारणमयोग्यविभुविशेषगुणानां स्वोत्तरसत्त्वविभुविशेषगुणनाश्यत्वनियमादपेक्षाबुद्धितृतीयक्षण एवोत्पत्तिः
स्वीकार्या तथा चोक्तानुपपत्तिर्दुर्वारैवेति वाच्यं अनुभवानुरोधेन ज्ञानादीनां तत्क्षणस्य नाशकत्वस्वीकृते अपेक्षाबुद्धिद्वितीयक्षणे विशेषगुणस्य नेरस्युपगमात् पेक्षताग्रथेभेदाचा
र्यैरेवमेवोक्तत्वादित्येकं मतं। घटादिरूपविषयस्य कार्यकालवृत्तितया कारणत्वनियमेऽपि ज्ञानस्थले नायं नियमः। तस्य तु स्वसमसक्षपूर्वकालवृत्तितयैव कारणत्वस्वीकारात् तथैवानुभवात्
तथा च परामर्शतृतीयक्षणे एकदैव परामर्शानुमित्योः साक्षात्कारः ततोऽनुमितौ कार्यतासाक्षात्कार इति न्यायः। अपेक्षाबुद्ध्यात्मके क्रमेण परामर्शानुमिती ततः परामर्शत्वानुमितित्वयोर्निर्विक
ल्पकं ततस्तयोः सविकल्पकं सविकल्पकोत्पत्तिसमये परामर्शस्य विनष्टत्वेऽपि तत्पूर्वक्षणे सत्त्वात् एवं कार्येऽपि। संबंधं वर्तमानं च गृह्यते चक्षुरादिनेत्यादौ साक्षात्कारे व्यवहितपूर्वक्षणे
संबद्धमिति स्वार्थ इति तार्किकोपघट्टस्यपरं मतं। वस्तुतस्तु परामर्शस्यानुमितिद्वितीयक्षणेऽपि साक्षात्कारसंभवात् तत एव कार्यतासाक्षात्कार इति न दोषः। ननु एतादृशविषयतासक
निरूपकत्वमनुमितिविशेष एव परामर्शविशेष एव च न सर्वत्रेति कथमुक्तरूपेण सकलपरामर्शादीनां लाभ इति चेन्न। तादृशकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छे
दकविषयतानिरूपकतावच्छेदकरूपावच्छिन्नत्वेन तात्पर्यात्। तादृशं च रूपमनुमितित्वपरामर्शत्वरूपमिति निखिलसंग्रहात्। निखिलसंग्रहस्यैव पर्यवेन शंकाया एवासंगतेश्च। अनुपपत्तिवन्हे
नुमितिः परामर्शकार्या इत्येवं शाब्दबुद्धिर्बाधाभावकार्येति योग्यताज्ञानकार्येति वा साक्षात्कारमादाय शाब्दबुद्धित्वरूपमादाय तत्प्रतिबंधकप्रमाविषयेव न्येभाववृत्त्यादेः इत्याप्तिरतो
जन्यतावच्छेदके निवेशः पर्वतो वह्निमानित्यनुमितौ कार्यतानुमितित्वप्रतिबंध्यतावच्छेदकविशिष्टशाब्दबुद्धित्वरूपलिंगपरामर्शस्य हेतुतया तथा च शाब्दबुद्धिमादाय बाधोऽव्याप्तिरतः

तादृशरूप२

८ ६(८) एतद्दोषस्य प्रकृतलक्षणक्षतिकरत्वाभावेनोद्भावनानर्हत्वात् भूतले घटवत्तद्घटयोरुभयवानिति ज्ञानयोरेकैकविशिष्टविषयकयोः संग्रहात्)६

साक्षात्कारत्वनिवेशः जनकतायां साक्षात्कारनिष्ठत्वेन निवेशस्य प्रयोजनाभावात् अनुमितिशाब्दबुध्योः समूहालंबनसाक्षात्कारमादाय तद्दोषवारणाय जनकतावच्छेदकत्वोपादानं
शाब्दबुद्ध्यनुमितित्वात्मकसाक्षात्कारसाधारणजनकतावच्छेदिकामनुमितित्वादिघटितत्वे विशेष्यितामादाय तद्दोष इति निरूपकतावच्छेदकरूपानुधावनं कार्यत्वं चाखंडो
पाधिते न तस्यातीन्द्रियपदार्थघटितत्वे विना साक्षात्कारानुपपत्तिः यत्तु अनुमितिः परामर्शकार्यं सलौकिकसाक्षात्कारे विशेषणतावच्छेदकप्रकारकनिर्णयमुद्रयाविशेष्यतावच्छे
दकप्रकारकनिर्णयमुद्रया च परामर्शत्वानुमितित्वनिर्णयापेक्षेति तन्न उक्तरीत्या कार्यतावच्छेदकप्रवेशस्यावश्यकतया यादृशविशिष्टवैशिष्ट्यबुद्धित्वं विशेषणज्ञानकार्यताव
च्छेदकं ततो ऽन्यस्यैव तस्य विशेष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदकतया तत्कोपादाने ऽपरासंग्रहापातात् जगदीशस्तु उभयसाधारणविषयतावच्छेदकविशिष्टविष
यकनिर्णयत्वं जन्यतावच्छेदकमाहेति तन्मते पि प्रकृते न गतिरिति यत्त्वनुमितिनिष्ठसाधर्म्यकरणार्थं समूहालंबनानुमितिमादाय सर्वत्र लक्षणासंगतेः अन्यथा तादृशानुमितिमादायाति
व्याप्तेरवतारकत्वसंगतेः तथापि प्रथमं समूहालंबनास्फूर्तेति थाव्रतमिति ध्येयं। अनुमितिनिष्ठकार्यतेत्यादिकल्पपरिष्कारबीजमाह त्रेति। ननु तादृशानुमितित्वव्यापककार्यतानिवेशा
द्वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शकार्यतामादाय न दोषः अथाप्रामाण्यज्ञानानास्कंदिततल्लिंगकपरामर्शविशिष्टानुमितिं प्रत्येवाप्रामाण्यज्ञानाभावविशिष्टतल्लिंगकपरामर्शत्वेन
हेतुतया ऽप्रामाण्यज्ञानास्कंदिततद्धेतुकपरामर्शस्थलीयतत्सपक्षकतत्साध्यकानुमितौ व्यापकताभंगात् संभवतीति चेत् अप्रामाण्यज्ञानानास्कंदितत्वघटिततद्धेतुकत्वस्यैव व्याप्यता
वच्छेदककोटौ निवेश्यत्वात् न च केवलतद्धेतुकत्वघटितताद्दृशानुमितित्वव्याप्यकार्यतानिवेशः संभवति। घटादावनुमितिसाधारणतादृशधूमपरामर्शविशिष्टत्वावच्छिन्नकार्यतायास्ता
दृशानुमितिमात्रवृत्तित्वासिद्धेः ... यादृशाव्यभिचारिण्याप्रामाण्यज्ञानानास्कंदितएवपरामर्शस्तादृशस्थलीयव्यभिचारे ऽतिव्याप्तिरिति तु नेशंक्यं तादृशस्थलेऽमानाभावात् ऽहरन्तेति।
तथाविधग्रहत्वव्यापकप्रतिबध्यतेति। तादृशकार्यतासाक्षात्कारत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकविषयिताव्यापकप्रतिबध्यतेत्यर्थः एतेन तादृशसाक्षात्कारमात्रविषय
त्वव्यापकत्वनिवेशे तादृशसाक्षात्कारविषयताधाः श्याश्रयासिध्यादिस्थलीयानुमितिपरामर्शविषये पर्वतादावपि सत्त्वेन तत्राश्रयासिद्धिज्ञाननिरूपितप्रतिबध्यताया व्यापकत्वाभाव

८

अनुमितौ तान्दृशे साक्षात्कारे वा ३

नाश्रयासिद्ध्यादावसंभवो दुर्वारः तादृशसाक्षात्कारविषयग्रहत्वव्यापकत्वनिवेशेन तद्वारणेऽपि मणिमयज्ञानं काञ्चनमयज्ञानं वेत्यादौ तादृशानुमितिसाक्षात्कारविषयत्व
स्य मणिमयकाञ्चनमयत्वाद्यानादौ सत्त्वेन तादृशाश्रयासिद्धिप्रतिबध्यतायाः तद्व्यापकत्वाभावेन तत्तल्लक्षणासमन्वयासंभवात् एवं काञ्चनमयः पर्वतः काञ्चनमयवह्निमानित्यादौ यत्र काञ्चे
३ त नमयपर्वतत्वेन पर्वतानं विशेष्यतया काञ्चनमयवह्नित्वेन वह्नित्वानं प्रकारतयावगाहमानं तत्र तादृशानुमित्यादिविषयेऽपि तादृशसाक्षात्कारविषयग्रहत्वसत्त्वेन निरुक्तप्रतिबध्य
त्वासत्त्वेन व्यापकताभंगः एवं यदि यत्र पक्षतावच्छेदकादिरूपेण ज्ञानविषयित्वाश्रमानुमितिर्न कस्यापि जाता तादृशस्थलविशेषबहुलक्षणासमन्वयपरोऽयं ग्रन्थ इ
च्यते तत्र उभयविरोधिपक्षाप्रसिद्ध्यादावच्छेदकावच्छेदेन विधेयान्वयानुपपत्तिः एवं वह्निव्याप्यधूमवत्पर्वतत्वघटवद्भूतलत्वे च जानामीत्यादिरूपिकार्यतासाक्षात्कारजनकतया तद्विष
यकग्रहत्वस्य घटवद्भूतलादिग्रहसाधारणतया घटाभाववद्भूतलादावतिव्याप्तिरिति प्रसुक्तविषयतासंबन्धेन तादृशकारणतावच्छेदिकायाः विषयतायाः अनुमितिपरामर्श
योरेव सत्त्वात् मणिमयं ज्ञानमित्यादौ मणिमयज्ञाननिष्ठविषयितायाः जनकतावच्छेदकत्वाभावात् मणिमयघटज्ञानत्वादिपक्षतायां ज्ञाननिष्ठघटादिनिष्ठविषयितायाः अवच्छे
दकतासंबन्धेन अवच्छेदकत्वेऽपि विषयतासंबन्धावच्छिन्नतदभावान्न दोषः मणिमयघटवद्भूतलज्ञानत्वादिना पक्षतायां घटाभाववद्भूतलरूपाश्रयासिद्धौ लक्षणासमन्वय इष्टः
अत्रेदमवधेयं तादृशकार्यताविषयकसाक्षात्कारत्वावच्छिन्नजनकतावच्छेदकविषयितावच्छिन्नप्रतिबध्यतेयमवेरूपा तथा सति बाधादौ व्यभिचारादौ चाव्याप्यभावात् न च ह
दो जलं वा वह्निमानित्यादौ घटत्वत्तिरूपे घटत्वं जलं वा वह्निमानित्यादौ घटत्वत्तिरूपे घटत्वं जलं वा नित्यापत्तेः तथापि धर्मविशिष्टविषयितासामान्यावच्छिन्नत्वनि
वेशात् इति। अथ स्वावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकत्वान्यतरसंबन्धेन प्रकृतपक्षसाध्यलिंगकानुमितित्वावच्छिन्नकार्यत्वोपलक्षितं यद्विषयि
त्वं तदवच्छिन्नप्रतिबध्यतेति केचन निवेशान्नाधादावतिव्याप्तिः उपलक्षणतया कार्यताया निवेशान्न प्रतिबध्यतानवच्छेदकत्वेऽप्यसंभवः अत्र केचित् वह्निव्याप्य
धूमवत्पर्वतवानयं देश इति परामर्शस्याप्यनुमितिकारणतया तत्प्रतिबन्धकयथार्थज्ञानविषये पर्वताभाववद्देशेऽतिव्याप्तिः न च हेतुतावच्छेदकसंबन्धावच्छिन्नाधेय

तासंबंधानवच्छिन्नप्रत्यक्षप्रकारितान्यत्वमात्रं वा विषयितामां निवेश्यं न तथा यिता घटात्पर्वते घटवृत्तित्वानभ्युपगमदोषात्। पक्षमुख्यविशेष्यक एव परामर्शो इत्यपक्षेपि
धूमव्यापकवह्निमद्वृत्तिकांचनमयधूमवान्पर्वत इति ज्ञानविरोधिनि कांचनमयत्वाभाववद्धूमे। तिआ प्रसिद्धिरिति। न च स्वावच्छेदकतावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकतावच्छे
दकत्वान्यतरसंबंधेन कार्यताविशिष्टरूपविशिष्टविषयितावच्छिन्नप्रतिबध्यतानिवेशो युज्यते। यतो विधेयतात्वघटितरूपमेव कार्यतावच्छेदकतावच्छेदकं प्रतिबध्यतावच्छेदक
तावच्छेदकं तु विषयितात्वघटितमिति तदसत्त्वात् स्वावच्छेदकविषयितावच्छिन्नत्वस्वनिरूपितकारणतावच्छेदकतावच्छेदकरूपविशिष्टविषयितावच्छिन्नत्वान्यतरसंबंधेन का
र्यताविशिष्टप्रतिबध्यतोपादेया धूमव्यापकवह्निसमानाधिकरणकांचनमयधूमवान्पर्वतः वह्निव्याप्यधूमवान्पर्वतो घटवानित्यादौ कांचनमयत्वावच्छिन्नधूमवि
शेष्यतात्वं घटावच्छिन्नपर्वतविशेष्यतात्वं च जनकतावच्छेदकघटकमिति दोषः। हेतुविषयितानिरूपितनव्यभिचाराद्यप्रकारितात्वं जनकताप्रतिबध्यतावच्छेदकता
वच्छेदकं इति नाव्याप्तिः कांचनमयपर्वतकालीनपर्वतादेः पक्षत्वेऽदेयतावच्छेदकताघटितस्यैव जनकतावच्छेदकतावच्छेदकत्वेपि प्रथमसंबंधघटनादेव नाव्याप्तिः स्वविष
यकत्वानप्रतिबध्यतानवच्छेदकविषयिताशून्यो यः व्यहस्तदीयत्वं वा विषयितायां निवेश्यं न तथापि धर्मविषयितान्यविषयितानवच्छिन्नाया प्रतिबध्यतोपादेयाभ इाचार्यम
ते विषयितयोर्नाभेदः किं त्ववच्छेद्यावच्छेदकभावः इत्यदोषो वेति वस्तुतस्तु परामर्शाप्रसहितोत्तरत्वस्य कार्यतावच्छेदकत्वे पक्षादिविषयितायाः कार्यतावच्छेदककोटौ प्रयोज
नाभावेनानिवेशनात् तदवच्छिन्नकार्यताया अप्रसिध्या असंभवः एतेन प्रकृतानुमितित्वावच्छिन्नकार्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरू
पकतावच्छेदकधर्मवत्त्वमर्थः स च धर्मः प्रकृतपक्षसाध्यकानुमितित्वं तादृशप्रकृतपरामर्शत्वं च एवं च तादृशधर्मघटकविषयितावच्छिन्नायास्तादृशायाः किंचिद्
र्मव्यापिकाया प्रतिबध्यतायाः निवेशनान्नादोष इत्यपास्तं एवं प्रकृतपरामर्शजन्यतावच्छेदककोटिप्रविष्टविषयितावच्छिन्नप्रतिबध्यतानिवेशेनैवोपपत्तौ समूहालंब

नानुमितिरनुभावनं अर्थं इति व्याप्य धूमवद्धूमादिपरामर्शविशिष्टरूपपक्षकवह्निसाध्यकानुमितित्वस्यैव तादृशपरामर्शजन्यतावच्छेदकतया साध्यवत्पक्षस्यैव साध्यव्याप्य
हेतुमत्पक्षस्यापि विषयिता याः अपि जन्यतावच्छेदकतया सर्वत्रापि तत्प्रकारकत्वे पौर्वापर्य अव्यवहितोत्तरत्वसंबंधेन परामर्शविशिष्टत्वस्यासंभवात् संयोगादिसाधारण्यादनुमितित्वे
निवेशाय रूपकत्वेऽपि विषयविषयिभावितानिवेशे प्रयोजनाभाव इति व्यापकताव्याप्यपरामर्शस्य विशेषसामग्रीत्वरक्षणाय विषयनिवेशस्यावश्यकत्वादिति न परासंभवः
कार्यमते परामर्शस्य विशेषसामग्रीत्वाभावेन विशेषनिवेशस्यानुपयुक्तत्वात् पक्षधर्मसाध्यकस्थले एकेनैव लिंगेनानुमितिः तत्र प्रयोजनाभावेन परामर्शाव्यवहितोत्तरत्व
स्यापि कार्यतावच्छेदककोटौ निवेशेन व्यभिचारापत्त्या पेक्षया शास्त्रियत्वादावेवेति काञ्चनमयः पर्वतो वह्निमानिति साध्ये काञ्चनमयत्वाभावे सर्वत्र काञ्चनमयत्वस्य
र्वतो दृष्टानुमितौ काञ्चनमयत्ववत्पर्वतविशेष्यकपरामर्शीयविशेषितेन प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधिमहत्त्वव्यापकत्वप्रतियोगितानिरूपितप्रतियोगिकत्वे
कालिकत्वात्तद्विषयेल क्षणसमन्वयः सर्वः न च व्याप्तिज्ञानेऽपि तादृशकार्यतानिरूपकसंबंधिमहत्त्वसत्त्वेन तत्र प्रतिबन्धकताविरहात्कथमेतदिति वाच्यं एतेन्नमते
व्याप्तिज्ञानादेरनुमितिकारणतावच्छेदकोऽप्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधिमहत्त्वव्यापकत्वं न प्रवेश्यते किं तु प्रकृत परामर्शाव्यवहितोत्तरक्षणे सत्तिकत्वे
विशिष्टानुमितित्वावच्छिन्नकार्यतासाध्याकारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतोविशिष्टमहत्त्वव्यापकत्वमेव प्रावेश्यते साध्याभास एव नायं नरति पर्वतो व
ह्निमान् हृदश्च तथेति समूहालम्बनानुमितिनिष्ठवह्निविशिष्टहृदानुमितित्वावच्छिन्नकार्यताया: प्रकृतपरामर्शाव्यवहितोत्तरानुमितित्वावच्छिन्नत्वात् अत्र काञ्चनमयः पर्व
तो वह्निमान् हृदश्चेति समूहालम्बनमादाय व्यापकप्रतिबध्यताप्रसिद्धिः पक्षासिध्यादावव्याप्तिवारणाय कार्यतानि छत्तांतविशाय प्रकृतपरामर्शा[illegible]व्यवहि
तोत्तरानुमितित्वावच्छिन्नत्वनिवेशः हृदो वह्निमानित्यत्रापि समूहालम्बनात्मकसाक्षात्कारनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयिताश्रयसत्तेन व्यापकत्वे भ्रम
प्रतितादृशसाक्षात्कारत्वावच्छिन्नत्वं जन्यतायामनुपात्तं तथापि जन्यतानिरूपितजनकताश्रयानिरूपितविषयताविशिष्टमहत्त्वव्यापकत्वात् तयोः कारणीभूतसमूहालम्बनस्या

(काञ्चनमयपर्वतहृदं जनक [illegible] ममणिदानवद् काञ्चनमयं वर्तते)

२४

(२ अवच्छेदकताभिन्ने =) २ एकमात्रलिंगकव्यक्तिना तादृशभिन्नाप: =

११ साक्षात्कारमादाय व्यापकत्वभंग इति तादृशजनकतावच्छेदकविषयितोपादानं तादृशप्रतिबध्यतायां निरुक्तविषयताव्यापकत्वनिवेशे कांचनमयः पर्वतो वह्निमानित्यनुमिति
साक्षात्कारीयविषयितायाः वह्निपर्वतादिव्यक्तित्वेन पक्षताप्रसिद्धिज्ञाननिरूपितप्रतिबध्यतायां व्यापकत्वभंगस्य तत्तथाविधविषयताविशिष्टग्रहत्वनिवेशः न चैवं कां
चनमयघटज्ञानं गुणोज्ञानत्वादित्यादौ पक्षीभूतघटज्ञाने निरुक्तविषयताविशिष्टग्रहत्वसत्त्वेन पक्षताप्रसिद्धिग्रहप्रतिबध्यतासत्त्वेन च तत्र व्यापकत्वभंग इति तत्र पक्षाप्र
सिध्यादावव्याप्तिरिति वाच्यं निरुक्तजनकतावच्छेदकमुख्यप्रकारतात्मकविषयताव्यापकप्रतिबध्यताया विवक्षितत्वात् एतादृशार्थलाभायैव लक्षणे ग्रहत्वनिवेशः
सिद्धेः परं तु यादृशस्थले कार्यतासाक्षात्कारो नैव जातः तादृशस्थले तद्घटितलक्षणं यथासंभवं यात्यमिति बोध्यं । ननु अनुमितिपदस्यानुमितिनिष्ठसाध्यविधेयमप्य
नतिं प्रयोजनं अनुमितिप्रयोजकीभूताभावे साध्यसम्पर्कात् अनुमितिपदं प्रकृतानुमितिपरं प्रयोजकत्वं च कारणसाधारणं बाधव्यभिचारज्ञानाभावादेः प्रयोज
कत्वेन लक्षणसमन्वयः यथार्थज्ञाननिष्ठाया अनुमितिप्रयोजकतावच्छेदकतानतिरिक्तविषयताश्रयत्वमर्थः न चैवं व्याप्तिमान् सेतद्धूमकपदार्थमानसे वा विशेषण
ज्ञानघटितत्वेऽपि किं प्रसक्तसामग्र्यभावस्य हेतुतयानुमितिप्रयोजकत्वेन ज्ञानवैशिष्ट्यानवच्छिन्नतत्प्रतियोगिताश्रयविशेषणज्ञानविषयपदार्थवत्तिव्याप्तिरिति वाच्यं ।
प्रतियोगितायां सन्निकर्षवैशिष्ट्यानवच्छिन्नत्वनिवेशात् सामान्यकारणीभूतविशेषणज्ञानानिवेशात् अर्पितावच्छेदकज्ञानवैशिष्ट्यावच्छिन्नायाः प्रतियोगितायाः पदज्ञाने
सत्त्वेन ज्ञानवैशिष्ट्यानवच्छिन्नत्वेनानुधारतानैति । मेवं व्यभिचारज्ञानाभावद्वारोपाधिज्ञानाभावस्यापि प्रयोजकत्वेनोपाध्यातिव्याप्तेः कारणतत्कारणमात्रव्यक्ति प्रयोजकत्वविशे
षमानाभावात् केचित्तु व्यक्तिसंयोगेन तादृशत्वे व्याप्यपक्षधर्मताज्ञानाभावविशिष्टकपिसंयोगाभाववत्ताज्ञानस्याविशेषिततया कपिसंयोगाभाववद्विशिष्टपक्षविषयतायास्त
द्रूपत्वेवच्छेदकत्वसत्त्वेन तादृशव्यक्तेरतिव्याप्तिमाहुः तन्न कारणतानिवेशेप्यतद्दोषसत्त्वात् विषयातिरेकतत्तद्द्वारे तु अत्र्यापितद्दोषप्रयोजकत्वात् । ननु प्रकृतानुमितित ११

तथाविधपत्र्याप्तित्वेन

कारणान्यतरविरोधित्वमेव दोषलक्षणमस्तु किमनुमितिपदार्थकरणेनेति चेन्न पर्वतो वह्निमान् धूमादित्यादौ समूहालंबनानुमितिमादायातिव्याप्तेः। तादृशान्यत
रत्वव्यापकप्रतिबध्यतानिवेशेऽनुपक्षासिध्यादावेव लक्षणगमनमिति तथा चेति । न च वह्निव्याप्यधूमवान् पर्वत इति व्याप्तिः तस्य हेतुमत्त्वग्रहविरोधित्वेनासि
ध्यनात्मकत्वादिति वाच्यं । मधुरानाथेनासिद्धिग्रंथे व्याप्यत्वासिद्धित्वेन तदुक्तत्वोक्तेः । अत एव पक्षः साध्यवान् साध्यव्याप्यो हेतुः पक्षश्च हेतुमानिति समूहाल
बनानुमितिर्न निवेशिता। आचार्यमतावलंबिनामनिस्तारात् अयं तु दर्शितसमूहालंबनानुमितेस्तथ्याक्तित्वे नैव निवेशो युक्तः व्यापकत्वानिवेशेन लाघवा
त्। अनुकूलस्थलीयसाध्य[illegible] तद्व्याप्तिविशिष्टपक्षानवगाहि निष्टतथ्याक्तित्वनिवेशेन प्रयोजनाभावादिति चेन्न । अनाहार्यमानसज्ञानानिवेशे सलक्षणाकार
णापत्तेः अनुमितित्वाद्यनुपस्थितावपि तथ्याक्तित्वेन तथ्याक्तित्वाद्यनुपस्थितावपि लक्षणाग्रहस्येष्टत्वात् । वस्तुतस्तु लक्षणस्य लक्षणान्तरादूषकत्वेन
तद्घटितलक्षणमपेक्ष्य तस्य निर्व्यापकरूपघटितलक्षणस्योपजीव्यत्वेन न च तादृशलक्षणमुक्तं तदुपजीव्यत्वे नैव लक्षणगौरवस्यादोषत्वा
दिति । तादृशानुमितित्वव्यापकप्रतिबध्यत्वतादृशपरामर्शत्वव्यापकप्रतिबध्यत्वान्यतरप्रतिबंधकतानिवेशे तु धाव्यापकत्वनिवेशे गौरवं बाधादि
षयविशेषसमूहालंबनानुमित्यप्रसिद्धेः तत्र च द्वेधा तन्निर्णयेन सर्वलक्षणभेदस्य सत्त्वात् अपासिद्धवह्न्यसिद्धलक्ष्ये प्रकृतपक्षाप्रवेशो द्रव्यत्वा
दिनेति द्वितीयदले पक्षतावच्छेदकाप्रवेशो दृष्टव्यं अतएव स्वीति अत्रावच्छेदकावच्छेदेन वह्निसाधनस्थले सामानाधिकरण्येन साध्याभावस्येव दो
षत्वात् तत्र सुरूपपर्वतत्वावच्छेदेन वह्न्यनुमितिविरोधित्वेपि सामानाधिकरण्येन तत्साधनस्थलेऽवच्छेदकावच्छेदेन साध्याभावस्येव हेत्वाभा
सः

वस्यैव चातथात्वेन तत्राव्याप्तिवारणाय पर्याप्त्युक्तानमित्सर्थः तेजस्वी पर्वतस्तुन पक्षः अवच्छेदकावच्छेदेन वन्ह्यभावस्याप्रसिद्धत्वात् सामानाधिकरण्येन वन्ह्यभावस्याविरो-
धित्वात् न च तदवच्छेदेन वन्हिसाधनमुद्देश्यं शुद्धपर्वतत्वावच्छेदेन वन्हिमत्ताग्रहं प्रत्यपि तादृशबाधस्य विरोधित्वमापर्याप्तिनिवेशानर्थक्यापातात् तत्सामानाधिकरण्येन
वन्ह्यनुमितेरप्रकृतत्वादिति बाध्यमेति। स्वरूपासिद्धेरप्युपलक्षणं व्यापकाभाववधीतिमोप्याभाववद्रूपं भावात् कांचनमयश्रुति न तेजस्वी पर्वतदृष्टान्तादेव पक्षाप्रसिद्धिसंभवे
नकांचनमयः पर्वतो वन्हिमानित्यादिदृष्टान्तं तत्र पक्षदर्शनमयुक्तं इति वाच्यं। तत्र पर्वतत्वसामानाधिकरण्येन तेजः सामान्याभावस्य पक्षविशेषणत्वेन पक्षाप्रसिद्धिः पर्वतत्वावच्छेदेन
तद्विशेषणत्वे तत्संभवेपि वन्ह्यभावविशिष्टस्य पर्वतत्वे व्यापकत्वविशिष्टस्वरूपसंबंधेन तेजः सामान्याभावविशिष्टपक्षस्याप्रसिध्या बाधासंभवात् न च तत्र पर्वतत्वसामानाधि-
करण्येन तेजः सामान्याभावविशिष्टवन्ह्यभावे विशिष्ट एव बाध इति वाच्यं प्रतिबध्यबुद्धिसमानधर्मितावच्छेदकके बाधबुद्धेरेव प्रतिबंधकत्वमिति न्यायेन केवलस्वरूपसंबंध-
घटितो तत्र बाधबुद्धेः पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधघटिततादृशवन्हिमत्ताबुद्धिं प्रत्यप्रतिबंधकतया तस्य बाधत्वासंभवात् केवलस्वरूपसंबंधेन तेजः सामान्याभाव-
विशिष्टपर्वतत्वस्य विशिष्टस्वरूपसंबंधेन तद्विशिष्टपर्वतत्वाद्यन्यतमवत्त्वस्तु प्रतिबध्यतावच्छेदककोटौ धर्मितावच्छेदकतापर्याप्तिसंसर्गतापर्याप्तेरपि परिस्सज-
नीयतयाऽधिकं स्थितमिति न्यायेन पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधेन तेजः सामान्याभावविशिष्टपर्वतत्वधर्मितावच्छेदककबुद्धेर्न केवलस्वरूपसंबंधेन तद्विशिष्टपर्वत-
त्वधर्मितावच्छेदकके च हानिरिति निरुक्तबुद्धिद्वयस्य समानधर्मितावच्छेदककत्वमक्षतमिति पक्षाप्रसिद्धेः स्फुटतरत्वात् मायमेवतथाभिधानमिति बोध्यं। अत्र च पक्षतावच्छेद-
कत्वेन विशिष्टपक्षतावच्छेदकतापर्याप्त्यधिकरणानि वेत्यं एतेसर्याप्त्यनिवेशोप्यतद्दोषानुद्धारात्। एवं साध्यतावच्छेदके साध्यावधि एवमन्येपीति साध्यतावच्छेदके हेतुता-
वच्छेदके च प्रकारतावच्छेदकतापर्याप्तिनिवेशाद्दस्यर्थः तेन पर्वतो महानसीयवन्हिमानित्यादौ महानसीयवन्ह्यभाववत्पर्वतरूपबाधस्य शुद्धसाध्यतावच्छेदकावच्छिन्नग्रहावि-
रोधित्वेपि कांचनमयधूमादिहेतुके साधनाप्रसिद्धिः शुद्धहेतुतावच्छेदकावच्छिन्नग्रहाविरोधित्वेपि महानसीयधूमाभाववत्पर्वतरूपस्वरूपासिद्धेः शुद्धहेतुतावच्छेदकावच्छिन्न-
हेतुमत्ताग्रहाविरोधित्वेपि चन्नासंग्रहः। एतल्लक्षणे साध्याव्यभिचरितत्वसहितसाध्यसामानाधिकरण्यमन्वयव्याप्तिः। एवं च प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणस्यैव

प्रतियोगिविषयतावच्छेदकतापर्याप्त्यधिकरणत्वे महानसीयवह्निमान् धूमादित्यादौ महानसीयवह्न्यभाववद्वृत्तिधूमस्य शुद्धवह्नित्वावच्छिन्नाभाववद्वृत्तित्वरूपव्याप्तिग्रहाविरोधित्वेऽपि प्रयो
जनाभावेन निवेश्यतावच्छेदकतापर्याप्तिर्न प्रवेश्या साध्यतावच्छेदके प्रतियोगितावच्छेदकतापर्याप्तिनिवेशस्य व्यावर्तकत्वात् यदि च वस्तुतो महानसीयवह्नित्वादिकं तु पर्याप्त्यवच्छेदकताघटितत्वे
ऽनाव्यभिचारघटकाभावांशे शुद्धधर्मितत्वमानोऽप्रामाणिकः स्यात्सामेवं नास्तीत्यादितो विशेषमन्यः वस्तुतो प्रतियोगितावच्छेदकतापर्याप्त्यवगाहित्वेन वृत्त प्रतियोगिविषयतावच्छे
दकतानिरूपकत्वेन लाघवः एवं विशिष्टसत्ताभावादिसाधौ विरोधसंग्रहाय विषयतावच्छेदकतापर्याप्तिनिवेशानामावश्यकत्वं अन्यथा गुणे गुणान्यत्वविशिष्टसत्ताभावाभिन्ना[?] हि प्रस
पकारणस्याधिकरणत्वे विशेष्यपारत्वे मेघे विशेषणस्य भानपक्षे साध्यवन्निरूपकतावच्छेदकतापर्याप्तिनिवेशो वा केवलसत्तात्वघटितत्साहचर्यात् प्रतिविरोधस्याविरोधितो दृढं गृहो
यदि वस्तुतो विशिष्टसत्तावच्छिन्ननिरूपकताघटितसंबंधेन शुद्धसत्तावच्छिन्नग्रहः प्रामाणिकः यदि वा जातिसाध्यतावच्छेदकत्वे नैव साध्यतावच्छेदकतापर्याप्त्यधिकरणं विशि
ष्टमेवैतत् तेन तापर्याप्तिघटितत्वान्निवेशनाभात् विषयतावच्छेदकतापर्याप्तिनिवेशप्राप्तवंशो विरोधीति व्यापकतामात्रानाधिकरणरूपव्याप्तिनिवेशमते व पक्षो हेतुव्यापकसा
ध्यानां साध्याव्यभिचारिहेतुमत्त्वेनैव निवेशो विरोधेऽव्याप्तिः नेह हेतौ हेतुव्यापकसाध्यकत्वनिवेशे विरोधसंग्रहभये नञोऽन्यपदार्थत्वमासामानाधिकरण्यनिवेशात् सम्भवात् समा
नकालीनत्वादिविशेषेऽपि साध्यासमानकालीनहेतावतिव्याप्तेः व्यतिरेकव्याप्तेरव्याप्तेः एवं कूटमात्रत्वेपि निवेशावश्यकः अन्यथा तथैव व्यावृत्ताभावासिद्धावनुपसंहार
तानुपपत्तेः साध्यनेति स्वरूपत्सिसाध्यतावच्छेदकावच्छिन्नप्रतियोगितानिरूपितत्वनिवेशेऽपि सर्वः द्रव्याभावस्यापि धूमत्ववान् यस्तत्प्रतियोगितासंबंधेन तद्वत्त्वात् जनक
तावच्छेदकप्रकारतात्वेनेति प्रकृतहेतुकप्रकृतसाध्यकानुमितिजनकतावच्छेदकप्रकारतानिरूपितप्रकृतपक्षविशेष्यताकसाध्यप्रकारकपक्षविशेष्यकानुमितिनिवेशाभावा
द्वाप्यसंग्रहः साधनाप्रसिद्धिः एकैकावचननमय धूमत्वावच्छिन्नप्रकारताया एव जनकतावच्छेदकत्वाद्वैयर्थ्यात् हेतुतावच्छेदकावच्छिन्नत्वनिवेशः तादृशेति जनकत्वपूर्वमपसत्तावच्छे
दकावच्छिन्नत्वेनाप्रसिद्धेः [illegible] पूर्वं हेतुप्रकारतापक्षविशेष्यतयोर्निरूप्यनिरूपकभावाप्रदर्शनेन तदनिवेशे दोषप्रदर्शितद्वानीं तत्प्रदर्शनाभावोन्नत्वापि
ननु हेतुनिष्ठप्रकारत्वपक्षनिष्ठविशेष्यत्वयोरेव निरूप्यनिरूपकभावेन निवेशो नैव निर्वाहे किं हेतुतावच्छेदकावच्छिन्नत्वनिवेशेन सत्य आह पक्षेत्यादि इति साध्यहेतुप्रकारता

साधारण्यादेरिति नचानियमात् किंचित्सत्प्रकारतानिवेशो वह्निव्याप्यकांचनमयधूमप्रकारतामादाय कांचनमयत्वाभाववद्धूमात्कादव्याप्तिः
द्व्यणुकादिनेति किंचिद्धर्मावच्छिन्नप्रकारतापारानेपि एवं कुव्याप्तिपर्मितावच्छेदकतया हेतुतावच्छेदकस्यानिवेशे हेतुतावच्छेदकनिवेशो व्याहत्साधारण्येति

१२

न२

ताथां साध्यताहेतुताघटकसंबंधावच्छिन्नत्वं पक्षतावच्छेदकनिष्ठावच्छेदकतादौ तत्तदवच्छेदकसंबंधावच्छिन्नत्वं निवेश्यं प्रयोजनं तु स्वयं। ज्ञानसौकर्याद्याहार्यत्वेन च पक्षतावच्छेदक
त्वादेरवच्छेदकतापर्याप्त्यधिकरणतादेर्वन्ह्यभाववान् रूपादेर्वन्ह्यभाववान्निसाधारणार्थं सुरासे किमनुमितिसंनिवेशनेनेति वाच्यं पर्याप्तेः प्रामाणिकतया पक्षतावच्छेदकताया
पेक्षावच्छेदकताकत्वं वाच्यमिति तन्निवेशासिद्धेः एवं च साध्यतावच्छेदकताव्यापकावच्छेदकताकत्वमेव निवेश्यमिति वक्तव्यं तत्तु पर्याप्तेः प्रामाणिकत्वे विरुद्धो वह्निमान् वह्नित्व
मित्यादिविवक्षितव्याप्यप्रदर्शनं वाच्यं सामान्याधिकरण्यमेव तन्निवेशफलं व्याप्तिघटकतावच्छेदकाधिकरणतादिना पदार्थान्तरसामानाधिकरण्यमेव निरूप्यनिरूपकभावापन्नव्याप्ति
विषयतायाश्च कथं निवेश्यतया कथंचित्तत्सर्वाप्युपगमे निष्प्रयोजनं तत्र भावनानिवेशात् एतेन व्याप्तिपर्याप्तविषयताकत्वं न लिंगविषयतायाः लिंगतावच्छेदकेपि
सत्त्वात् आप्तिलिंगतावच्छेदकोभयपर्याप्तविषयताकत्वमेकत्र द्वयमिति रीत्या तदुभयविषयकेप्यतः तदुभयपर्याप्तविषयतानिरूपितलिंगतावच्छेदकावच्छिन्नविषयता
कत्वं वाच्यमिति प्रसुक्तौ कामिनीजिज्ञासादिनिष्ठप्रतिबंधकतावारणाय ज्ञानपदं ननु सिद्धिविषये साध्यवत्पक्षे इति व्याप्तिरिति चेदत्र लक्षणे सकल [illegible] ज्ञानावं
श्यकत्वाद्धेत्वधा हेतुसमानाधिकरणाभावप्रतियोगिसाध्यादिरूपव्यभिचाराघव्याप्तेरनुकारेण न्यूनतापातात् वक्ष्यमाणं वा साध्यवत्पक्षविषयतात्वेन प्रतिबं
धकतावच्छेदकविषयतायां देयं ननु साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिसाध्यतावच्छे
दकावच्छिन्ननिरूपितव्याप्तिद्वयविशिष्टहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसंबंधावच्छिन्ननिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशाल्यनुमितिसाध्यापकप्रतिबध्य
तानिरूपितयथार्थज्ञाननिष्ठप्रतिबंधकतावच्छेदकविषयताशालित्वं प्रथमदोषलक्षणं वाक्यार्थः अवच्छेदकतापर्याप्तितदवच्छेदकसंबंधनिवेशनेन च कार्यं ज्ञानं च
पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयत्वव्यवसायेऽतिव्याप्तिः न तज्ज्ञानस्य पाषाणमयो न वह्निमानिति ज्ञानविशिष्टत्वेन प्रकृतानुमितिप्रतिबंधकत्वात् ह्रदो धूमादि
नाथन्यादिसाधने वन्ह्यभाववज्जलादिमद्धृदे जलवद्ध्रदादावतिव्याप्तिः न च प्रतिबंधकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वं देयं तथा सत्साधारण्यादव्याप्तेः तज्ज्ञानस्य

प्रकारता४ (विशेष्यता)५ १३

हेतुमत्ताज्ञानादिविशिष्टत्वेनैव प्रतिबंधकत्वात् ।। एवं ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वं सत्प्रतिपक्षविषयितानवच्छिन्नत्वं तत्त्रितयाभावस्य प्रतिबंधक-
तायां निवेशात् ज्ञानवैशिष्ट्यपदं च वैशिष्ट्यमेकसंबंधावच्छिन्नैकत्वमचितं ज्ञानपदं च स्वरूपकीर्तनं अप्रामाण्यज्ञानाभावस्य सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगि-
ताकस्य स्वरूपसंबंधेनैवावच्छेदकतया तदुपादाने संभवान्न वक्तव्यं । स्वसमवायसंबंधावच्छिन्नो स्वविशेष्यकाप्रामाण्यज्ञानाभावस्य सामानाधिकरण्यसंबंधेन प्रतिबंधकताव-
च्छेदकत्वमुपगम्य वा समवायसंबंधेन प्रथमाधिकरणतासंकोरकं तत्र कपिसंयोग्येतत्त्वादित्याद्यव्याप्त्यङ्गीकृत्य ज्ञानाभावविशिष्टसंयोगाभावेनासाधने विरोधितया विरोधि-
विषयेऽतिव्याप्तिरिति तु न सम्यक् तादृशप्रतिबंधकत्वे मानाभावात् यदि च समवायावच्छिन्नाधिकरणत्वमाने वैशिष्ट्यं न दोषः प्रतिबंधकत्वेऽपि न प्रतिबन्धकतेति बोध्यं । ज्ञानवैशिष्ट्यानिष्ठ-
मवच्छेदकत्वं स्वरूपसंबंधावच्छिन्नं गृहीतुपादानेन ज्ञानवैशिष्ट्यानवच्छिन्नत्वं न ज्ञानविशिष्टविषयितावच्छिन्नत्वं समवायरूपज्ञानीयवैशिष्ट्यानवच्छिन्नत्वं वा आसाज्ञानाभाववति
साध्ये ज्ञानवद्दोषादिरूपबाधाव्याप्तेः ज्ञानविशिष्टसाध्यादिविषयितावच्छिन्नत्वात् समवायरूपज्ञानवैशिष्ट्यावच्छिन्नत्वात् नापि सामानाधिकरण्यरूपज्ञानीयवैशिष्ट्यावच्छिन्नत्वं आसाज्ञानाभाववति
ज्ञानसमानाधिकरणधाभाववति साध्ये बाधाव्याप्तेः नापि ज्ञानसमानाधिकरणज्ञानत्वावच्छिन्नत्वं आत्माज्ञानसमानाधिकरणज्ञानाभाववति साध्ये ज्ञानविशिष्टज्ञानाभाववति आत्मा
साध्ये च बाधाव्याप्तेः ज्ञानवैशिष्ट्यस्य प्रकारताविशेषतावच्छेदकघटकत्वात् न च दोषविषयकज्ञानवैशिष्ट्यावच्छिन्नत्वं विवक्षितं दोषत्वनिवेशे नात्माश्रयादिस्वपादानं । बाधादिनिर्णये स्वास्थ्य-
ज्ञानवैशिष्ट्यं तु भ्रमेऽथ तादृशसंदेहव्यक्तिनमेवेति बोध्यं । असाधारण्यादिविषयितावच्छिन्नसाधारणीकृत्याद्यानवच्छिन्नमनाधिकरणसाधारण्यज्ञानविशिष्टहेतुमत्ताज्ञानत्वेनापि प्रतिबंधक-
तया हेतुमत्साध्याद्यवगतिव्याप्तिरितिवाच्यं । साध्यसाध्यविषयितानवच्छेदकत्वस्य निवेशनीयत्वात् न च साध्यसाध्यविषयितानवच्छेदकत्वं असाधारण्यप्रकारतानिरूपितमुख्यविशेष्यतावच्छिन्नत्वं प्र-
साधारण्यज्ञानप्रतिबंधकताघटकपदार्थविशेष्यतावच्छिन्नत्वानुरूपत्वनिवेशः । पापाणामपर्यवेतवेत्तो ज्ञानसाधारण्यप्रतिबंधकतायाश्च प्रकारतान्यविशेष्यताप्यवच्छेदकेति ना-
तिव्याप्तिरितिवाच्यं । तथापि साध्यासंप्रसाधारण्यावच्छेदकतेऽपि साधारण्येऽव्याप्तेः स्वदेशविवक्षायामपर्याप्तस्वव्यक्तित्वेस्वाश्रयव्यक्तिभेदप्रतियोगितावच्छेदकत्वभयसंबंधेना
साधारण्यविषयितावच्छिन्नावच्छेदकताकत्वं तु स्यात् न चैवमपि जलं वह्निमज्जलत्वादित्यादौ जलव्यक्तिवह्निव्यापकीभूताभावप्रतियोगिजलत्वेऽतिव्याप्तिः एवं जलं वह्निमत्

धूमादिसाध्ये अलक्ष्यस्य प्रतीतेस्तु तया जलत्वनि जलत्वकालीनजलसाधकत्वव्यभावेऽति व्याप्तिः प्रतिबन्धकतायाम् असाधारण्यादिविषयित्वावच्छिन्नत्वात् न चैतस्य तादृशयथा-
र्थज्ञानविषयतया घटितत्वं नास्तीति वाच्यं । तत्रापि ज्ञानवैशिष्ट्यानवच्छिन्नत्वे घटिततादृशविषयतान्तरनिवेशनात् अन्यथा अभावत्वान्तर्भावाननिति ज्ञानविशिष्टस्याभाववान् इति
ज्ञानस्य विरोधित्वे तथा तद्विषयीभूताभावत्वप्रदृपघटिततया बाधादाव्याप्तिरिति चेन्न प्रमेयत्वविशिष्टासाधारण्यवारणायोक्तत्वेन याभाववत्त्व प्रतिबन्धकताघटिततादृशविष-
यान्तरनिवेशनीयत्वात् ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतासाधारण्यादिविषयताशून्यत्वे लोभयाभावत्वेन वा यथार्थज्ञानं ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकतासा-
धारण्यविषयतान्यत्वोभयाभावत्वेन वा विषयताविशेषणीयेति । न दोषः । विशेष्यदले प्रतिबन्धकतायथार्थज्ञानविषयतानां यस्य यद्विशेषणं तादृशविषयमात्राघटितत्वे विता-
ज्ञानत्वे विशेषणत्वोपाये तु यादृशविषयताशालिनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तितादृशविषयताशून्यत्वे
सति तादृशविशिष्टविषयताशून्यत्वरूपविशिष्टत्वाघटितत्वेन यथार्थज्ञानविशेषणान्नपापाणमप्रयवर्जितादौ असाधारण्यादौ न दोषः तत्र विषयितादृयसाध्यत्वा-
धारण्यविषयितान्यत्वेन विशेषणादितित तद्युक्तमेव । दोषनिश्चयविशिष्टदोषनिश्चयत्वे प्रतिबन्धकतानतिरिक्तवृत्तित्वसत्त्वेनासंभवात् स्वविषयिताशून्यत्वेन द्वितीय
निश्चयविशेषणत्वादुदासीननिश्चयविशिष्टदोषविषयकनिश्चयमादाय असंभवस्य दुर्वारत्वादिति दिक् । सत्प्रतिपक्षश्च प्रतिहेतुव्यापकसाध्याभावः यद्वि साध्याभा-
वाभाववत्त्वनि प्रतिहेतुमत्पक्षो दोषः यद्वा प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्ष एव सः । तद्धतत् ज्ञानस्य विशिष्टवैशिष्ट्यावगाहित्वेन स्वतंत्र
प्रतिबन्धकत्वमुपेयं ज्ञानविशिष्टज्ञानत्वेन स्वतन्त्रप्रतिबन्धकत्वेऽविशेषेण प्रतिहेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षादिवरस्याप्युपलक्षणत्वात् तदोषेयाभावाद
न निवेश्यः सत्प्रतिपक्षसंग्राहकतद्विषयितानवच्छिन्नत्वे वैयर्थ्यापत्तिश्च प्रतिहेतुव्यापकसाध्याभावकप्रतिहेतुमत्पक्षः सामानाधिकरण्यरूपेण समानकालीनत्वा-
दिरूपेण वा संसर्गेण घटितः सर्वोपि लक्ष्य एव अविशेषात् सामानाधिकरण्यादिप्रकारकघटितत्वेऽलक्ष्येति । नन्वत्र पक्षतावच्छेदकावच्छेदेन साध्यादिविषयतानिवेशे
सामानाधिकरण्येन साधने सामानाधिकरण्येन बाधादावतिव्याप्तिः सामानाधिकरण्येन तन्निवेशे च सामानाधिकरण्येन बाधादावव्याप्तिरिति चेन्न सामानाधिकरण्येन साध्य

सिद्धिस्थलीयेऽल्पत्वे शुद्धसंसर्गावच्छिन्नसाध्यप्रकारताया अवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीयेऽनवच्छिन्नसंसर्गावच्छिन्नसाध्यप्रकारताया अनिवेशेनोक्तलक्षणभेदस्य एतावत्
सर्वंपक्षतावच्छेदकावच्छेदेन [illegible] एवमग्रेऽपि। स्वरसादिति। समूहालंबनाभिप्राये चकारोऽपेक्षितः अतो ज्ञायते समूहालंबनेन भवतीत्यर्थः। यत्तु साध्यवत्त्वे हेतुमत्त्वमनभिधाय
हेतुमत्त्वे साध्याभिधाने समूहालंबनाभिप्रायकत्वं नास्तीति तन्न साध्यवान् स हेतुमान् [illegible] अभिधाने भागासिद्धत्वव्याप्त्यापत्तेः साध्यविशिष्टपर्वतत्वैकदेशपर्वतत्वव्यापकतावच्छि
च्छिन्नाया विशिष्टपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंसर्गताया अप्रामाणिकत्वात् न चेति शुद्धपर्वतत्वावच्छिन्नसंयोगादेर्यत्र संसर्गता तत्र विशेष्यतावच्छेदककोटौ धूमादेरधिकस्य
भानेऽपि सामानाधिकरण्येन वह्न्यभाववद्ज्ञानस्य प्रतिबंधकत्वमावश्यकमिति [illegible] नातः तथा च शुद्धपर्वतत्वव्यापकत्वविशिष्टसंयोगसंबंधेन वह्नेः साध्यतास्थले शुद्धस्वरूपसंबं
धेन वह्न्यभाववत्ताज्ञानस्य वह्निव्याप्यधूमवद्विशिष्टपर्वतत्वधर्मितावच्छेदककवह्निमत्ताबुद्धिं प्रति प्रतिबंधकत्वं संभवतीत्यर्थः। ननु विशिष्टपर्वतत्वधर्मितावच्छेदककानुमितिं प्र
ति एतादृशज्ञानस्य कथं प्रतिबंधकत्वमिति सत्यमाह तादृशानुमितेरपीति। तादृशविशिष्टधर्मितावच्छेदककानुमितेः विशेष्यतावच्छेदकीभूतपर्वतत्वांशे तादृशधूमरूपाधिकावगा
हित्वेऽपि शुद्धपर्वतत्वव्यापकत्वविशिष्टसंयोगेन वह्न्यवगाहित्वादित्यर्थः। तथा च तादृशानुमितिं प्रति शुद्धस्वरूपसंबंधेन वह्न्यभावज्ञानस्य प्रतिबंधकतया शुद्धस्वरूपसंबंधेन व

ति

ह्न्यभाववद्विशिष्टपर्वतत्वपक्षे बाधत्वमक्षतमेवेति भावः। अप्रामाणिकत्वादिति। अत्र च नीलधूमत्वेन धूमाभाववद्ज्ञानदशायां रक्तधूमत्वेन धूमवत्त्वज्ञानानुदयप्रसंगः। एकदेशाव्यापकता
स्वीकारेण तस्य धूमत्वावच्छेदेन धूमाभाववत्ताज्ञानसमकालत्वादिति बाधकमप्यवसेयम्। अत्र चोक्तबाधकोत्थानमभ्युपगमे विपरीतमन्यस्य पक्षतावच्छेदे न हेतुमत्तावगाहित्वे अनुमितेर्ध
र्मितावच्छेदककैकदेशावच्छेदेन साध्यवत्तावगाहित्वं लिंगोपधानमते आवश्यकमित्याशंकते ऽथेति। अन्यथेति। अत्र सामानाधिकरण्येन हेतुमत्तावगाहिमते [illegible] एकदेशे पर्वतत्वा
वच्छेदेन साध्यानुमितिसंभवः। विशिष्टपर्वतत्वावच्छेदेन हेतुमत्ताज्ञानस्थले लिंगानुपधानमतेऽपि विशिष्टपर्वतत्वावच्छेदेन साध्यानुमिता [illegible] शुद्धपर्वतत्वावच्छेदेनेति।
लिंगानुपधानमते तथाविधपरामर्शात् तादृशबाधदशायां सामानाधिकरण्यमात्रेण साध्यानुमितेरिष्टत्वात् सिद्धमनुधावनीयम्। एतावता [illegible] ननु
तादृशविषयतोपगमे प्राचीनमते पक्षतावच्छेदकव्यापकत्वानवगाहिनी बाधाप्रतिबध्या सामानाधिकरण्यमात्रेण साध्यानुमितिः कथं वार्यत इति वाच्यं तन्मते हेतुमानेऽपि तन्नि

नापि

वैधिनाधिकावगाहित्वस्य प्रयोजकतयासिद्धेरेतादृशानुमितिविरोधित्वात्। अनुमित्सापत्तेरिति। पर्वतत्वसामानाधिकरण्येनोक्तानुमितेरधिकविषयकतया बाधसिध्योरप्रतिबं
धकत्वादिति भावः। बाधादीत्यादिना तादृशसत्प्रतिपक्षपरिग्रहः। यत्तोभयमात्रसिद्धिपरिग्रह इति तदसत्। तत्र प्रकृतपक्षे तद्वहेतोर्भानेन तु हेतुविशिष्टपक्षे पक्षतावच्छेदकान्तरस्य सदोषा
र। तेषां सामानाधिकरण्यमात्रेणावबोधारीणां। ननु लिङ्गोपधानमते एकदेशाव्यापकताया स्वीकारावश्यकत्वे प्रकृतग्रन्थस्वरसताभिप्रायकत्वेन तादृशलिखनस्वरसानुरोधेन वक्तव्यः
अन्यथा पक्षः साध्यवान् साध्यव्याप्यहेतुमानित्येव लिखेत्। तत्र च सामानाधिकरण्येन तादृशबाधादेर्नाप्तिप्रत आह प्रकृतग्रन्थस्थिति एतन्मताभिप्रायकत्वे स्यात्तदुपनिर्वाहः स्यात्तदेव
त्वसिद्धमित्यर्थः। अव्यावर्तकतयेति। लिङ्गानुपधानमते साध्यव्याप्यहेतुमान् पक्षः साध्यवानिसाकार[illegible]भिन्नाकारया पक्षः साध्यवानिसाकारया अनुमितेरप्रसिध्यात् ध्याव्दस
पर्यदसाकारकत्वविशेषणसंगतिः। तन्मते च तत्साकारभिन्नाकारानुमितेरप्रसिध्यात् तद्विशेषणसंगतिः इत्यनुमितिपरमित्सेतावन्मात्रस्यैव सम्यक्त्वं इत्संतस्याव्यावर्तकत्वात् अनु
मितीति लिङ्गोपधानमते इत्संस्यैव सम्यक्त्वादिति भावः। इत्साकारकत्वं इति वाक्याधीनप्रतीतिविषयविषयकत्वं तेन स्वमते समूहालम्बनानुमितिलाभः। व्याख्यायेति। न त्विदमसमंजसं।
कदा पर्वतश्च वह्निमानिति समूहालम्बनानुमितिमादाय वन्यभावव्याप्तादावतिप्रसंगात्। नहि प्रकृतानुमितिनिरूपकार्यतानिरूपकसंबंधविशिष्टत्वव्यापकप्रतिबध्यतानि
वेशासंभवः साध्याप्रसिध्यादेरेव लक्षणासंगतेरुक्तत्वात्। तादृशागृहीतावच्छिन्नकार्यतानिवेशनं च प्रागेव निराकृतमेवं तर्कालंकाराणां प्रकृतानुमितिताघटितकार्य
तानिवेशासंभवात्। तथाहि आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय तैः धूमपरामर्शानन्तर पर्वतो वह्निमानित्याकारकवह्निविशेषकानुमितित्वस्य धूमपरामर्शकार्यतावे
च्छेदकत्वमुपेयते कार्यदिश्य प्रामाण्यज्ञानानास्कन्दितत्वानिवेशात् स्वपक्षकत्वस्य तत्सोध्यकत्वस्य वानुपादानेऽगृहीताप्रामाण्यकास्पर्वते वह्निव्याप्यधूमपरामर्शादि
नेतरस्वसामग्रीविरहानुवेशकैः पर्वते घटस्य वानुमितिजनने तत्र व्यभिचारात् तु यदि इतिमत्रेतत्स्य पक्षकत्वादिप्रवेशः यदि चाप्रामाण्यज्ञानविशिष्टो धूमपरामर्शे
तद्विरहविशिष्टो आलोकपरामर्शस्तद्वन्नोदितमिति तत्र व्यभिचारवारणाय कार्यदिश्यप्रामाण्यग्रहाभावविशेषणाया आवश्यकतया विषयविषयितो
निवेशावैयर्थ्यं मन्यते तदा स्यात् तज्जन्यानुमितिभिन्नत्वमपि निवेशनीयम् एवं धूमेन पर्वते घटस्याप्यतो व्यभिचारः तत्राप्रामाण्यज्ञानास्कन्दितपरामर्शस्यैव हेतुत्वात्तदृस

नुमितित्वनिवेशः तथा च तत्तद्व्यक्तित्वावच्छिन्नकार्यतानिवेशेऽनन्तानुपपत्तिः नन्वेवं दोषभूततत्तद्व्यक्तिमान्नित्यनुमिते तादृशसंबंधिग्रहत्वेन तन्निष्ठतिबंधकत्वाभावि
षयेवन्हिसमानाधिकरणत्वलक्षणव्याप्तिरिति चेन्न। तादृशकार्यतानिरूपकप्रतियोगितासंबंधावच्छिन्नव्यापकप्रतिबंधकतानिवेशात् नन्वेवं व्याप्तिमान्निरूपकतानात्मकग्रहे संबंध
स्यगत्वेनाप्रामाण्येन नानुयोगितादेः स्वरूपसंबंधरूपतया ग्रहभेदेन भेदात् पक्षिंचिदनुयोगिताव्यापकत्वमादायाप्ताति व्याप्तिर्दर्शितेति चेत् तादृशकार्यतानिरूपकता
वच्छेदकपर्याप्तिसंबंधेन तादृशकरूपविशिष्टत्वानिवेशादनुयोगितापनुमानकधर्ममादायादोषादिति यथाश्रुतार्थ[illegible] पीव्यापकता: एतन्मते रूपाकारकत्वं
स्वप्रयोगोपाधितभावाव्याप्यत्वं प्रयोगोपाधित्वं च ग्राह्यतानवच्छेदकत्वे सति स्वजन्यबोधविषयत्वं यथा घटपदादौ धानकर्मत्वस्य महिम्ना व्याप्तिरिति [illegible] प्रसं
क्तत्वाग्नित्वस्य प्रयोगोपाधितया तद्विषयत्वं रूपाकारकत्वं च हेतुत्वविशिष्ट[illegible]पक्षतावच्छेदकनिष्ठादेरूपतावच्छेदकतानिरूपितप्रकृतसाध्याविधेयताकत्वं अत्रेद
मरुचिबीजं न स्वस्वसाध्यसंसर्गाभिगाहित्वस्य जन्यतावच्छेदकत्वे अप्रामाण्यज्ञानानास्कंदितधर्मपरामर्शाभावविशिष्टस्य वक्तावित्तविषयकेष्वनुमितिसत्त्वहस्ते श्रुतादृशपरामर्श
स्यान्यथासिद्धत्वे चगौरवात् अप्रामाण्यग्रहाभावविशिष्टपरामर्शत्वजन्यतावच्छेदकघटको धाच्यद्वितिनप्रकृतानुमितित्वावच्छिन्नकार्यतानिवेशसंभवः अप्रा
माण्यज्ञानाभावविशिष्टपरामर्शेनरानुमितिश्च व्यापककार्यतानिवेशात् तत्संबंधस्य घटाघनुमितिसाधारण्यात् धादेव व्याप्तिः अप्रामाणिकलिंगोपधा
नमतात्रयणामिसाकारकपदे उदक्षरनाच सिद्धांतेतत्स्याकारकत्वस्याकारपदपञ्चाधिति वाक्याधीनप्रतीतिविषयत्वस्फूर्तयासमरूढत्वं वनानुमितित्वमन्ति
नोदश[illegible]रतेति नन्वे[illegible]ने स्वसंगतं एकत्र[illegible]वैकरूपेण व्याप्तिचारग्रहे व्याप्ति[illegible]रूपेण व्याप्तिग्रहस्थला
प्रदर्शनेनस्ननताघातात् अतः एकपदस्यैकधर्मावच्छिन्नेत्यर्थः एवम न्यपदस्यान्यधर्मावच्छिन्नेसर्वत्र स्वाश्रयेनान्वयित्वेतेति स्वरूपासिद्धिपरमनुमितेः

गा१

१६ हेतुवैशिष्ट्यावगाहिसमूहालंबनरूपस्य स्याद्वयकत्वार्थः हेतौ तत्र व्याप्तिवैशिष्ट्यावगाहित्वस्य चावच्छेदकत्वार्थं व्यभिचारज्ञानस्यानुमितिविरोधिताऽनिराक-
रणं। आदिना साधनाप्रसिद्ध्यादिपरिग्रहः ननु तद्धर्मावच्छिन्ने व्यभिचारज्ञानसत्त्वेपि तद्धर्मावच्छिन्नधर्मिकव्याप्तिज्ञानसंभवात् तत्कथनेनान्यूनतेति तत्स-
नाऽसौ साहचर्येति कथंचित्। व्यभिचारज्ञानस्य शाब्दत्वात् लौकिकसंनिकर्षजन्यः धूमेति। विनश्यदवस्थपरामर्शजन्यानुमितेः कार्यतावच्छेदकाक्रान्तत्वानु-
रोधेऽलक्षत्रैणोऽयसाधारणमव्यवहितोत्तरत्वं निवेश्यं अन्यथा यत्र प्रथमक्षणे बाधज्ञानं ततः परामर्शः तत्र बाधज्ञानसत्त्वात् तृतीयक्षणेऽनानुमितिः किंतु च-
तुर्थक्षणे तत्र तादृशानुमितेः कार्यतावच्छेदकानाक्रान्तत्वापत्तिः [struck] तन्नेष्टापत्तिः अंकुरविशेषसाध्यके बाधज्ञानसत्त्वादेव न प-
रामर्शाद्द्वितीयक्षणेऽनुमितिः किंतु तृतीयक्षणे एवेति तत्र सव्यभिचाराव्याप्तिः स्यात्। तथा बाधज्ञानोत्तरधूमव्याप्यवह्निमानिति शाब्दादिपरामर्शोच्छित्तेर्व्या-
प्यादिज्ञानविशिष्टत्वनिर्वाहः एतेनानुमितिसामग्रीप्राबल्याद्व्यभिचारज्ञानोत्पत्तिकाल एव कथं नानुमितिरिति तु न तत्रापि प्रथमं परामर्शस्य व्याप्त्यंशे
लौकिकत्वासंभवात् प्रत्यक्षे आदिनाऽलौकिकपरिग्रहः द्वितीयक्षणे व्यभिचारज्ञानोदये च प्रथमपरामर्शेऽप्रामाण्यग्रहोदयात् परामर्शान्तरमव्य-
थानुमित्युत्पत्त्यापत्तेः इदं तु चिन्त्यं तदंधनपरामर्शोत्पत्तिविधावनन्यथा। व्यभिचारग्रहस्यानुमित्यप्रतिबन्धकतया पूर्वोक्तेः तत्राद्यपरामर्शा[illegible]देवानुमित्यु-
सत्त्वे बाधकाभावात् तस्योत्तरकालिकाप्रामाण्यग्रहाभावविशिष्टत्वात्। इदं तु बोध्यं तद्धर्मावच्छिन्नसाध्यतावगाहिपरामर्शे सत्येव तद्धर्माव-
च्छिन्ने तत्साध्यव्यभिचारग्रहः प्रतिबन्धकः स्वसंभवः तदाद्यपरामर्शोत्थापनं सम्यगेव। व्यभिचारज्ञानानन्तरक्षणे द्वितीयपरामर्शोत्पादनेक्षणात्
असाधारण्याव्यवहितोत्तरत्वानिवेशेऽपि नानुमितेस्तद्धर्मावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वमिति १८

(बाधकत्वानुरोधेन)

तं३

समूहालंबनानुपादानं । कुतश्चित्प्रतिबंधकादनुमितिसत्त्वेऽसत्तानदोषस्त्वनुमितिपर्यंतं । न क्षतिरिति तादृशानुमितेः स्वसामानाधिकरण्यस्याप्यवादितो नारकत्वणो सति कत्सोभयसंबंधेन
वह्निसावच्छिन्नधर्मिकव्यभिचारज्ञानविशिष्टत्वात्कार्यतावच्छेदकानाक्रांततया तत्र व्यभिचारज्ञानाभावासत्त्वेऽपि न व्यभिचारदस्पर्शः । एतादृशायथाश्रुतमास्यायामिति यथार्थज्ञानस्यया
दृष्टाविरोधिविषयताप्रयुक्तः तद्धेतुरानुमितिसामान्ये प्रकृतपक्षे प्रकृतसाध्यतद्व्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहित्वाभावस्तादृशविषयताश्रयस्वरूपार्थे न दोषः । न च निर्वह्निः पर्वते वह्निवैशि
ष्ट्यावगाहित्वस्याहार्यज्ञानमात्रनिष्ठत्वेनानाहार्यज्ञानमात्रवृत्तिपर्वतेवह्निवैशिष्ट्यावगाहित्वं प्रसव्याप्यत्वेन व्याप्याभावप्रयोजकत्वे साद्धिन्यायानवतारो कोऽहुर्गार इति वाच्यं धर्मितावच्छेदकनि
ष्ठप्रसासत्प्रतिबंधकतामतस्यादर्शनीयतया नाहार्यवह्निविशिष्टबुद्धौ वह्न्यभाववत्तानिश्चयत्वेन प्रतिबंधकतया धर्मितावच्छेदकनिष्ठधर्मितावच्छेदकताकत्वरूपविरोधिविषयतायाः तद्धर्मि
तावच्छेदकताकत्वाभाववत्ताप्रयोज्यत्वेन तादृशोभयाभावं प्रति प्रयोजकत्वेनैव तादृशविशिष्टविषयताशालियथार्थनिश्चयोत्तरानुमितौ निरुक्तोभयाभावो विरोधिविषयताप्रयुक्तः
तादृशविषयतावत्त्वरूपलक्षणपरिष्कारसंभवादिति दिक् । यथाश्रुतद्वितीयानुपदमेव यथार्थत्वस्य हेयत्वात् । शिष्येति । न चैतादृशभ्रमप्रदर्शने यथार्थप्रकृतपक्षे प्रकृतसाध्यवैशि
ष्ट्यावगाहित्वानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं बाधत्वमित्यादिक्रमेण दृष्टान्तरूपारकंदिशा प्रदर्शनं निवेश्य चेत् बाधादिलक्षणं क्रियते तदा तत्रार्थतं निवेशस्यावश्यकत्वं व्यंज
यितुं तथाप्यसादनात् । व्याप्तिघटकतयेति प्रतियोगितायाः साध्यतावच्छेदकधर्मसंबंधावच्छिन्नत्वावगाहित्वस्य जनकतानवच्छेदकत्वे क्वचिद्घटोभयाभावसमवायावच्छिन्नत्व
स्वभावघटिततद्व्याप्तित्वज्ञानाव्यभिचारज्ञानकालेऽनुमित्सापत्तिर्वर्जिता । तस्येति । न च तद्भाववति तद्विषयकत्वमेव भ्रमत्वमिति वाच्यं तथासति रक्तदण्डवानिसोदण्डनिष्ठप्रकारता
विशेष्यतयोरभेदमते दण्डाभाववति रक्तत्वे दण्डविषयकत्वादतिव्याप्तेः । न च तद्भाववति तत्प्रकारताकत्वेऽप्यप्रदोषस्तद्वत्त्वे वेति वाच्यं तादृशविशेष्यतात्वेन प्रकारतात्वावच्छिन्नानि
रूपकत्वेन निवेशात् विषयतात्वेन विषयतासामान्यनिरूपितत्वस्यासिद्ध्या निवेशासंभवात् न च तत्प्रकारत्वावच्छेदकभावमते इदं तथा च तथाविधे रक्तत्वे दण्डविषयितायाः
संबंधानवच्छिन्नेत्यत्रातिव्याप्तिः यत्संबंधावच्छिन्नप्रतियोगिताकस्तदभाववत्तासंबंधेन तद्विषयकत्वस्यावश्यकत्वात् घटाघभावे विघटत्वावच्छिन्नप्रतियोगितानिरूपितानु
योगितायाः संबंधतया प्रतियोगितावच्छेदकावच्छेदकभावापन्नसांसर्गिकविषयताद्वयस्वीकारेण तदुपपत्तेरिति वाच्यं तथाप्यनयोरभेदमतेऽगतेः । एवं च संसर्गतायां प्रकारता
त्वमभ्युपगम्य भ्रमत्वोपपादनसंभवे विशिष्टविशेषणज्ञानापेक्षापत्तेः संसर्गस्य विशेषणज्ञानस्योपादाने तु गौरवमिति । लाघवादिति साध्यनिष्ठप्रतियोगितायाः अभावविशेष
तानमानिवेशे प्रतियोगिताप्रकारकज्ञानकारणतावच्छेदककोभावसावच्छिन्नप्रकारतायां आधेयतासंबंधावच्छिन्नसाध्यनिष्ठप्रकारतानिरूपितनिरूपितत्वसंबंधा

१८

वच्छिन्नप्रतियोगिताकावच्छिन्नप्रकारतानिरूपितत्वं निवेश्यमिति गौरवं तदपेक्षया प्रतियोगितासंबंधेन प्रकृतसाध्यस्य व्याप्तिघटकत्वे लाघवादिति सर्वः स्वं साध्यतावच्छेदकपरिच्छा
पकमात्रं लाघवादिति स्वरूपसंबंधावच्छिन्नतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकावच्छिन्नस्याभावांशे निवेशे साध्यतावच्छेदकस्य प्रकारतावच्छेदकतया संसर्गघटकत्व
या च द्वेधा निवेशापत्तिरिति गौरवं स्वपरिच्छायकमिति। अवच्छिन्नप्रतियोगिकत्वसंबंधेन साध्यतावच्छेदकस्य निवेशे च लाघवमिति सर्वः। तादृशप्रतियोगिताकत्वसंबंधेन साध्यस्य व्या
प्तिघटकत्वे साध्यतावच्छेदकतीयपर्याप्तिसंबंधेन साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितता दृशसंबंधावच्छिन्नसाध्यप्रकारतानिरूपितत्वमभावप्रकारतायां निवेश्यं तदपेक्षया
तत्केत्वे निरुक्तसंबंधावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वं तस्यामिति कारणतावच्छेदकलाघवं च बोध्यं। इदमत्र विचार्यते। तत्संबंधावच्छिन्नसाध्यप्रकारतानिरूपि
तत्वमात्रं तस्यां निवेश्यं तत्प्रयोजनाभावेन साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वानिवेशादिति साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नविषयतानिरूपितत्वमात्रं न तु साध्य
प्रकारतानिरूपितत्वं तस्यामवच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नसाध्यतावच्छेदकविषयतानिरूपितत्वकल्पनसामग्री प्रतियोगिविशेषणस्यैव संबंधघटकतया विभिन्नरूपेणासौ प्रभा
नस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे संसर्गतानुमतेर्न तोऽन्तसाध्यतावच्छेदकव्यक्तिसांसर्गिकविषयितायाः साध्यतावच्छेदकताघटकीभूतावच्छेदकतावच्छेद
कत्वं च विषयतायाश्चक्रमेण साध्यतावच्छेदकत्वसंबंधमानानियामकत्वात् तथा च व्याप्तिशरीरे लाघवमेव न शरीरे साध्यस्याप्रवेशादिति। इदं तु बोध्यं। व्याप्तिशरीरे लाघवमि
त्यस्य कोऽर्थः अनुमितिकारणीभूतावच्छेदकविषयताश्रयो व्याप्तिशरीरे तत्त्वेन साध्यस्येति चेत् किं परमतेऽत्र साध्यतावच्छेदकस्य नास्तीति चेत् तदा व्याप्तिशरीरे साध्यप्र
वेशीकृतोऽत्र तिथ्यपि विश्वनाथदलक्षणे स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकवदभाववन्निवेश... निराकरणावसरे वह्नित्वेन नास्ती
त्यत्र साध्यतानप्रतियोगिविशेष्यतापन्न एव प्रतियोगितावच्छेदकाभावेन तु इति मिश्रमतलक्षणवाक्यार्थानुपपत्तिरिति दर्शितं तत्र यथा प्रकृते न तथापि तत्र प्रतियोगितावच्छेदकविशि
ष्टवैशिष्ट्यावगाहित्वं सर्वानुमतमभिप्रेत्य तन्निराकृतं इदं तु अनुयोगितासंबंधेन प्रतियोगितेन ... प्रतियोगितावच्छेदकवैशिष्ट्यस्य यं मनीक्रियते तत्र प्रतियोगिविशेष
ता न कारणतावच्छेदकाय वा विश्वनाथदल ... प्रतियोग्यविशेष्ये प्रतियोगितावच्छेदकविशेष्यत्वं नास्त्येवेत्यभिप्रायः इदं तु तदविशेष्यतद्विशेष्यत्वं कं तु शीवादिमान्नास्तीत्या
दौ संसर्गकोटौ भ्रमत्वप्रकारसाप्रमेयत्वेनास्तीत्यादौ भ्रमत्वसंभवेऽपि स्वातंत्र्येणाकल्पनात् रावलंबनार्थं तदन्तादृशवह्निशाब्दलक्षणोक्तप्रकारतानादरसंभवात् वह्निर्नास्तीत्ये

१८

रभावत्वादेरप्रथमार्थत्वं तवन्त्यादिपदसमभिव्याहृतनञादिपदादेव यत्किंचित्संनिरूढे लक्षणातो यत्किंचित्त्वावदभावबोधउपपत्तेः समकालयन्निरूपितत्वाभ्युपगमे संबंधेनेयोक्तसंबंधे
नापि अतः स्वरूपतः प्रकारत्वमेव एवं अभिमतं तत्रेदपि स्वरसतो यादृशाश्वद्धादिति न्यायात् तेन वह्नित्वेन नास्तीति प्रत्ययस्यानापत्तिः विशिष्टाद्यलक्षणेऽपि साध्यतावच्छेदक
वानेवयभावो लक्षणया वाक्यद्वयः स च नञ्समभिव्याहृतसाध्यवाचकेन साध्यपदलक्षणया लभ्यतरत्वापि यत्कुत्राप्यतेरिति न च निरूढसंबंधेनान्वयितावच्छेदक
स्यैव साध्यज्ञानेऽनुभवविरोध इति वाच्यं व्याप्त्यनुगमग्रंथे साध्यवत्ताग्रहविरोधित्वेन साध्याभावाद्यनुगमस्य केवलान्वयिनि कथं वि साध्याभावप्रसिद्धिरिति दीधितिकृ
द्भिरभिधानेन तद्विरोधविरहात् अन्यथा साध्यनिष्ठप्रतियोगिताविरोधिताभावस्य तदविरोधितात्वसंगतेः महानसीयवह्न्याद्यभाववारणाय चेदस्यापरंपरासंबंधघटकावच्छेदक
त्वस्य पर्याप्तिविशेषणप्रतियोगित्वस्थाने इति मतम् यद्यपि प्रतियोगिवैयधिकरण्याघटत्वेनाप्रयुक्तलाघवेन साध्यवत्त्वाद्वृत्तित्वमेव व्याप्तिस्तदास्वावच्छेद्यावच्छेदकताघटित
संबंधएव व्याप्तिघटकतयाऽनुमत इति बोध्यं घटत्वादेरिति घटत्वादेरिति घटत्वप्रकारकप्रमाविषयत्वादेरित्यर्थः आत्मादेरिति वाच्यः रूपवान् पृथिवीत्वादित्यादेरवि
षयितासंबंधावच्छिन्नावच्छेदकताकसाध्यताघटकसंबंधावच्छिन्नप्रतियोगिताकाभावमादाय व्याप्तिः तादृशप्रतियोगिताकत्वसंबंधेन साध्यतावच्छेदकत्वावगाहिव्याप्तिज्ञा वं
नात् विषयितासंबंधेन साध्यव्यापकतावच्छेदकत्वतो बाधग्रहदशायां प्रकृतसंबंधावच्छिन्नावच्छेदकताकविधेयताशाल्यनुमितेः सापत्तिश्चेति साध्यतावच्छेदकताघटकसंबं
धावच्छिन्नावच्छेदकत्वस्य तद्घटकत्वमिति व्यभिचारे तस्य घटकतया घटत्वे तद्विरहात् प्रथमदृष्ट्यादिमतान्तरजनकत्वानभिज्ञविषयकत्वमपरस्वीकारयोर्मध्ये इति भावः तथा च
मेदेन तद्घटकीभूतं विभिन्नव्यभिचारविषयकत्वलाभार्थमिति भावः ननु दीधितिकारस्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीति शब्दाभिलाप्यसाध्यतावच्छेदके हेतुसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वमभिमतः तदापि तादृशभ्रममात्राद्यपयार्थपदप्रयोजनकथनमसंगतमेव साध्याभाववद्वृत्तित्वरूपान्वयव्यतिरेक
व्याप्तिद्वयस्यैव लक्षणघटकतया तादृशभ्रमस्य तदनुमितिविषयकानुमितिप्रतिबंधकत्वादत आह समानेति तथा च धूमवान्वह्नेरित्यादौ द्विविधव्यभिचारसंभवे
न तत्संग्रहाय साध्याभाववद्वृत्तित्वव्यापकसामानाधिकरण्यरूपान्वयव्याप्तिद्वयस्य लक्षणघटकत्वमावश्यकमिति भावः पूर्वमते तु असमानप्रकारकत्वानस्या

35

१८

सोऽप्यभिसज्ञ समानविषयकत्वेन प्रतिबंधकतासुगमा लक्षणवर्णना दुस्तरलक्षणे एवं संबंधेनाभिधानेनेतानी साध्याभाववद्वृत्तित्वमात्रस्य लक्ष्यताभिप्रायात्त्व व्याप्यंतरनिवेशोऽनर्थः अन्यथा साध्याभावे हेतु
सामानाधिकरण्यादीनामपि निवेशापत्तेः किंच अतिरिक्तव्याप्तेर्निवेशे प्रत्यतातत्तोऽवच्छेदकसंबंधेन साध्यतावच्छेदकादिविशिष्टाभाव एव निवेश्यः अन्यथा [illegible] उपपत्तिप्रसंगात् तथा च कथं साध्याभा

निविशेषितं स्याद्धेतुमद्वृत्त्यभावप्रतियोगिसाध्यसामानाधिकरण्यलक्षणसंगतिरिति। धर्मीतात्पर्यमिति। तथा च साध्यतावच्छेदकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व
घटकत्वपदाभिन्नो हेतुरिसंबंधबोधः स्वव्यधिकरणेति स्वविशेष्यतातद्व्यधिकरणायः प्रकारः तदवच्छिन्नत्वं स्वतदनिरूपकत्वं प्रमात्वमिसंबंधार्थः तादृशप्रकारावच्छिन्नत्वं स्वभि
न्ननिवेशपस्वभिन्नविषयतायां चेन्निवेश्यते तदा वह्निमान् पर्वतो भूतलं घटवच्चेति समूहालंबने पर्वतनिष्ठविशेष्यताव्यधिकरणघटत्वावच्छिन्नभूतलादिनिष्ठविषयताकत्वात्
अव्याप्तिरतः स्वस्मिन्नेव तन्निवेशितं अथ स्वव्यधिकरणत्वं स्वाधिकरणावृत्तित्वं तदा पर्वतो निर्वह्निरिति भ्रमस्य प्रमात्वोपपत्तिः वह्न्यभावस्य पर्वते सत्त्वेन पर्वतनिष्ठविशे
ष्यता अधिकरणत्वाभावेन तस्याः स्वपदेन धर्तुमशक्यत्वात् न च प्रकारतावच्छेदकसंबंधेन तद्विवक्षितं पर्वतत्वव्यापककुविशिष्टस्वरूपसंबंधेन चैव वह्न्यभावस्य पर्वतावृ
त्तित्वेन स्वपदेन तद्ग्रहणासंभवादिति वाच्यं सामान्यं जातिमदिति भ्रमस्य प्रमात्वापत्तेः प्रकारतावच्छेदकीभूतसमवायसंबंधेन सामान्यवृत्तित्वाप्रसिद्ध्या स्वपदेन सामान्य
निष्ठविशेष्यतायाः उपादानासंभवात् न च स्वानधिकरणावृत्तित्वं तत् तच्च [illegible] भावेऽक्षतमिति वाच्यं पर्वतो वह्निमानिति ज्ञानस्यापि पर्वतनिष्ठविशेष्यतातद
नधिकरणे ह्रदादौ कालिकसंबंधेन वृत्तेः सत्यात् प्रमात्वानुपपत्तिरतः स्वानधिकरणावृत्तित्वं प्रकारतावच्छेदकसंबंधेन वाच्यं तथा च पर्वतो निर्वह्निरिति भ्रमेऽति
व्याप्तिः दुर्वारैव तत्र पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधस्य प्रकारतावच्छेदकसंबंधः स्वानधिकरणे च तादृशस्वरूपसंबंधेन वह्न्य[illegible]भावस्यावृत्तित्वात् स्वपदेन
कि तु पर्वतनिष्ठविशेष्यत्वेन धर्तुं शक्यत्वं भ्रमीयविशेष्यतायाः विशेष्यत्वमेवेति एवं घटो द्रव्यमिति प्रमायामव्याप्तिः तत्र प्रकारीभूतद्रव्यत्वस्य स्वानधिकरणपटादिनिरूपितप्र
कारतावच्छेदकीभूतसमवायसंबंधावच्छिन्नवृत्तिताशालित्वात् निरुक्तलक्षणघटकसंबंधेन याथार्थ्यस्य प्रमात्वेऽव्याप्तिर्न क्षतिमावहतीति तन्न [illegible] घटो [illegible] ने
द्रव्यमिति तत्र तस्याः संभवात् एवं द्रव्यविशिष्टसत्तावेदिप्रमायामव्याप्तिः विशिष्टसत्तारूपप्रकारस्य स[illegible]त्वेन स्वानधिकरणीभूतगुणावृत्तित्वात्
अथ विशेष्यतायाः स्वानधिकरणावृत्तितावच्छेदकीभूतधर्मावच्छिन्नप्रकारतानिरूपितत्वं निवेश्यमिति चेत् गुणो द्रव्यमिति भ्रमेऽतिव्याप्तिः द्रव्यत्वनिष्ठप्रकार

नि ४ ति २

१८

(=तादात्म्यावच्छिन्नाधिकरणतासंबंधावच्छिन्ना तादृशवृत्तित्वनिवेशस्यार्थः:)

तया निरवच्छिन्नत्वे नावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकत्वात् अथ तस्यां तादृशवृत्तितावच्छेदकविशिष्टनिष्ठप्रकारतानिरूपितत्वमस्त्विति चेत् न एवमपि घटादे
अभिसाध्यव्याप्तेः अथ प्रकारतावच्छेदकसंबंधावच्छिन्नयदधिकरणतायां स्वाधिकरणानिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वाभावस्तत्त्वस्य अधिकरणमिति चेत् न तथा सति सं
योगेन रूपवान् घटइति ज्ञानस्य प्रमात्वापत्तिः संयोगेन रूपाधिकरणतायाः अप्रसिद्धेः अथ स्वाधिकरणवृत्तित्वसामान्याभाव एव स्वं तेष्वधिकरण्यं तत्र च प्रकारतावच्छेदकसंबं
धावच्छिन्नवृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वमेव विशेषणं तेन सामान्याभावत्वादिति चेन्न नाव्याप्तिः न च तथापि गुणो विशिष्टसत्तावानिति भ्रमेऽतिव्याप्तिरिति
वाच्यं तादृशस्वाधिकरणवृत्तित्वसामान्याभावस्वाधिकरण[illegible]वृत्तिसमवायाधिकरणतानिरूपकतावच्छेदकधर्मवत्त्वे तदन्यतरवत्त्वस्य अधिकरणत्वमिति दोषात् पर्वतो गगनवानि
ति भ्रमवारणाय तादृशस्वाधिकरणाभाववृत्तित्वनिवेशः न च गुणः सत्तावानिति प्रमायामव्याप्तिः सत्तायां तथाविधविशिष्टसत्तात्वरूपधर्मसत्त्वादिति वाच्यं स्वाधिकरण
वृत्तित्वस्य प्रकारविशेषणत्वे पदि समवायस्वाधिकरणवृत्तितानवच्छेदकत्वतादृशानिरूपकतावच्छेदकत्वान्यतरवत्त्वस्य धर्मविशेषणत्वमुपेयते तादृशवृत्तित्वनिरूपितावच्छेदक
तीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकसंसर्गस्वाधिकरणवृत्तितानवच्छेदकत्वविशेषणं एवं च तादृशधर्मावच्छिन्नपर्याप्तिकप्रकारतानिरूपितविशेष्यतानिरूपकत्वस्य विवक्षि
ततया गुणः सत्तावानिति साध्येविशिष्टसत्तात्वे प्रकारतापर्याप्त्यनवच्छेदकत्वसत्त्वान्न दोषः इदं रजतमिति भ्रमे रजतत्वावच्छिन्नत्वस्य प्रकारतायामसत्त्वेन दोषोऽतः प्रकारतापर्या
प्तोधर्मावच्छिन्नत्वेन निवेशः प्रकृते तादृशस्वाधिकरणवृत्तित्वं वृत्तित्वतादृशधर्मावच्छिन्नान्यतरवत्प्रकारत्वे सादिक्रमेण निवेशः प्रयोजनाभावेन पर्याप्तेरवच्छिन्नत्वानिवेशात् एते
न द्रव्यत्वेन जलं मा नावगाहिनः पर्वतो द्रव्यवानिति भ्रमस्य सुरासः द्रव्यत्वस्य स्वाधिकरणवृत्तितावच्छेदकत्वेऽपि जलस्य स्वाधिकरणवृत्तित्वात् अत एव [illegible]
केवलत्वेन न हि रजतं [illegible] भ्रमकरणाय [illegible] भूतले संयोगसमवायोभयसंबंधेन घटवदिति भ्रमस्य प्रकारतावच्छेदकं यत्किंचित्संबंधावच्छिन्नाधिकरणताया
स्वाधिकरणवृत्तित्वनिवेशात् किंचित् तादृशसंबंधावच्छिन्नवृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशाद्वा सुरासः द्रव्यं धूमवद्विसाध्ये धूमे द्रव्यत्वव्यापकत्वविशि
ष्टसंयोगसंबंधावच्छिन्नद्रव्यवृत्तित्वस्याभावोपगमे द्रव्यं द्रव्यवदिति प्रमायामव्याप्तिस्तु नाभिधानीया यत्कर्मावच्छेदेन प्रकारतापर्याप्तिस्तद्धर्मावच्छिन्नानुयोगिताकत्वेन स्वाधिकर
णवृत्तित्वस्य निवेश्यत्वादिति दिक् इति चेत् विशेषरूपेण संसर्गतानंगीकर्तृनये प्रसाध्ये योऽस्त्विति चेन्नैवं स्वाधिकरणनिरूपितप्रकारतावच्छेदकसंबंधावच्छिन्नवृत्तित्व।

१२ ६२

तानवच्छेदकविशिष्टत्वं स्वअधिकरणत्वं पर्वतो निर्वह्निरिति भ्रमे स्वपर्वतत्वप्रकारकप्रमाविशेष्यतायां गगनाभावादेश्च पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधा
वच्छिन्नस्वाधिकरणवृत्तित्वं तदनवच्छेदकीभूतवत्त्वभावत्वे सत्तानौ इति व्याप्तिः ननु गुणः सत्तावानिति प्रमायामव्याप्तिः प्रकारीभूतसत्तायाः स्वाधिकरणवृत्तितानव
च्छेदकीभूतविशिष्टसत्तात्वविशिष्टत्वात् तदवच्छिन्नप्रकारतानिवेशे च गुणो द्रव्यमिति स्वरूपतो द्रव्यत्वप्रकारकभ्रमेऽतिव्याप्तिः गुणनिष्ठविशेष्यतायाः स्वपदेन द्रव्यत्वा
त् एवं सामान्यं सत्तावदिति भ्रमेऽतिव्याप्तिः समवायसंबंधावच्छिन्नसामान्यवृत्तिताप्रसिद्धेरिति चेन्न प्रकारतावच्छेदकसंबंधसामान्ये स्वाधिकरणानुयोगिकत्वयद्धर्मा
वच्छिन्नप्रतियोगिकत्वोभयाभाववत्तद्धर्मवत्त्वं स्ववैयधिकरण्यं अत्र सद्द्रव्यमिति भ्रमवारणाय स्वाधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वं बोध्यं यत्प्रतियोगिकत्वोक्तौ गुणः वि
शिष्टसत्तावानिति भ्रमेऽतिव्याप्तिरतो यद्धर्मावच्छिन्नप्रतियोगिकत्वनिवेशः नचैवं द्रव्यत्वेन जलादि भ्रमेऽतिव्याप्तिः यद्धर्मावच्छिन्नप्रकारप्रतियोगित्वस्योक्तत्वात् नचैवा
पूरूपयानिति भ्रमेऽतिव्याप्तिः प्रकारतावच्छेदकसंबंधावच्छिन्नानुयोगितासामान्ये यद्धर्मावच्छिन्नप्रकारप्रतियोगिकत्वस्वाधिकरणयत्किंचिद्वृत्तित्वोभयाभावः तद्धर्मविशिष्ट
त्वस्य वाच्यत्वात् अथात्र भूतले संयोगसमवायोभयसंबंधेन घटवत्ताभ्रमे संसर्गतावच्छेदकीभूतोभयत्वाश्रये स्वाधिकरणानुयोगिकत्वयद्धर्मावच्छिन्नप्रतियोगिकत्वोभया
भावसत्त्वादधिकरणतासामान्ये यद्धर्मावच्छिन्नप्रतियोगिकत्वस्वाश्रयवृत्तित्वोभयाभावस्य नास्तित्वात् स्वपदवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानङ्गीकारात् पृथि
वीजलयोर्नगंधरसप्रसंगात् नच स्वव्यापकीभूताभावप्रतियोगित्वं स्वव्यधिकरणत्वमिति न दोष इति वाच्यं पर्वतो वह्निमानिति स्ववच्छेदकावच्छेदेन भ्रमेऽतिव्याप्तेः नं स
भावस्य पर्वतनिष्ठविषयताव्यापकत्वात् एवं गुणः सत्तावानिति प्रमायामव्याप्तिः प्रकारतावच्छेदकीभूतसमवाये स्वाधिकरणगुणानुयोगिकत्वविशिष्टसत्तात्वरूपधर्माव
च्छिन्नप्रतियोगिकत्वोभयाभावसत्त्वात् तद्धर्मावच्छिन्नप्रकारताप्रवेशे तु स्वरूपतो द्रव्यत्वप्रकारकत्वानेऽतिव्याप्तिरिति चेदिति चेन्न प्रकारतावच्छेदकतावच्छेदकीभूतसं
सर्गतावच्छेदकसामान्ये स्वाधिकरणानुयोगितानिरूपकतावच्छेदकत्वयद्धर्मावच्छिन्नप्रतियोगितानिरूपकतावच्छेदकत्वोभयाभाववत्तद्धर्मविशिष्टत्वं स्ववैयधिकरण्यमुक्तस्थ
ले च संसर्गतावच्छेदके तदुभयत्वे तादृशोभयाभावसत्त्वान्न दोषः यद्धर्मावच्छिन्नप्रतियोगित्वस्यत्र यद्धर्मावच्छिन्नपर्याप्तिकं यादृशप्रकारताश्रयप्रतियोगितां निवेश्य तद्धर्मविशि

१२

38.

ष्टनिष्ठताद्वन्द्वप्रकारतानिरूपितविशेष्यत्वानिरूपकत्वस्य वाच्यत्वान्नापरो दोषः नन्वेवमपि संयोगत्वेन संयोगस्य समवायोभयसंसर्गकघटप्रकारकभूतलविशेष्यकज्ञानस्य प्रमात्वा
पत्तिः संसर्गतावच्छेदकीभूतसंयोगत्वे तादृशोभयसत्त्वादिति वाच्यं। प्रकारतावच्छेदकसंबंधेन स्वसमानाधिकरणाभावाप्रतियोगित्वं स्ववैयधिकरण्यमिति दिक्। वस्तुतस्तु प्रकारता
वच्छेदकसंबंधसामान्ये यद्धर्मावच्छिन्नप्रतियोगिताकत्वस्वाश्रयवृत्त्यधिकरणतावच्छेदकत्वोभयाभावस्तद्धर्मवत्त्वं स्वाधिकरणानुयोगिकत्वप्रकारतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववत्त्वा
वच्छिन्नसंबंधितासामान्यकधर्मवत्त्वाभिप्रायेणापि परिष्कारस्य पंथानो द्रष्टव्याः संबंधितानिवेशनात् तादात्म्येन भ्रमजनकत्वः यदि चैवमप्यननुगमस्तु अनेन तत्स्वाधिकरणत्वेति निष्ठप्रका
रतानिरूपितत्वतादात्म्योभयसंबंधेन विषयताविशिष्टविषयताया अनिरूपकत्वं घटवद्भूतलवान्देशः इत्यादिसंग्रहाय तादात्म्योपादानमिति न सत्तत्त्वगुणको विशिष्टसत्तावान्द्रव्यत्वादिति
व्याप्तेः नावित्वनिरूपितत्वस्वाश्रयवृत्तित्वोभयसंबंधेन प्रकारताविशिष्टविशेष्यताया अनिरूपकत्वं गगनवान् पर्वतः इत्यादावतिव्याप्तेः एतेन स्वावच्छेदकावच्छिन्नाधिकरणत्वा
भाववद्वृत्तित्वस्वनिरूपितत्वोभयसंबंधेन स्वावच्छेदकधर्मावच्छिन्नस्वावच्छेदकसंबंधावच्छिन्नाभावसामानाधिकरण्यस्वनिरूपितत्वोभयसंबंधेन वा प्रकारताविशिष्टविशेष्यताया
अनिरूपकत्वं स्वावच्छेदकसंबंधावच्छिन्नत्वनिवेशे सर्वतो वह्निमानिसाद्रौ समवायेन वह्न्यभावमादाय नाव्याप्तिः उक्तः संयोगवान्द्रव्यादिसंग्रहाय निरवच्छिन्नाभावाधिकरण
तानिवेशेपि सपक्षस्थाद्रजलमिसाध्ये च प्रकारतावच्छेदकाभावात्तद्व्यत्वेन जलादिभिन्नो ज्ञावगाहिभिन्नेऽतिव्याप्तेश्च एतेन स्वव्याप्यधर्मावच्छिन्नाभाववद्वृत्तित्वघटितसंबंधोप्युपास्तः
सत्तावान् गुणादिति प्रमायां प्रकारताव्याप्यविशिष्टसत्तात्वमादायाव्याप्तेः अन्ये केचित्तु विशेष्यताविशिष्टविशेष्यताया अनिरूपकत्वमनुगतप्रमात्वं विशिष्टं च स्वाधिक
रणानिष्ठत्वस्वाश्रयनिष्ठाधिकरणतानिरूपकतानवच्छेदकावच्छिन्नत्वान्यतरवत्त्वप्रकारताकत्वतादात्म्योभयसंबंधेन न चैवं गुणः इत्यादेः प्रमात्वप्रकारतावच्छेदकसं
बंधेन विशेष्यावृत्तित्वस्ववैयधिकरण्यानिवेशात्सामान्यं सत्तावद्दिग्देशे संयोगेन रूपवान् गंधवत्त्वादित्यव्याप्तिरिति वाच्यं प्रकारतावच्छेदकसंबंधावच्छिन्नाधेयता
यस्वरूपसंबंधेनाविशेष्यावृत्तित्वनिवेशादिति दिक्। वस्तुतस्तु स्वावच्छेदकावच्छिन्नाभाववद्वृत्तित्वविशिष्टस्वनिरूपितत्वप्रतियोगिवैयधिकरण्यस्वाश्रयाभाववद्वृत्तित्वविशि
स्वनिरूपितत्वान्यतरसंबंधेन प्रकारताविशिष्टविशेष्यताया निवेशाद्दननुगमः इत्थं च योपादानादिविशिष्टसत्तावान् गुणत्वादित्यादौ पर्वतो द्रव्यवान्निसाध्ये च नातिव्याप्तिः गुणः सत्तावा
निसाध्ये स्वाश्रयविशिष्टसत्ताभावमादायाव्याप्तिस्तु प्रतियोगिवैयधिकरण्यनिवेशान्न चैव प्रकारतावच्छेदकसंबंधेन प्रतिमत्त्वघटितत्वं प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशे

तद्दोषतादवस्थ्यात् द्रव्यत्वेन जलभ्रमे जलस्य कालिकसंबंधेन पर्वते सत्त्वात् अतिव्याप्तेः संबंधनिवेशः । न च तथापि संयोगेन द्रव्यत्वस्य भ्रमेऽतिव्याप्तिः प्रकारतावच्छेदकाभावा-
त्प्रकारतावच्छेदकसंबंधेन प्रतियोगिमत्त्वाप्रसिद्धेश्चेति वाच्यं प्रकारतावच्छेदकसंबंधसामान्ये स्वप्रतियोगिकत्वयदभाववद्वृत्तियोगिकत्वोभयाभाववत्त्वमर्थः वस्तुतस्तु स्व-
सामानाधिकरण्यस्वप्रतियोगिकत्वोभयसंबंधेन किंचिद्विशिष्टान्यत्वमेव प्रतियोगिवैयधिकरण्यं स्वावच्छेदकावच्छिन्नाभाववत्तायां निरवच्छिन्नत्वनिवेशः प्राग्वदिति दिक् । केचित्तु
स्वसमानाधिकरणासंताभावप्रतियोगितानवच्छेदकानवच्छिन्नत्वस्वसमानाधिकरणाभावप्रतियोगिनिष्ठत्वस्वनिरूपितत्वेतत्त्रीतयसंबंधेन विशेष्यताविशिष्टप्रकारतायाः अनि-
रूपकज्ञानत्वमनुगतप्रमात्वं अयं घट इति प्रमायां प्रकारतावच्छेदकसंबंधाभावेन प्रथमसंबंधसत्त्वादव्याप्तिर्द्वितीयसंबंधनिवेशः । न चैवमपि विशिष्टघटत्वाभावमादाय द्वितीयसं-
बंधसत्त्वादव्याप्तिरेव प्रतियोगिनिष्ठत्वस्थाने प्रतियोगितावच्छेदकावच्छिन्नत्वोक्तावयं घट इति भ्रमेऽतिव्याप्तिः प्रतियोगितावच्छेदकानवच्छिन्नत्वावच्छिन्नत्वोभयाभावो केनतु घटत्वप्रमा-
याम् अव्याप्तिरिति वाच्यं प्रकारतावच्छेदकान्यवैशिष्ट्यानवच्छिन्नप्रतियोगिताया उक्तत्वात् संसर्गसाधारणप्रकारतावच्छेदकतानिवेशे नाप्रसिद्धिः यद्यप्येवं सति विशिष्टसत्ताभाव-
धारणात् सत्ताप्रमाया नासंग्रहस्तथापि द्रव्याणि सादि प्रमासंग्रहाय प्रथमसंबंधनिवेशः द्रव्यत्वेन जलभ्रमवारणाय प्रतियोगितानवच्छेदके सत्त्वस्वावच्छिन्नप्रकारताघटित-
संबंधेनावच्छेदकत्वं निवेश्यमिति दिक् । वस्तुतस्तु स्वनिरूपिततादृशप्रकारतानवच्छेदकवैशिष्ट्यानवच्छिन्नतादृशप्रतियोगित्वकविशेष्यताकत्वशून्यत्वमेवानुगतं प्रमात्वमि-
त्याहुः । स्वाभाववद्वृत्तित्वस्वनिष्ठप्रकारतानिरूपकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टविशेष्यतानिरूपकत्वमनुगतप्रमात्वमित्येके । स्वव्यधिकरणनिष्ठत्वस्वाव्यधिकरणाधि-
करणतानिरूपकतावच्छेदकधर्मावच्छिन्नत्वान्यतरवत्प्रकारताकत्वेन तादृशोभयसंबंधेन विशेष्यताविशिष्टविशेष्यतानिरूपकत्वमित्यन्ये । एवमन्येऽपि प्रकाराः पूर्वनिरुक्त्य-
नुसारेणोह्याः स्वनिरूपितप्रकारताघटितसंबंधावच्छिन्नत्वस्वनिरूपितप्रकारतावच्छेदकधर्मावच्छिन्ननिरूपितत्वोभय[illegible]भाव स्वनिरूपितप्रकारताघटितसंबंधावच्छिन्नत्व-
स्वनिरूपितनिरवच्छिन्नप्रकारताश्रयनिरूपितत्वोभयाभावान्यतरवत् स्वनिरूपितप्रकारताश्रयाधिकरणतासामान्यकविशेष्यतानिरूपितत्वं समुदायार्थ इत्यपि वदन्ति । अन्ये तु
वृक्षः कपिसंयोगी साद्देश्चस्य अधिकरणत्वं न स्वाधिकरणवृत्तित्वमात्रं मूले वृक्षः कपिसंयोगी सादेरविषयत्वापत्तेः एतच्च प्रसक्षमणो विशेष्यावृत्तिप्रकारकत्वमिति गीयते ।

ईश्वरस्तानाङ्गीति विषयितावच्छेदकत्वं तु लघुयाऽऽवश्यं बोध्यं। प्रकारान्तरं यादृशविशिष्टविषयकत्वमित्यादिरूपं। विशिष्टघटकतयेति। यादृशविशिष्टविषयकं ज्ञानं प्रतिबन्धकं
तादृशविशिष्टं द्रोणादिपदाद्बोध्यमिति साकाङ्क्षाभाः इत्यर्थः छायाः द्रोणादिपदाधीनबोधविषयत्वस्याश्रयतासम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतामाविशेष्यदलत्तदवच्छेदक
सत्तदवच्छेदकं सत्तदवच्छेदकं साधिपरम्परासम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतायास्तद्विशेषणतद्विशेषणादौ सत्त्वेनाश्रयतेतरसम्बन्धावच्छिन्नतन्निष्ठप्रकारतानिरूपित
विशेष्यतायामावृष्ट्यादिति भावः इत्थमेव च गोत्वलोमादेर्गोपदशुपदार्थत्वमप्युपपादितमिति प्रसेके सादेः प्रसेकत्वेति पदार्थतावच्छेदकीभूतसाध्यतावच्छेदकादेः हेत्वाभासपदार्थ
तावच्छेदकतापत्तिरित्यर्थः तादृशयथार्थज्ञानविषयोयद्रूपावच्छिन्नस्तत्तद्रूपावच्छिन्नो दोषपदार्थोऽप्ययस्साकारिकायाई श्वरेच्छायाश्रयतासम्बन्धावच्छिन्नप्रकारतानिरूपितवि
शेष्यतायाः साध्याद्यवच्छेदकत्वमत्वादिति भावः विषयकमेवेसेयकारेस्यविशिष्टविषयकं प्रतिबन्धकमेवेसत्रयोजनमाविशिष्टविषयकत्वेप्रतिबन्धकताशून्यत्वमित्याभावोलभ्यते वह्निमानेव
धूमवानिति वदत्रानतिरिक्तवृत्तित्वलाभार्थं चैवकारः पूरितः तद्घटकमित्यत आनतिरिक्तविषयकत्वं लभ्यते इत्यतो व्याचष्टे। तद्घटकमिति। दुष्टनिरूपणस्यैव प्रतिज्ञातत्वाद्दीधितौ दृष्ट
नामित्युक्तं प्रतियोगिपदज्ञानपदयोः षष्ठीसमासबीजं स्फुटीकर्तुं कर्मधारयमपि स्वरसतोऽकेते नन्विति दुष्टहेतुत्वमिष्टमेवेति कुतो वह्निमान् वह्न्यभाववद्ध्र
साहचर्यज्ञानात्मकसम्बन्धेन दुष्टहेतुसाध्यत्वादूपेति। तद्रूपावच्छिन्नपक्षकतद्रूपावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकानुमितिजनकपरामर्शविषयतादृशानुमितिजनकतावच्छेदकविषयता
वच्छेदकीभूतप्रकृतहेतुतावच्छेदकावच्छिन्नदुष्टत्वलक्ष्यतावच्छेदकमिति यावत्साधनाप्रसिद्धस्थले च केवलधूमत्वादिकमेव तादृशं बोध्यं तद्रूपावच्छिन्नत्वविशिष्टदुष्टस्येत्यर्थः। अत्र
यत्किञ्चिद्रूपावच्छिन्नपक्षकत्वानिवेशे स्वलक्ष्यतावच्छेदकपरिष्कारे हेतुतावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकीभूतवह्न्यभाववद्धूमादिप्रकारक
व्याप्यर्थज्ञाने विषयधूमादौ पर्वतत्वसमानाधिकरणयत्किञ्चिद्रूपावच्छिन्नपक्षकत्वघटितलक्ष्यतावच्छेदकत्वाभावादिति व्याप्तिरतस्तद्रूपावच्छिन्नपक्षकत्वोपादानं एवमेव यत्किञ्चिद्रूपावच्छिन्नसाध्य
कत्वस्यानिवेशे जलत्वावच्छिन्नसाध्यकानुमितिमात्रे जलाभाववत्त्वस्य तादृशघटितत्वान्न समानाधिकरणयतद्रूपावच्छिन्नसाध्यकत्वघटिततादृशरूपाभावादिति व्याप्तिरतस्तद्रूपावच्छिन्नसाध्यकत्वोपा
दानं एवमेव तद्रूपावच्छिन्नहेतुकत्वानिवेशे पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकस्थले धूमत्वादिना दुष्टत्वाभावादिति व्याप्तिरतः तेन रूपेणेति। दृष्टप
दार्थतावच्छेदकतया तद्धूमनिवेशः पर्वतपक्षकवह्न्यादिसाध्यकधूमादिसद्धेतुव्याप्त्यनुपपत्तेन रूपेण सम्यग्दुष्टत्वस्य निवेशः। एतादृशरूपं लक्ष्यतावच्छेदकीभूतस्य यदि तत्सपक्षसाध्य

४०

41

२१

ते४

५८

हेतुकानुमितिप्रतिबंधकयथार्थज्ञानविषयत्वमात्रं लक्षणमुच्यते तेन तदाकृते वह्निमान् धूमादित्यादौ न्स भावव प्रदेश इति व्याप्तिः तत्र तादृशहेतुतावच्छेदकवत्त्वरूपत्वस्य तावच्छेदकाभावादित्य
र्थः एतल्लक्षणं यदि ज्ञायमानदोषप्रतिबंधकतामताभिप्रायेण तदा सद्धेतुस्थले दोषस्याप्रसिध्या यथार्थपदवैयर्थ्यं शंकते यद्यपीति। तथापीति। यद्यपि पर्वतत्वावच्छिन्नपक्षकेऽस्य
पि वाच्यं तथाप्यनुमितिविरोधिबाधादावेव तस्य व्यवहारविषयत्वे साविष्करणाय तेनोक्तं पर्वते धूमसाधने ह्रदादौ चेत्तदाभावो बोध्यः पर्वतपदरूपकारणासत्वात् धूमसाध्येन वह्नित्वेन
सनयोनिरर्थकत्वं मत्वा यथाश्रुतं समाधानमित्यभिमानेनाह वह्नित्वेनेत्यस्य सार्थक्यं शंकते न चेति। ननु स्वविषयकज्ञानविषयहेतुतावच्छेदके यत्संबंधावच्छिन्नायो प्रकृतानुमितिप्र
तिबंधकनिष्ठप्रकारता तत्व्याप्तिज्ञानविषयत्वं दुष्टत्वव्यवहारनियामकं तथा वह्नित्वेनैव ज्ञाप्यमपीति तादृशविषयत्वे वह्नित्वांशस्यासमे बाधेनैव तद्दोषवारणे यथार्थपदं व्यर्थमेवेत्सा
शयः तथासतीत्यादि। एतन्मते ज्ञायमानव्यभिचाराभावस्य व्याप्तिज्ञानमाद्यान्यथासिद्धत्वाभावेन व्यभिचारस्य साक्षादनुमितिप्रतिबंधकत्वस्य वक्तुमशक्यत्वाऽन्यलिंगकज्ञायमा
नव्यभिचारसत्वेऽन्यलिंगकानुमितेस्तत्साध्यव्यभिचारज्ञाने तल्लिंगकतत्पक्षकतत्साध्यकानुमितित्वं प्रतिबध्यतावच्छेदकोक्तौ ज्ञायमानव्यभिचारादेः प्रतिबंधकत्वं वाच्यं। यद्यपि पराम
र्शस्यैव तस्य प्रतिबंधकत्वं सुवचं तथापि केचित्तु कारीयग्रंथेऽनुमितिपदस्य समूहालंबनानुमितिपरतया व्याख्यानासत्वे धीलोचे यद्विमद्धाचार्यैरन्ये हेतुप्रकारकज्ञानजन्ये समि
धानादेवमभिहितं। तथा च वह्निर्धूमव्यभिचारीति ज्ञानानंतरं तद्व्यक्तिः धूमव्याप्येत्यन्यलिंगकव्याप्तिज्ञानजन्यधूमानुमितौ प्रतिबध्यतायास्तादृशानुमितौ तत्त्वे व्यापकत्वभंग इति व्याप्यको
टौ तल्लिंगकत्वनिवेशाभावरूपके इति तल्लाभो वह्नित्वेनेत्यनेन वाच्यः तथा सति तादृशविशिष्टोद्देश्यत्वमात्रस्यासंभवादेव बाधितत्वेन तादृशव्यवहारापत्तिर्दुर्वारैवेति तद्वारणाय यथार्थपदमावश्य
कमिति भावः। ननु वह्नित्वेन गुणाद्यग्राहिज्ञानजन्यानुमितेर्वह्नित्वविशिष्टहेतुज्ञानाजन्यता नास्ति वै अन्यैवं प्रतिबध्यप्रतिबंधकभावे वह्नित्वावच्छिन्नप्रकारताकव्याप्तिपरामर्शजन्यत्वप्रवेशेऽपि
लक्षणे तद्विशिष्टप्रकारकपरामर्शजन्यत्वोक्तौ न बाधकमिति चेत् क्वांचनमयवह्निहेतुकस्थले तदप्रसिद्धेः धूमव्याप्यवद्व्यलिंगकपरामर्शजन्यानुमितौ धूमव्यभिचारिवह्निप्रतिबध्य
तासत्वाच्च। एवं पर्वते वह्निसाधने धूमत्वेन धूमो दुष्ट इति व्यवहारापत्तिः हेतुतावच्छेदकीभूत धूमत्वघटितसंबंधेन द्रव्यत्वेन धूमप्रकारकज्ञानजन्यतादृशानुमितिप्रतिबंधकीभूतव
न्हिव्यभिचारिद्रव्यात्मकदोषप्रमासत्वाद्विशिष्टविषयिताकत्वनिवेशवैयर्थ्याच्चेत्सत आह तत्प्रकारतायां वेति। नन्वेवमपि पर्वते धूमसाधने वह्नित्वेन वह्निर्दुष्ट इति व्यवहारानुपपत्तिः आ
द्रूपेण जन्यवह्निहेतुकानुमितौ वह्नित्वावच्छिन्नधूमसाध्यकानुमितित्वसत्वेऽप्यप्रतिबध्यतया व्यापकताभंगादिति वाच्यं प्रकृत हेतुतावच्छेदकप्रकारतावच्छेदकतापर्याप्तेर्वाच्यत्वादिति

२१

व्यभिचारादेः साक्षादविरोधितामते तु प्रकृतपक्षांशे प्रकृतसाध्यव्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकत्वं तद्धेतुकत्वार्थ इति बोध्यं विशेष्य इति वह्नित्वेनेत्यस्य धूमसाध्यका

र्थकधूमपदस्य च सार्थक्यं साधने इति तु अन्यसाध्यधर्ममेव तत्सार्थक्यमभिप्रेत्याह धवेति। तथा च धूमसाधने इत्यस्य धूमसाध्यकवह्निहेतुकानुमितावित्यर्थः निरूपितत्वं सप्तम्यर्थः दुष्टधा

तोः प्रतिबंधकमात्रमर्थः क्तप्रत्ययार्थः प्रकारकज्ञानविषयत्वं तथा च धूमसाधने वह्नित्वेनायं दुष्ट इत्यादौ धूमसाध्यकवह्निहेतुकानुमितिप्रतिबंधकप्रकारकज्ञानविषयत्ववह्नित्वोभयत्वा

भ इति भावः साधनपदार्थानन्वयप्रसंगादिति। एतेन साधनपदार्थानुमितेरभेदेन धात्वर्थानुमितौ नान्वयः द्विधाभानापत्तेः साधनपदस्य सप्तम्यन्तत्वाच्च यदि च साधनं विधेयतानिरूपितत्वे स

प्तम्यर्थः वह्नित्वावच्छिन्नहेतुकानुमितिप्रतिबंधकं दुष्टधात्वर्थस्तदा धूमसाधनेऽनुमितिरिति व्यवहारापत्तिरिति सूचितं। एवमपीति। यथार्थपदादानेन तद्धर्मावच्छिन्ने दुष्टत्वव्यवहारे तद्धर्मावच्छिन्न

लिंगकानुमितेरेव दुष्टधात्वर्थघटकतया वह्नित्वावच्छिन्नहेतुकानुमितिमादाय रासभे तादृशव्यवहारस्य वारणात् किं यथार्थत्वेनेति तदसत् प्रकारतावच्छेदकसंबंधो यद्धर्मघटितः तद्धर्मावच्छिन्न

हेतुकानुमितेरेव तद्घटकत्वमित्याशयेन तदुपादानात्। अथ यथार्थपदादानेऽपि द्रव्यत्वेन वह्निसाधने द्रव्यं दुष्टमितिवत् धूमो दुष्ट इति व्यवहारप्रसंगः धूमे हेतुतावच्छेदकीभूतद्रव्यत्वघटितसंबंधेन द्रव्य

त्वेन धूमप्रकारकज्ञानजन्यतादृशानुमितिप्रतिबंधकीभूतवह्निव्यभिचारादिकमादाय लोके दोषप्रमासत्त्वात् दुष्टपदार्थान्वयितावच्छेदकत्वोपलक्षितधर्मावच्छिन्नलिंगकानुमितेः साधनपदार्थघ

टकत्वे वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारवारणाय यथार्थत्वं यथार्थं। एवं तद्रूपावच्छिन्नस्य दुष्टताव्यवहारस्थले तद्धर्मघटितसंबंधावच्छिन्नप्रकारताया एव भानमुपेयते स्वज्ञानविषयरास

भत्ववत्त्वे तु प्रकृतहेतुतावच्छेदकाघटितत्वात् संबंध एवेति किं यथार्थत्वेनेत्यतः सव्यभिचारादित्वलक्षणानां विरुद्धादिसांकर्याद्व्यवहारमात्रं प्रयोजनमास्तां इह तु व्याप्तिरिति व्याप्तिर्लिं

गत्वं निवेशयति अथवेति सद्धेतौ तद्विधनादौ तथा च दुष्टेतरभेदसूत्रे धूमव्याप्यत्वविशेषेऽनुमितिप्रतिबंधकीभूतधूमाभाववद्वृत्तिवह्निप्रकारकभ्रमविषयत्वस्य सत्त्वादिति भावः। अतो

यं व्याप्यप्रयोगः पर्वतपक्षकधूमसाध्यकवह्निहेतुकानुमितिजनकपरामर्शविषयतावच्छेदकहेतुतावच्छेदकावच्छिन्नः प्रकृतसाध्यनिरूपितव्याप्तिविशिष्टप्रकृतपक्षधर्मत्वरूपः स

द्धेतुतावच्छिन्नप्रतियोगिताकभेदवान् प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमितिप्रतिबंधकप्रकारकप्रमाविरोध्यत्वादिति। यत्तु प्रमापदानुपादाने पर्वतनिष्ठरूपादौ व्यभिचार इत्यतः प्रमापदमिति

तित्तत्त्ववह्निमान् धूमादित्यादौ समवायेन हेतौ व्यभिचारवारणाय हेतुतावच्छेदकसंबंधेन पक्षधर्मतायां वा अन्यतमाव्यभिचाराननुभवकत्वात् न त्वेवमपि धूमव्याप्यवह्नौ व्यभिचार इति चेन्न यतोऽय

द्रूपावच्छिन्नानुयोगिताकेन संबंधेन सद्धेतुतावत्तितदन्यरूपावच्छिन्नानुयोगिताकेन संबंधेन तत्तदवच्छिन्नभेदोऽप्युपेयते अव्याप्यवृत्तित्वात् एवं च तत्र तद्वह्नित्वावच्छिन्नानुयोगिताकेन सं

२२

बंधेन सद्धेतुत्वसत्वेपि तदवच्छिन्नभेदो वह्निःसावच्छिन्नानुयोगिताकेन संबंधेन धूमत्वएव यद्रूपावच्छिन्नानुयोगिताकेन संबंधेन हेतुता तद्रूपावच्छिन्नानुयोगिताकेन साध्यसाधनमभिमतं ।।
अन्यथा विशेष्यत्वमात्रस्यैव तत्साधकत्वसंभवात्तादृशाप्रमीयत्ववैयर्थ्यापातात् । अस्मीकं च धूमत्वावच्छिन्नानुयोगिताकसंबंधेन विशेष्यतावत्तितादृशसंबंधेन सद्धेतुभेदस्या
सत्वाद्व्यभिचारः स्यादिति तद्विशेषणस्यावश्यकत्वात् विशेष्यतायाश्च तद्वह्निसावच्छिन्नानुयोगिकसंबंधो न संबंधः एवं च तादृशधनरूपव्याप्यैद्रूप्यत्वादिना सद्धेतुत्वावच्छिन्नभे
दसत्वेपि नासंगतिः तदिंधनत्वावच्छिन्नानुयोगितासंबंधेन तथाविधज्ञानविषयतावत्तितादृशसंबंधेन साध्यसत्वेन व्यभिचारस्यातेरिति । यद्वा तथाविधहेतुतावच्छेदके सद्धे
तुभिन्नत्वावच्छेदकत्वसाधन--विशेष्यतावच्छेदकत्वेनाभिमतं एवं तन्नेन रूपादेः पक्षत्वस्थलानुरोधेन साध्यव्याप्यवच्छिन्नपक्षधर्मत्वावच्छिन्नोभयभेद एव एवमपि द्रव्यत्वावच्छिन्नासो
व्यकसत्तायां विशिष्टसत्तानिष्ठसद्धेतुत्वावच्छिन्नभेदविरहेण व्यभिचारः स्वाधिकरणावृत्तिसाध्याभावकत्वसद्धेतुत्वघटकमप्रसिद्धिरिति चेत् नहि तत्र सत्तात्वे सद्धेतुतावच्छेदकतापर्याप्त्य
धिकरणभेदः साधनीयः तत्रापि हेतोर्याथार्थ्यप्रयोजनं संभवतीति दिक् । अथवा सद्धेतुत्वावच्छिन्नापर्याप्तविषयतापर्याप्त्याश्रयत्वं रूपपारिभाषिकभेदः अनुपसंहारित्वरूप
दोषस्यालिंगघटकत्वं वह्निमत्ताप्रकारकप्रमाविषयत्वं धूमवत्ताप्रकारकप्रमाविषयत्वाद्याः व्याप्तिरेकव्याप्यव्यापकभावरूपव्यधिकरणसंबंधेन वाच्यत्वादिरूपसाध्याभावस्य तै
यत्वादिरूपपक्षे साधनेऽदुष्टं । वस्तुतस्तु सद्धेतुत्वं व्याप्यव्याप्यात्मकं नानैव यादृशपक्षसाध्यकेपावंतो दोषाः प्रसिध्यंति प्रतिबध्यानुमितिश्च तावत्सद्धेतुभेदा एव साधनी
याः तथा च कांचनमयपर्वतः कांचनमयगंधवान् कांचनमयत्वेत्यादिसाधर्म्ये गंधव्याप्यान्यत्वादीनामिवाबाधितान्यत्वादेरपि प्रसिद्धिरिति भावः । स्वाधिकरणावृत्तिसाध्याभाव
कत्वं च सद्धेतुत्वघटकमिति चेत् तर्हि तत्र सत्ताविदुष्टेतरत्वावच्छिन्नभेद एव वा साध्यः ननु एवं धूमवान्नमेयात् इत्यादौ दुष्टेतरप्रसिद्धिः सामान्यत एव वादुष्टेतराप्रसिद्धिः न च स्वज्ञानवि
षयप्रकृतहेतुतावच्छेदकवत्वसंबंधेन दुष्टत्वमेव साध्यं तस्यैव दुष्टेतरभेदरूपत्वादिति वाच्यं तथाविधधूमवान्नयकेरित्यादौ तादृशसंबंधावच्छिन्नसाध्याभाववत्तिरास्नभादौ तादृशप्रतिबं
धकप्रकारकभ्रमविषयतासत्वेन व्यभिचारसंभवात् सद्धेतावि असंगतं स्यादिति वाच्यं चेत्त्र केचित् सद्धेताविसस्य प्रकृतहेतुभिन्नो दुष्टार्थः यद्वा प्रकृतसाध्यव्यभिचारितावच्छेदकत्वो
पलक्षितधर्मवत्त्वसंबंधेन दुष्टत्वसाधनान्नातदसंगतिरित्याहुः वस्तुतस्तु यद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकत्वनिविषयकज्ञानविषयदुष्टतावच्छेदकत्वोपलक्षितयद्धर्मवत्त्व
संबंधावच्छिन्नप्रकारताकयथार्थज्ञानविषयत्वं यत्र तत्र तद्धर्मावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकनिष्ठतद्धर्मघटितसंबंधावच्छिन्नावच्छेदकताकभेदावच्छिन्नप्रतियोगिताके

(अव्यत्वादिघटिततादृशसंबंधेनापि सद्धेतावपि दुष्टत्वसत्वेन तदभावेनापि नैकान्तिक + व्यभिचारसंभवदूरस्थरसः) स्व

२२

भेदइति सामान्यमुखीप्राप्तौ पपार्थत्वानुपादाने सर्वेषामेव साधनानां सर्वसाध्यव्यभिचारित्वं संदेहतादवस्थ्येनेति प्रकाशनाय तथोक्तं। धूमवान् अग्नेरित्यादि साध्ये च धूमव्यभिचारित्वमेव त्ववि
शिष्टं चायोगोलकीयवह्निसाधारणवह्नित्वाद्यवच्छिन्नजवह्नौ रूपसमवायस्य वायौ सत्त्वेपि रूपस्यैव हेतुतावच्छेदकीभूतमेयत्वस्य सत्त्वेपि व्यभिचारस्याभावादित्याद्यैश्च नाघजन्यवह्निसाधनत्वेपि
कमेयत्वाद्यवच्छेदेन हेतुतावच्छेदनिर्वाहात्। अत्र च यद्रूपावच्छिन्नविषयतासामान्ये भिसादिनोपलक्षणीभूतेन तादृशविषयतावच्छेदकत्वेन दोषतावच्छेदकस्य निवेशनीयत्वेन भ्रान्तिः
तत्र दृष्टे तत्र दोषाद् वह्न्याभासस्यैव तत्र दोषप्रकारकीयपार्थज्ञानविषयतया हेतुना साधनीयत्वात् वस्तुतस्तु भेदस्य व्याप्यवृत्तित्वेनोक्तसंबंधेन दुष्टत्वमेव साधनीयं सर्वथा पक्षता
वच्छेदके स्वरूपसंबंधरूपसाध्यावच्छेदकत्वसाधनमभिमतं तेन पर्वतपक्षकवह्निसाध्यकधूमत्वेन धूमपक्षीकस्य दुष्टत्वसाधनस्य न प्रमात्वप्रसंगः तथा चोक्तं तेन संबंधेन तद्व्या
प्ये साधनसत्त्वेपि अव्यत्वादिना दुष्टत्वमस्त्येवेति। शुद्धहेतुतावच्छेदकं पुरस्कृत्य सविशिष्टहेतुतावच्छेदकरूपव्यभिचारादेरव्यवहार्यत्वात् तद्वत्साधनीयमित्यप्याहुः। अत्र च वह्निमान् द्रव्यादिति
प्रयोगः स्यात् द्रव्यत्वसामानाधिकरण्येन साध्यव्याप्तिसत्त्वादिति न दोषः तथा सति सामानाधिकरण्येन व्यभिचारस्याविरोधितयाऽवच्छेदकावच्छेदेनाप्रसिद्धतया निर्दुष्टत्वं स्यादित्यवच्छेद
कावच्छेदेन व्याप्यपक्षणात् इदं तु बोध्यं तृतीयान्तप्रकृतलिंगवाचकपदस्य समभिव्याहारस्थले एवानुमितेः समभिव्याहृतदुष्टपदार्थान्वयितावच्छेदकधर्मावच्छिन्नहेतुकत्वेन साध
नादिपदार्थमध्ये प्रवेशः अन्यत्र तदविशेषितानुमितित्वेनेति वह्निना धूमसाधने वह्निर्दुष्ट इत्यादौ तृतीयार्थान्वयः अन्यथा वह्नौ तदर्थतादात्म्यान्वये स्ववह्निहेतुकानुमितौ न तृ
तीयार्थवह्निहेतुकत्वान्वयानुपपत्तिः एतेन वह्निने सत्र तृतीयायाः अभेदार्थकत्वे अव्यावृत्तस्य भेदस्याऽनिघ्नत्वव्यवहारनियामकतयोपपत्तेरेवं पार्थपदं व्यर्थमित्यत आह एवेति प्र
सुक्तं। धान्येन धान्यमिति प्रयोगवारणाय दृष्टस्वाभेदस्याप्यन्वयस्याप्रसक्ततया वह्निना धूमसाधने वह्निर्दुष्ट इति व्यवहारानुपपत्तिप्रसंगात्। एतेन तृतीयान्तस्य वह्निसा
धनहेतुकत्वापर्याक्षेपि पदार्थपदोपादाने पि वह्निना धूमसाधने रासभो दुष्ट इति व्यवहारो दुर्वारः अनुमितिसामान्यपर्यंतानिवेशेन रासभवन्नुभयलिंगकानुमितेः साधनप
दार्थत्वसंभवादित्यपास्तं। किंचिल्लिंगकत्वपुरस्कारेण तृतीयान्तार्थान्वयस्याप्रसक्तत्वात् तन्नव्ये पर्वते धूमसाधने वह्निर्दुष्ट इत्यादौ यद् द्रुमाभाववद्वृत्तित्वविशिष्टवह्नित्वं तदवच्छिन्न
विषयतासामान्ये प्रकृतानुमितिप्रतिबंधकतावच्छेदकं तद्विशिष्टप्रकारकप्रमाविषयत्वप्रसेनत्वं तथा च पर्वते वह्निसाधने धूमो न दुष्ट इति व्यवहारानुपपत्तिः न च समभिव्या

=तादृशप्रतिबंधकतावच्छेदकविषयतात्वादिनेसर्वत्र=

२२

हारस्थले यत्र धर्मिणि यद्वत्त्वं प्रतीयते न तु समभिव्याहारे तत्र धर्मिणि तत्संबंधावच्छिन्नतदभावबोधनियमात् तत्र समभिव्याहृतपदार्थान्वितहुतभुग्व्याप्यधूमासत्वाप्रसिध्या तदभाव
बोधासंभवादिति चेत् सत्यं न तत्र समभिव्याहारे स्वविशेष्यतानिरूपितप्रमीयप्रकारताश्रयविशेष्यकप्रमानिरूपितत्वाभावविशिष्टत्वस्य सपक्षकत्वसाध्यकत्वहेतुकानुमितिप्रतिबंधक
तावच्छेदकीभूतविषयताकाभेदः प्रतीयतेऽनन्यगतिकत्वात् विषयतात्वावच्छेदेन तादृशानिरूपितत्वाभावो बोध्यः तेन साध्याभावत्वादिनाव्यावगाहि व्यभिचारादिभ्रमप्रमा
दाय धूमसाधने वह्निर्न दुष्ट इत्यादिव्यवहारः इत्थं चेतरभेदानुमापकमेवेदं लक्षणं व्यवहारस्तु तादृशप्रतिबंधकतावच्छेदकप्रमीयविषयताविशिष्टप्रकारकप्रमाविशेष्यत्वनिबं
धनत्वेनैवेति न चैवं क्रियाधूमसाधने रासभो न दुष्ट इति व्यवहारस्येतन्मतेऽपि रासभविशेष्यतानिरूपितप्रमाप्रकारताश्रयविशेष्यकप्रमानिरूपितत्वाभावविशिष्टतादृशप्रतिबंधक
क तावच्छेदकविषयताकाभेदविषयकतया स्वविशेष्यतानिरूपितप्रमाप्रकारत्वाभावविशिष्टतादृशप्रतिबंधकतावच्छेदकप्रमाविषयताकाभेदविषयतया वोपपादनीयः न चैवम
पि क्रमेण वह्निसाधने धूमो दुष्ट इति व्यवहारापत्तिः क्रमेण वह्निसाधने धूमो न दुष्ट इति व्यवहारानुपपत्तिश्च यदि च वह्निव्यभिचारित्वद्रव्यवान् धूम इति ज्ञानस्य प्रमात्वादिति चेन्न
धर्मितावच्छेदकतापन्नहेतुतावच्छेदकस्यैव प्रकारतावच्छेदकसंबंधघटकत्वात् तादृशप्रतिबंधकतासमानाधिकरणप्रकारतानिरूपितसंसर्गतासामान्ये स्वविशेष्यत्वाभावः
स्वनिरूपकप्रमानिरूपितत्वस्वावच्छेदकवृत्तित्वोभयसंबंधावच्छिन्नप्रतियोगिताको वा बोध्यः तेन द्रव्यत्वघटितेन धूमत्वघटितेन वा संबंधेन क्रमेण वह्निसाधने धूमो दुष्ट इति भ्रमसंभवेऽपि
नानुपपत्तिरिति दुष्टत्वस्य प्रतिबंधकतामात्रं दूषकत्वमर्थः स्वविशिष्टप्रकारताकप्रमाविशेष्यतासंबंधावच्छिन्नाश्रयत्वं तत्प्रत्ययार्थः वैशिष्ट्यं च स्वावच्छिन्नविषयतात्वव्यापकतद
वच्छेदकताकधर्मवत्त्वसंबंधेन तदधिकरणे स्वरूपसंबंधेन वृत्तित्वरूपसामानाधिकरण्यसंबंधेन एवं च न दुष्टत्वस्य तादृशाधिकरणसंबंधावच्छिन्नाभावप्रत्ययः अन्यथा साप
सपार्थस्य संसर्गतोपगमादिति तु न्यायः अत्रापि तृतीयलक्षणेऽपि ज्ञानीयतानच रूपत्वादिमानि सांशे जातिमहत्त्वितस्याभावादेः प्रतिबंधकत्वप्रसंगः यतः पक्षताव
च्छेदकांशे निरवच्छिन्नावच्छेदकतैव निवेश्या जलवद्वृत्तित्वस्याभावादेः पक्षतावच्छेदकतावच्छेदके जलत्वांशे चेत् स्यादिति यथायथमूह्यं निरवच्छिन्नत्वाप्रवेशेन विष
यतायाः संसर्गत्वेन तदीयसंबंधद्याघटितविशेषणवत्त्वाधवादाहा तादृशेति जातित्वावच्छिन्नविषयिताघटितविषयतायाश्च न प्रतिबंधकतावच्छेदकताघटकसंबंधघता स्वविषयतात्वात्

२२

धा

(ऽअतस्तद्वारकविशेष्यांशे नोपादेयमिति भावः)

ज्ञानत्वेन प्रतिबंधकतावच्छेदकत्वे च लाघवमेवेति तत्कल्पायतारबीजं बोध्यं असाधारण्येन प्रतिबध्यज्ञान धर्मितावच्छेदकावच्छिन्नविशेष्यतानिरूपित तद्धर्मावच्छिन्नप्रकारताशालि ज्ञा
नविशिष्टत्वाज्ञानीया साधारण्यत्वावच्छिन्नविषयतानिरूपित तद्धर्मावच्छिन्नविषयतावत्त्वेन प्रतिबंध्यकत्वं बोध्यं प्रतिबंधकता कालिकसंबंधेन बोध्या। यद्रूपेति। यद्विषयतासामान्य
निवेशे वन्ह्यभावविशिष्टह्रदस्य ह्रदत्वेन ज्ञानन्यतया तद्विषयतासामान्य(निवेश)स्य न प्रतिबंधकतावच्छेदकत्वमिति यद्रूपानुधावनेन वन्ह्यभाववान् ह्रद इति ज्ञानीयवन्ह्यभावप्रकारतायाः स्वरूप
संबंधरूपावच्छेदकता तत्र वन्ह्यभावेऽतिव्याप्तिरतः सामान्यपदोपादानं दोषलक्षणस्याप्रकृतत्वेन वन्ह्यभाववज्जलादिमद्धति जलवन्ह्रदादिकमादाय दुष्टत्वापत्तेः। दोषघटितत्व
कथनं तु दोषेणाविघटितत्वप्रदर्शकमिति न तद्विरोधः। ननु समानाकारकज्ञानीयविषयतामादाय पाषाणमयो वह्निमान् पर्वत इत्यपाषाणमय इति ज्ञानीयपाषाणमयत्वविशि
ष्टपर्वतनिष्ठविषयतासामान्यस्य प्रकृतानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकत्वाभावे तेन तद्रूपावच्छिन्नपाषाणमयपर्वततत्प्रकारकमथार्थ
ज्ञानविषयत्वस्य धूमे सत्वेनातिव्याप्तिरतो नतिरिक्तवृत्तित्वनिवेशः। प्रतिबंधकताया ऽव्याप्यवृत्तित्वे स्वीकार्ये तेनान्यसामान्यपदस्यार्थेन च पर्वतो वन्ह्यभाववानिति ज्ञानीयवन्ह्यभावत्वावच्छिन्नप्र
कारतानिरूपितत्वाद्यसंभववारणाय प्रतिबंधकत्वाभावाधिकरणतावच्छेदककालावच्छिन्नतद्धस्याधिकरणतानिरूपकत्वस्यानतिरिक्तवृत्तित्वरूपत्वात्स्या ह्रदपर्याप्तानीयविषय
तायाऽप्रतिबंधकतातिरिक्तवृत्तित्वेनासंभवोऽतः। अनाहार्यप्रामाण्यज्ञानानास्कंदितनिश्चयीयविविषयितानिवेशस्तात्राविविशिष्टस्य शुद्धादनतिरिक्तत्वात्प्रतिबंधकतानति
रिक्तवृत्तित्वं दुर्घटमिति प्रतिबंधकतायां तद्व्यापकत्वमेव निवेश्यं तत्त्वतादृशविशिष्टविषयताधिकरणतावच्छेदककालावच्छिन्नतद्धस्य भावप्रतियोगितानवच्छेदकत्वं तत्र तादृश
विशिष्टविषयतासावच्छिन्नाधिकरणतामवेशान्नासंभवो न वा पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिप्रतिबंधकताधातादृशान्निश्चयनिरूपितत्वविशिष्टवन्ह्यभावत्वाव
च्छिन्नविषयतात्वावच्छिन्नाव्यापकत्वात् वन्ह्यभावेऽतिव्याप्तिरिति चेन्न प्रतियोगितारूपप्रतिबंधकतायां अव्याप्यवृत्तित्वेन पर्वते वन्ह्यभाव इति ज्ञानीयविषयत्वावच्छिन्नप्रतिबंधक
ताया वन्ह्यभावत्वावच्छिन्नविषयतात्वावच्छिन्नव्यापकतया वन्ह्यभावेऽतः करीसापाषाणमयपर्वते चातिव्याप्तिर्दुर्वार एवेति स्वरूपसंबंधरूपावच्छेदकत्वस्यैव निवेशः वन्ह्यभाव
त्वावच्छिन्नविषयताविशेषस्य तादृशावच्छेदकत्वात्तद्दोषो दुर्वार इति सामान्यपदनिवेशः ज्ञानभेदेन विषयताभेदस्योक्तत्वात् लक्षणकृत्सम्मततया पाषाणमयत्वविशिष्टपर्व

तेनातिव्याप्तिः। अविशिष्टज्ञानीयविषयतायाः सामान्याभावगतायाः अनवच्छेदकत्वात् यद्रूपावच्छिन्नविषयतायां पक्षधर्मताज्ञानकालीनासाधारण्यविषयकज्ञानीयान्य
त्वोपादानात् असाधारण्यसंग्रहः संशयादिविषयताया अनवच्छेदकतया निश्चयनिरूपितत्वं विषयताविशेषणं निवेश्यं। तदभेदमते तु यद्रूपावच्छिन्नविषयताशालिज्ञानसामा
न्यं प्रतिबंधकतावच्छेदकमित्युक्तौ पाषाणमयपर्वतादिमुद्रासः परं तु असाधारण्यं पक्षवृत्तित्वघटितं तद्घटितत्वेन तु पूर्वोक्तत्वानापत्तेः देयमिति दिक्। यद्रूपावच्छिन्नविषयि
तायां प्रतिबंधकतावच्छेदकत्वं युक्तं स्यादिति। रूद्धत्वेति सामान्यपदोपादानव्यवच्छेद्यं स्फुटयति सद्धेतुस्थलेऽपीति। ज्ञायमानेति। तथा च षष्ठीसमासोऽयं यः तद्धेतुतावच्छेदकेति
दोषाति व्याप्तिवारणार्थं यथार्थेति। अन्यथा पर्वतो निर्वह्निर्धूमश्चेति ज्ञाने आरोपात् दोषेति। तेन नोपधेयसंकरेऽपीत्यादिग्रंथसंगतिः आपस्येति आघोनरं दुष्टपा
त्वर्थकहेत्वाभासपदं मूले पूरणीयमित्याशयः तत्त्वं वेति। मूले वा तत्त्वमिति योजना। निर्देश्यत्वादिति। यथार्थपदद्वैयर्थ्याद्वारात्। श्रीरामः
श्रीसीतारामचंद्राभ्यां नमः। निष्प्रयोजनकत्वेति। ननु लिंगात् ज्ञानमिति अनुमानलिंगज्ञानं दोषानुमितिः तथा चानुमितिनिष्ठयादृशविशिष्टविषयकत्वं प्रकृतानुमितिविरोधितानतिरिक्त
वृत्तित्वमितिलक्षणं सुवचं तथा चाप्रामाण्यज्ञानानास्कंदिततत्वमात्रं निवेश्यं न तत्त्वनाहार्यत्वनिश्चयत्वे अपि परोक्षज्ञाने आहार्यत्वसंशयत्वयोरभावादिति चेन्न दोषविषयकानुमिस
प्रसिद्धिस्थलेऽव्याप्तेः परं तु आकांक्षायोग्यतानस्यैवविनिगमनाविरहेण प्रवेशास्यात्तावता पुनरुक्तत्वाव्यवस्थानपायादित्याहुः येनु कार्यं नि संकार्यत्वादित्यादावनिसकार्यं दोषः तद
नुमितौ यो हेतुस्तस्य पक्षवृत्तित्वेऽसाधारण्यमन्यथा सव्यभिचारित्वमितितद्वित्तौ इदानीं यादृशविशिष्टविषयकत्वविवक्षणात् प्राक्कासत्वेनेति। यसद्दस्याखंडव्यक्तिवचनत्वात्
दोषितो विशिष्टपदस्य लक्षणसमन्वयप्रदर्शकतया यादृशविशिष्टविषयकत्वं लक्षणघटकं तद्दर्शयति यद्रूपेति। यद्रूपावच्छिन्नं विषयो विषयितानिरूपकं यस्येति विग्रहे
विशेषणीभूतधर्मांतरविशिष्टेन विशेष्यस्य भाने तादृशधर्मांतरविशिष्टे विशेष्यांशेऽपि तावच्छेदकत्वभानं नियमात् यद्रूपावच्छिन्नत्वं तद्वृत्तिविषयताकत्वस्यालाभादित्यन्यत्र विस्तरः
अथ यद्रूपावच्छेन किंधर्मत्वं दोषतावच्छेदकमिति चेत् यदि वन्ह्यभाववद्ध्रदत्वोभयं तदेकत्र ह्रद इति रीत्या जायमानेयं वन्ह्यभाववान् ह्रद इति ज्ञानेऽपि वन्ह्यभाववद्ध्रदत्वोभयावच्छिन्नविषयि

नोसत्तात्तादृशज्ञानस्य रूपस्य फलवन्निसाध्यकानुमितिप्रतिबंधकत्वादसंभवः यदि च समूहालंबने विशेष्यत्वं नैकनिरूपकप्रकारताभेदेन भेदादतो न दोष इत्युच्यते तदा विवन्च
भावधर्मितावच्छेदककरूपत्वप्रकारकज्ञाने पिताहृशाविषयितासत्वेन तस्य चासमानधर्मितावच्छेदककतया प्रकृतानुमितिप्रतिबंधकतात्प्रसंभवात् । न च सामानाधिकरण्यसंबंधे
न वह्न्यभावविशिष्टरूपत्वमेव यद्रूपपदेन ग्राह्यं अभवति च रूपे वह्न्यभाववानिति ज्ञाने विशिष्टवैशिष्ट्यबोधमर्यादया उद्देश्यविधेयभावमर्यादया वा उद्देश्यतावच्छेदके रूपत्वे वन्ह्यभावादेः
सामानाधिकरण्येन भानं स्याद्बोधादावानुभविकं अत एवानुमितेः पक्षतावच्छेदकांशे साध्यसामानाधिकरण्यावगाहित्वमपि तत्र तत्रोक्तं संगच्छते इति वाच्यं । तथा सति वह्न्यभावत्ववि
शिष्टरूपत्ववानिति निर्धर्मितावच्छेदककज्ञाने विनाहृशाविषयतायाः सत्वेन तस्याः प्रतिबंधकतातिरिक्तत्वकल्पने नासंभवापत्तेः । न च यद्रूपावच्छिन्नप्रकारितानिरूपितयद्रूपावच्छिन्नविशेष्य
त्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नविशिष्टतद्रूपावच्छिन्नमेव यद्रूपावच्छिन्ने साध्यस्तत्र च नोक्तदोषाणामवकाश इति वाच्यं घटो न पृथिवी भेदसाध्यके शुद्धपृ
थिवीत्ववद्रूपदे बाधतया तत्राव्याप्तेः घटः पृथिवीति प्रतिबंधकज्ञानीयपृथिवीत्वप्रकारतायाः निरवच्छिन्नत्वेन यद्रूपावच्छिन्नेत्यनेनोपादातुमशक्यत्वात् । न च साध्यहेतुभेदेन लक्षणाभेदा
त् तत्र सत्यलक्षणे यत्प्रकारत्वेव प्रवेश्या न तु यद्रूपावच्छिन्नप्रकारतानिवेशस्य किं चित्करत्वादिति वाच्यं । तथा सति घटः पृथिवीभिन्नो मेयत्वादित्यादौ पृथिवीत्वविशिष्टमेयत्वरूपव्यापि (दो॰प)
(...ष्य॰) याव्याप्तेः । पृथिवीनिरूपितायेयत्वप्रकारतानिरूपितमेयत्वेत्यवच्छिन्नविशेष्यतानिरूपकत्वस्य वृत्तिप्रमेयत्वनिसाधप्रतिबंधकसाधारण्यात् यद्रूपावच्छिन्नप्रकारता
(ता॰) निवेशो च तद्रूपत्वीयबोधासंग्रहात् । किं च रूपे वन्ह्यभाववानिसादौ प्रकारितानिरूपवह्न्यभावत्वावच्छिन्नत्वं किं वृत्तिवह्न्यभावत्वोभयावच्छिन्नत्वं उत वह्निविशिष्टाभावत्वावच्छि
न्नं चेत् दुर्भयमपि पूर्वोक्तदूषणमस्त्येतिमैवं यतो वह्नित्वावच्छिन्नविशिष्टाभावरूपत्वोभयमेव यद्रूपपदेन धर्मद्वयपरं तेनोक्तदोषवारणाय प्रकृतानुमितौ यद्धर्मावच्छिन्नांशे य
द्धर्मावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टं तद्धर्मावच्छिन्नाभावत्वावच्छिन्नप्रकारतातद्धर्मावच्छिन्नाभावव्याप्यत्वावच्छिन्नप्रकारतान्यतरनिरूपिततद्धर्मावच्छिन्नविशे
ष्यताभिन्नतद्धर्मावच्छिन्नाभावत्वतद्धर्मावच्छिन्नाभावव्याप्यत्वान्यतरावच्छिन्नप्रकारतानिरूपितायाविशेष्यतानन्तदनिरूपकत्वं निश्चयविशेषणं देयं । उक्तज्ञानयोस्ताद

पा॰१

२५ त्वाविशेष्यतानिरूपकत्वेनानुगतासाधारणासंभवः अत्र च तद्धर्मावच्छिन्नविशेष्यतापर्यन्तमुपादाय तन्निरूपकत्वस्य ज्ञाने विशेषणत्वे एकदेशान्वयापत्तिरतो न तदुपगर्भतापि किंचिन्ना
दृशविशेष्यतानिवेशेऽसंभवदुःस्थतो यायेति। कश्चित्तु निर्वह्निर्ह्रद इति वह्न्यभाववत्त्वेन विशेष्यतायां ह्रदत्वप्रकारतानिरूपितता द्रव्यविशेष्यतायाश्च तादृशविशेष्यता
भिन्नत्वेनासंभवदुःस्थतो भेदानुयोगिविशेष्यतायां तादृशप्रकारतानिरूपितत्वनिवेशः वह्न्यभाववति ह्रदत्वमानेन ह्रदत्वावच्छिन्नविशेष्यतासत्त्वेन संग्रहप्रसंग इति भेदप्र
तियोगिकोटौ निरूपितत्वांतोपादानं अन्यथा प्रतिबंधकेतुल्यतया वह्न्यभावह्रदत्वोभयावच्छिन्नप्रतियोगिकधर्मितत्प्रकारकज्ञाने धर्मांतरप्रकारतानिरूपितविशेष्यतापादे ह्रदत्वा
वच्छिन्नत्वेन ● वह्न्यभावप्रकारतानिरूपितविशेष्यताकत्वात् तद्भिन्नविशेष्यतात्वस्य सत्त्वादसंभवः। न हि तादृशान्यतरप्रकारतानिरूप्यतावच्छेदकीभूततद्धर्मावच्छिन्न
विशेष्यतात्वावच्छिन्नभिन्नत्वनिवेशेन निस्तारः स्वादृशविशेष्यतात्वस्य तत्साधारण्यादिति चेत्तर्हि तादृशान्यतरप्रकारतानिरूप्यतावच्छिन्नतद्धर्मनिरूपितावच्छेदकता
घटकं च तद्धर्मावच्छिन्नाभाववत्ताप्यान्यतरप्रकारतानिरूप्यत्वं तद्विशेष्यतानिरूपकत्वं वा अंतद्धर्मनिरूपितावच्छेदकत्वावच्छेदकीभूततादृशानिरूप्यतान्यत्वमपट
कांतार्थः। वस्तुतस्तु व्यापकविषयताशून्यत्वस्यापेक्षकत्वाद्याश्रुतमेव सम्यक् अत एव पर्वतो वह्न्यभाववानित्यादौ वह्निमत्त्वे तादृशसंग्रहो दुर्वार इति चेन्न। स
तद्धर्मावच्छिन्नाभाववत्त्वावच्छिन्नप्रकारताशालित्वेन तद्धर्मावच्छिन्नाभावप्रतियोगितावच्छेदकावच्छिन्नप्रकारताया अभिधानात्। भेदप्रतियोगिकोटौ तद्धर्मावच्छिन्ना
भाववत्ताप्यत्वावच्छिन्नप्रकारतानिवेशान्नसत्त्वेति पक्षासंग्रहः। अथ वह्न्यभाववज्जलादिमद्वृत्तिजलत्वप्रह्रादेर्धारणादिविशिष्टबुद्ध्या घटितत्वमनावश्यकमिति।
येन तद्व्यापकसामानाधिकरण्यस्य सत्त्वेति पक्षघटकतामनेन तत्राव्याप्तिवारणाय भेदानुयोगिनि तद्धर्मावच्छिन्नाभाववत्त्वमात्रावच्छिन्नप्रकारतानिवेशन्यायात्संबंध
किंचिद्विशेषितवह्न्यभावघटितवह्न्यभाववज्जलादिमद्वृत्तिजलत्वप्रह्रदादिवारणाय विशिष्टबुद्ध्या घटितत्वमव्याप्यवृत्तिकं। वस्तुतस्तु वह्न्यभाववत्समान २५

50

कालीनत्वदोषवन्निमानिसाधारणोपसंग्रहार्थं भेदानुयोगिविशेष्यतायां मुख्यत्वमावच्छेदकं एवं च बाधनिश्चयीयमहत्त्वप्रकारतानिरूपितविशेष्यतायाः साधारणाय
भेदानुयोगिविशेष्यतायां निरूपितत्वांतमुपात्तं । किंचिदवच्छिन्नत्वमुनिवेशोनुपक्रमत्वमिति विशेषणानां संग्रहायेति तथा च विशिष्टेच्छया घटितत्वमावच्छेदकं अ
साधारण्ये च तद्विशिष्टेच्छैव विशिष्टस्यानुग्राहित्वान्न माद्यभेदप्रतियोगिविशेष्यताप्रसिद्धिः अथ हेतुतावच्छेदकं पुरस्कृत्य सैवासाधारण्यज्ञानप्रतिबंधकं एवं च
साध्यव्यापकीभूताभावप्रतियोगित्वं धर्मितावच्छेदकीभूतस्य हेतुतावच्छेदकविषयकज्ञानीयतावच्छेदकविशेषणसाधारण्यान्निर्दुर्वारं एवेति चेत् तद्धर्मावच्छिन्नाभाव
त्वावच्छेदकत्वावच्छिन्नत्वतद्धर्मावच्छिन्नाभावत्वावच्छिन्नव्याप्यतावच्छेदकत्वावच्छिन्नत्वान्यतरत्वप्रतिबंधकतावच्छेदकताश्रयप्रकारतान्यतद्धर्मावच्छिन्नाभावत्वत
सो॰३ द्धर्मावच्छिन्नाभावव्याप्यत्वान्यतरावच्छिन्नविषयतानिरूपकत्वमेव निश्चयविशेषणं । वन्ह्यभावादिरूपैकदेशे साधारण्यविषयतानिरूपकत्वस्य त्यागः । अत्र च
रतीसादिकस्ये च प्रतिबंधकतावच्छेदकताज्ञाने प्रयोजकत्वमिति बोध्यं । अथ घटः पृथिवीभिन्नो भेदत्वादित्यादौ स्वरूपतः पृथिवीत्वघटितत्वे पृथिवीत्वव्यवच्छेदाव
च्छिन्नः पृथिवीत्वघटत्वयोः स्वरूपतः एकत्र द्वयमिति रीत्याऽवगाहमानस्य पृथिवीत्वावच्छिन्नघटत्वज्ञानस्य चाप्रतिबंधकस्य तस्त्रीनीयपृथिवीत्वप्रकारतायाः पृथि
न वीभेदाभावत्वावच्छिन्नत्वेनानाधारणात् न च भेदानुयोगिविशेष्यताघटकप्रकारतायामनंतरभावत्वावच्छिन्नत्वं निवेश्यते किंतु तदभाववत्त्वमिति न दोष इति वाच्यं घटः पृथिवीति
बोधस्यानासंग्रहप्रसंगात् तत्र पृथिवीत्वस्य स्वरूपतो भानेन तादृशपृथिवीभेदाभाववत्त्वावच्छिन्नप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यताशून्यत्वात् तदभाववत्त्वप्रका
रतानिरूपितविशेष्यतायाः एवं सत्ता तन्नवे भेदप्रतियोगिकोपायविप्रकारतायां तद्धर्मावच्छिन्नाभावत्वावच्छिन्नत्वपरिहाय तद्धर्मावच्छिन्नाभाववत्त्वनिवेशान्न दोष इति
वाच्यं । तथा सति घटो घटवानिति घटत्वधर्मितावच्छेदकस्य घटत्वेन पृथिवीत्वे भेदस्याप्रतिबंधकस्य संग्रहप्रसंगात् अव्यापकविषयताशून्यत्वाच्च । अथ पृथिवीघट
त्वीयभासकयत्प्रकारावच्छिन्ननिरूपितविलक्षणविषयितैव वाच्या इति समाधानं तर्हि अभाववत्त्वेन रूपेणावगाहि अभाववान् वन्ह्यभाववानिति ज्ञानस्यैव तादृशविलक्षणवि

उभयवान्वह्निमानित्यादौ वन्ह्यभावद्वन्द्वाभाववदात्मकव्याप्तेऽभावत्वेन वन्ह्यभावावच्छिन्नविरोध्यकस्य हेतुविषयेऽतिव्याप्तिरतो भावत्वावच्छिन्नत्वनिवेशः ५

२५ ष्यिता शून्यत्वेन धारणात् । अव्यापकविषयिताशून्यत्वोपादानेऽप्यसंभवशंकानुत्थितास्यात् । वस्तुतोऽव्यापकविषयिताशून्यत्वमेवोच्छिद्येत जातिमान्वन्ह्यभाववानिति ज्ञानादेरपि धारणात्
न च यद्रूपावच्छिन्नविषयितानिरूपितविषयितानिरूपितस्वान्ययद्रूपावच्छिन्नविषयितात्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यादिरीत्या निवेशाद्
दोषः घटवानिति उक्तज्ञानवारणमिति चेन्न तत्र एकदेशातिव्याप्तिवारणाय तेन रूपेणोपादानासंगतिः अव्यापकविषयिताशून्यत्वस्यैव सकलैकदेशातिव्याप्तिवारणक्षमत्वात् । अत्र व
दंति उभयत्रावच्छेदकत्वोत्कीर्तनं प्रामाणिकेन तद्धर्मावच्छिन्नाभाववत्ताज्ञानं प्रतियोग्यनुयोगिप्रविष्टप्रकारताया विशेषणघटकत्वे वृच्छिन्नत्वस्य निष्फलत्वात् घटो घटवानिति ज्ञानवारणाय तु
स्वाभाववन्निष्ठत्वादिविशेषणेनैवं यथाश्रुताव्यापकविषयिताशून्यत्वप्रवेशमपि प्रेसमन्त्यद्वोपादानमिति । अथवा प्रकृतानुमितौ यद्द्रौपदवगाहित्वनिविष्टं तदभावतद्व्याप्यान्यतरावच्छि
न्नानि विषयताभिन्नकिंचिद्वच्छिन्नमुख्यविशेष्यतानिरूपकत्वं निर्णयविशेषणं अत्र वन्ह्यभाववन्ह्यभावव्याप्यवान्धर्मितावच्छेदकीकृतसत्ताज्ञानवारणाय भिन्नान्तं तत्प्रकारताया
भावच्छेदकतात्वेन निवेशः तेन वन्ह्यभावप्रकारतारूपावच्छेदकताकदोषज्ञानसंग्रहः विषयतापदं विशेष्यतापरमिति केचित् । एके अद्यमितिरीत्या ज्ञानवारणायावच्छिन्नान्तं
न मेयाभावत्वावच्छिन्नविशेष्यतावारणाय मुख्येति । एतत्कल्पे विशिष्टद्व्याघटितत्वभावस्य कांननु ह्रदोऽभाववान्वन्ह्यभाववान् ह्रदे इति ज्ञाने ह्रदत्वं धर्मितावच्छेदकीकृत्याभावव
ताधारस्तु अतथा वन्ह्यभावह्रदत्वयोश्चावगाहि समूहालंबने । प्रतिबंधकेतद्विशेषणस्त्वादसंभवः न च मुख्यविशेष्यताद्या निरूपकत्वमेवदेयं किंचिदवच्छिन्नत्वेवैयर्थ्यात् एवं ज्ञाने पि ६
एतद्विशेषणानिवेश्यते किंतु यद्रूपावच्छिन्नविषयितायां तदभावत्वतदभावव्याप्यत्वान्यतरावच्छिन्नधर्मितावच्छेदकतानिरूपितत्वं किंचिद्धर्मनिष्ठधर्मितावच्छेदकत्वनिरूपितमु
ख्यविशेष्यतानिरूपितत्वं विशेषणमिति तु तदासः वन्ह्यभावावच्छिन्नविशेष्यताकस्य अनिरूपकत्वात् तेन ह्रदेऽन्यतया वन्ह्यभावह्रदत्वोभयावगाहिन अश्चानिरूपितत्वात् तेन मुद्रा
सः एवं च घटो वन्ह्यभाववान् वन्ह्यभाववान् ह्रद इति ज्ञानस्यापि मुद्रासो जायते मुख्यत्वं तु स्वरूपकीर्तनमात्रं यद्रूपापर्याप्तावच्छेदकताकान्यत्वं वा तदर्थः तेन धर्मान्तरावच्छिन्नाविशेष्य
तु व्याप्तया ह्रदत्वं वन्ह्यभावोभयावगाहिज्ञाने मुद्रासः यद्रूपान्यावच्छिन्नविषयिताशून्यत्वं तु नोक्तं । प्रमेयवान् प्रमेयाभाववानित्यादौ यद्रूपभिन्नाप्रसिद्धेः अव्यापकविषयिताशून्य १६
त्वेन वा वारणं वन्हिमत्त्वसर्वताधात्मकव्यापसंग्रहः । कोन्वतः अत्र च यद्रूपावच्छिन्नत्वं यद्रूपनिष्ठावच्छेदकतानिरूपकत्वं अवच्छेदकत्वं च विषयताविशेषः नन्वेवमपर्याप्ताव मा
१ (प्रतिबंधकतावच्छेदकीभूततदभावप्रकारतान्यतदभावप्रकारत्वानिरूपकत्वरूपतन्निष्कर्षेणावगततद्धर्मावच्छिन्नाभावत्वावच्छिन्नत्वतद्धर्मावच्छिन्नाभावत्वावच्छिन्नव्याप्यत्वावच्छिन्नत्वान्य)
तरवदादे [illegible] वैयर्थ्यात् १)

वन्ह्यभावं ५

७ वान् ह्रद इति ज्ञानेपि वह्न्यभावावच्छिन्नविषयकत्वमक्षतं अभावस्य वह्निविशिष्टाभावादनतिरिक्ततया तन्निष्ठावच्छेदकतानिरूपकत्वरूपावच्छिन्नत्वस्याव्याहतत्वादिति चेन्न यतो शुद्धसत्ता
त्वावच्छिन्ननिरूपितायामपि गुणादिनिष्ठाधिकरणतायां गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्ननिरूपितत्वमिव केवलाभावावच्छिन्नविषयतायां वह्निविशिष्टाभावावच्छिन्ननिरूपितत्वं नोपे
यतेऽसद्दोषः विषयताविशेषश्च प्रकारतारूपः अन्यथा ह्रदो वह्न्यभाववानिति ज्ञाने मुख्यप्रकारे वह्न्यभावादौ धर्मितावच्छेदकतारूपविलक्षणविषयताया असत्त्वेन लक्षणस्यैवासंभव
दुक्तिकतापत्तेः अत एव घटत्वसाकारकज्ञानस्यापि घटत्वावच्छिन्नविषयताकत्वे सर्वत्र भ्रमसिद्धमुपपद्यते। अत एव वस्त्वधिकरणप्रकारावच्छिन्नाया यत्सादिसर्वांशीयाथार्थ्यनिरू
कोर्थः प्रकारोक्तायाः संगतिः अन्यथा शुक्ताविदं रजतमिति ज्ञानानां प्रकारीभूतरजतत्वावच्छिन्नविषयताया उद्देश्यतया साध्याव्याप्यत्वापत्तेरिति सर्वसमञ्जसमित्याहुः अन्ये तु धर्मि
तावच्छेदकीकृतस्य ह्रदत्वस्य नादेरेकत्वद्वयमिति रीत्या ह्रदत्ववह्न्यभावोभयत्वनादेश्च वारणाय यद्रूपावच्छिन्नविषयितायां स्वरूपसंबंधरूपावच्छेदकत्वमपि विशेषणं ताकदेशागतिव्याप्ति
निरासश्च व्यापकविषयिताशून्यत्वविशेषणेन। पाषाणमयत्वविशिष्टपर्वतादेर्वारणाय नातिरिक्तत्वनिवेशनं विशिष्टघटितत्वं चावश्यकमित्याहुः तदपरे न क्षमं तेन तथा
सति प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय दीधितिकृतां विशेषणांतरोपादानवैयर्थ्यप्रसंगः प्रमेयत्वादिघटितविशिष्टविषयतायाः स्वरूपसंबंधरूपावच्छेदकत्वविरहेणो
वानतिप्रसंगात्। किंच वह्न्यभाववद्वृत्त्यात्मकबाधभ्रमविषयके केवलवह्न्यभावादावतिप्रसंगः वह्नित्वावच्छिन्नविषयितायाः वह्न्यभावविषयिताव्यापकत्वविरहात् इति। अत्र वदंति प्रमे
यवह्निधूमाभाववद्वृत्तिरिति ज्ञानीयधूमाभाववद्वृत्तित्ववह्नित्वोभयावच्छिन्ननिरूपिताकविषयितायाः प्रमेयत्वावच्छिन्ननिरूपकताकत्वेपि व्यभिचारविषयतानिरूपितविषयितात्वे
न प्रतिबध्यकतावच्छेदकत्वाभावाद्दोषः अमीयवह्नित्ववह्न्यभावोभयावच्छिन्ननिरूपितविषयितायाः केवलवह्न्यभावाद्येकदेशविषयिताव्यापकत्वानिर्वाहात् किंचैतत्साध्यपरो दोष
इति। अत्रेदं बोध्यं। यद्रूपावच्छेद्यता विशिष्टविषयतायां स्वरूपसंबंधरूपावच्छेदकत्वनिवेशात् अप्रथमदोषसंगतिः प्रमेयत्वविशिष्टव्यभिचारविषयतानिष्ठव्यभिचारत्वप्रमेयत्वोभया
वच्छेद्यतायाः व्यभिचारत्वनिरूपितावच्छेद्यतात्वेन तथात्वमक्षतमिति चेत्तर्हि लाघवाद्विषयताविशिष्टावच्छेद्यताकत्वीयरूपनिरूपितावच्छेद्यतात्वे तादृशावच्छेदकतायाः अवच्छेदक
तावच्छेदकत्वस्य तादृशावच्छेद्यतात्वांतर्भावेन स्वरूपसंबंधरूपावच्छेदकत्वस्य वा निवेशात्तत्संगतिः व्यभिचारत्वप्रमेयत्वोभयनिरूपितावच्छेद्यतात्वस्य केवलव्यभिचारत्वनिरूपि

२७

तावच्छेदकतात्वादन्यत्वात् नैवं धूमवान् प्रमेयाभाववद्वृत्तेरित्यादौ व्याप्यमपि प्रमेयत्वव्यभिचारत्वं च नास्त्येवमेव निरूपकं किन्तु तद्घटकपदार्थसमुदायः तेन तथाविधावच्छेदकत्वे भ्रमसाधारणरू-
पेणावच्छेदकतासत्त्वान्नासम्भव इति । अथ वा दोष[illegible]दातॄणामयमभिप्रायः यद्रूपावच्छिन्नविषयितात्वेन पातितविषयितासामान्यं निवेश्यमिति विशिष्टसमभिव्याहारे इति व्याप्तिरिति वा अयं यत्किं-
चिदेकप्रतिबन्धकत्वनिवेशान्नादिति एवं संयोगः संयोगवानिति बाधभ्रमविषये संयोगे इति व्याप्तिः संयोगत्वेनैतस्यैव प्रकारतया संयोगत्वसंयोगाभावावच्छिन्नविषयितायास्तत्राभावादिति
द्वितीयोऽपि दोषः इति । परे तु । एकत्र द्वयमिति रीत्या हृदत्ववह्न्यभावोभयज्ञानस्य वह्न्यभावावच्छिन्ने हृदत्वज्ञानस्येव वारणाय यद्रूपावच्छिन्नविषयितायां स्वरूपसम्बन्धरूपप्रतिबन्धकता-
वच्छेदकत्वनिवेशः तदा वह्न्यभावादिरूपैकदेशेऽतिव्याप्तिः हृदो वह्न्यभाववानिति प्रतिबन्धकज्ञानीयवह्न्यभावत्वावच्छिन्नप्रकारतायास्तथात्वात् प्रतिबन्धकताया अप्यत्वाज्ज्ञानेन च यद्रूपाव-
च्छिन्नविषयितायां किञ्चिद्धर्मनिष्ठधर्मितावच्छेदकतानिरूपितमुख्यविशेष्यतानिरूपितत्वं सम्यक् । घटाभावधर्मितावच्छेदकीकृत्य सतुल्यतया वह्न्यभावहृदत्वोभयज्ञानस्य तावेनाप्य-
व्याप्यवृत्तेः किन्तु यद्रूपावच्छिन्नयत्किञ्चिद्विषयितेयादृश्यादृशधर्मावच्छिन्नानिरूपितत्वं तादृशतादृशधर्मावच्छिन्नविषयिताभावकूटवज्ज्ञानीयं स्वरूपसम्बन्धरूपावच्छेदकता-
वद्रूपावच्छिन्नविषयित्वं प्रतिबन्धकतानतिरिक्तवृत्तितद्रूपवत्त्वमर्थः यद्रूपं च वह्न्यभावहृदत्वोभयमेवेति । एकत्रद्वयमित्यादिरीत्या यद्विषयित्वं वर्तते तत्र स्वरूपसम्बन्धरूपावच्छेद-
ये कत्वे वेदितिरामयुदासः वह्न्यभावहृदत्वोभयात्मकयद्रूपावच्छिन्नविषयित्वे घटाभावविशिष्टहृदत्वावच्छिन्नानिरूपितत्वाभावात् प्रसङ्गः वह्न्यभावादिरूपैकदेशे विनातिव्याप्तिः वह्न्यभावविष-
यित्वे वह्न्यभावहृदत्वोभयावच्छिन्नानिरूपितत्वं वर्तत इति तादृशोभयावच्छिन्ननिरूपितविषयिताभावस्य केवलवह्न्यभावादिज्ञानीयविषयित्वे स्वरूपसम्बन्धरूपावच्छेदकत्वाभावात् ।
एवं च जातिमान्वह्न्यभाववानिति ज्ञानवारणाय व्यापकविषयिताभ्रम्यत्वमपि नास्ति । पाषाणमयत्वविशिष्टपर्वते तेति व्याप्तिवारणाय अनतिरिक्तवृत्तित्वनिवेशः यत्तु ज्ञानभेदेन विषयताभेदप्र-
तिबन्धकज्ञानीयपाषाणमयत्ववत्पर्वतविषयितायाः ज्ञानानतिरिक्तवृत्तित्वाभावादिति व्याप्तिः यद्रूपावच्छिन्नविषयितासामान्यपर्यन्तभावस्यैक एवं चैकत्र द्वयमित्यादिज्ञानीयविषयितायाः सा-
मान्यान्तर्गततया सम्भव इति स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशः इति तन्न ज्ञानभेदेऽपि विषयिताभेदे स्वरूपसम्बन्धरूपावच्छेदकत्वविशिष्टयद्रूपावच्छिन्नविषयितात्वावच्छिन्नव्यापकता-
याः प्रवेशेनोपपत्तेः व्यापकस्वरूपसामान्यपक्षे च निवेशनात् । तद्धेतुप्रतिबन्धकताया अनतिरिक्तवृत्तित्वनिवेशविशिष्टविषयितासामान्ये प्रतिबन्धकतायाः स्वरूपसम्बन्धरूपावच्छेदकतावगाह-
नारूपवत्त्वमित्यप्येकत्रद्वयमिति ज्ञानीयविषयितायां सामान्यान्तर्गततायां स्वरूपसम्बन्धरूपावच्छेदकत्वाभावादसम्भव इति सात्त्वात्तदसत् । गोत्वाभाववत्पक्षके गोत्वाभावसाध्यकस्थले

२७

गोत्वाभावो गोत्ववानिति भ्रमात्मकबाधज्ञानविषयिताभावाद् गोत्वाभावेऽतिव्याप्तेः न च गोत्वाभावत्वावच्छिन्नविषयितायाः गोत्वगोत्वाभावत्वोभयात्मकयावद्धर्मावच्छिन्नानिरूपितत्व
सत्त्वादुक्तबाधभ्रमस्य तादृशधर्मावच्छिन्नानिरूपितविषयिताविरहान्नातिव्याप्तिरिति वाच्यं गोत्वत्वेन सास्नाद्यवगाहिनो निरुक्तभ्रमस्याप्रसिद्धत्वात् तत्र च गोत्वगोत्वाभावत्वोभयावच्छिन्नविषयिता
शून्यत्वसत्त्वात् एवं वह्न्यभाववत्पक्षकवह्न्यभावसाध्यकस्थले वह्न्यभावो वह्निमानिति वह्नित्वेन घटघटत्वादिभ्रमविषये वह्न्यभावे कृते निर्वह्निरित्यादौ वह्नित्वेन घटादिविषयकह्
दो वह्निमानिति ज्ञानविषयमहाह्रदो वाति व्याप्तेर्व्याप्तः एतेनाव्यापकविषयिताशून्या ज्ञानव्यक्ति प्रकृतानुमितिप्रतिबन्धकतावच्छेदकयद्रूपावच्छिन्नविषयिताव्यापिका प्रकृतानुमितिप्रति
बन्धकतातद्रूपावच्छिन्नत्वमर्थः स्वरूपसंबन्धरूपावच्छेदकत्वेन निवेशो घटकदेशोऽतिव्याप्तिभयेन यद्रूपावच्छिन्नविषयिता सामान्यं तु न प्रवेश्यं। जातिमान् वह्न्यभाववानिति ज्ञानवारणाय यावद्रूपकवि
शेषणेनैवैकदेशातिव्याप्तेर्वारणादिति प्रस्तुते। यच्चोक्तमव्यापकविषयिताशून्यत्वमविमास्तु ह्रदो ह्रदत्ववानिति ज्ञानविशिष्टस्य ह्रदत्वे वह्न्यभावव्याप्यमिति ज्ञानस्य प्रतिबन्धकतया स्वरूपसंब
न्धरूपतदवच्छेदकवह्न्यभावादिविषयितायाः सामान्यान्तर्गतायास्तदन्यतिरिक्तव्यक्तित्वाभावादिति तद्द्रव्यसंगतमेव ह्रदत्वावच्छेदेन वह्नेः साधने तत्सामानाधिकरण्येन वह्न्यभावेऽव्याप्तिः ह्रदो जाति
मानिति ज्ञानविशिष्टस्य जातसवच्छेदेन वह्न्यभावप्रकारकज्ञानस्य प्रतिबन्धकतया तदवच्छेदकवह्न्यभावह्रदत्वावच्छिन्नविषयितायाः स्वरूपसंबन्धरूपावच्छेदिकायाः प्रतिबन्धकतातिरिक्तव्यक्ति
त्वादिति तद्रूपाज्ञानात् असाधारण्यविषयितानवच्छिन्नत्वज्ञानवैशिष्ट्यावच्छिन्नत्वोभयाभाववत्प्रतिबन्धकतावच्छेदकत्वं यद्रूपावच्छिन्नविषयितासु व्यापकं यद्रूपावच्छिन्नत्वमिति स्वरूपसंबन्ध
रूपावच्छेदकतानिवेशापक्षमर्पितकत्रद्यमिसादिज्ञानवारकविशेषणानिवेशमादेसपरिष्कुर्वन्ति। केचित्तु। स्वरूपसंबन्धरूपप्रतिबन्धकतानवच्छेदकविषयिताशून्यत्वेन ज्ञानविशेषणीयं।
तेन वह्न्यभावधर्मितावच्छेदकक ह्रदत्वे ज्ञानस्य तुल्यत्वमावह्न्यभावह्रदत्वोभयतानस्यैव वारणे न चैवं वह्न्यभावाधारत्वैकदेशोऽतिव्याप्तिः उक्तविशेषणोक्तं प्रतिबन्धकज्ञानमात्रव्यक्तितद्विष
यिताव्यापकत्वस्य प्रतिबन्धकतायां सत्त्वादिति वाच्यं। अव्यापकविषयिताशून्यत्वेन वारणात्। पाषाणमयपर्वतवारणायानतिरिक्तव्यक्तित्वनिवेशात् तदसत्त्व विशिष्टान्तरघटितत्वनिवेशाद्वे
यर्थ्यात् स्वस्य स्वधर्मितावच्छेदकत्ववारणाय धर्मितावच्छेदकप्रकारतानिरूपितनिवेशप्यतायाः एवमुपगमे बाधादिज्ञानस्य प्रतिबन्धकतानवच्छेदकताद्रूप्यता ज्ञातित्वेनासंभवाच्च गोत्वा
भाववत्पक्षके उक्तरीत्यातिव्याप्तेश्च स्वरूपसंबन्धरूपप्रतिबन्धकतावच्छेदकविषयिताश्रयत्वं निश्चयविशेषणमप्याहुः तन्न पर्वतो द्रव्यव्यक्तिवह्न्यभाववान् वह्नेरित्यादौ द्रव्यव्यक्तित्वविशिष्टवह्नि
मत्सर्वतरूपबाधाप्रसिद्धेः तुल्यतया द्रव्यव्यक्तिवह्निमत्त्वे पर्वतत्वोभयावगाहिज्ञानस्याव्यापकविषयिताशून्यस्याप्रतिबन्धकत्वाद्धेतौ साध्यव्याप्यत्वग्रहे द्रव्यव्यक्तिः साध्यसामानाधिकरणी वह्निश्चेद्
द्रव्यव्यक्तिरिति ज्ञानस्य विरोधित्वेनाविशिष्टतया प्रतिबन्धकताविरहेऽपि तदवच्छेदकीभूतद्रव्यव्यक्तित्वविशिष्टवह्नित्वावच्छिन्नविषयितासत्त्वाच्चेति दिक्। अन्ये तु। कृशानुत्वे ह्रदत्वावच्छि
नुयोगिताकत्वविशिष्टविशेषणतासंबन्धेन वह्न्यभावत्वाघटितवह्न्यभावव ह्रदत्वमेव यद्रूपवदेव धर्मीप्रकत्रद्यमिति रीत्या ज्ञाने च न ह्रदत्वावच्छिन्नानुयोगिताकत्वविशिष्टस्वरू

पसंबंधादेः संसर्गतास्वीक्रियते अपि तु हेतुत्वधर्मितावच्छेदकज्ञान एवेति न कोऽपि दोषः परे तु वह्नित्वावच्छिन्नधर्मितावच्छेदकतापन्नाभावत्वावच्छिन्नधर्मितावच्छेदकतापन्नहेतुत्वमेव तद्रूपशब्दार्थः
न च वह्नित्वावच्छिन्नधर्मितावच्छेदकतापन्नाभावत्वावच्छिन्नधर्मितावच्छेदकतापन्नपर्वतत्वमादाय भ्रमविषये ऽतिव्याप्तिः तादृशधर्मितापन्नधूमवत्त्वाभाववत्त्वप्रसक्तेः तस्यैव तद्रूपपदेन धर्त्तुमसत्वादिति व
दंति। प्रकारधर्मितावच्छेदकभावापन्नवह्न्यभावत्वहेतुत्वयोर्न दोषतानवच्छेदकत्वमिति सविकृष्टव्यं। अपरे तु अग्रिमस्य मतद्वयकारमतपरिष्कारस्याहरणीयत्वात् यद्रूपशब्दार्थचिंतैव नास्तीति आ
हुरिति कृतं पल्लवितेन। यत्संबंधावच्छिन्नेति अथ यत्संबंधावच्छिन्नयन्निष्ठप्रकारताकत्वमनुमितिप्रतिबंधकतावच्छेदकं तत्संबंधेन तद्वत्त्वस्य दुष्टताव्यवहारनियामकत्वोपगमे धूमत्ववान्
पर्वतो वह्निमान् धूमादित्यादौ धूमादेर्दुष्टत्वानुपपत्तिः न तस्य नियामकत्वसंभवः स्वरूपसंबंधेन धूमत्वाभावादेर्धूमादावभावात्। न च धूमत्वस्य पर्वतावृत्तित्वप्रकारकज्ञानस्याविरोधि
त्वात्समवायसंबंधावच्छिन्नपर्वतवृत्तित्वाभावस्य स्वरूपसंबंधेन धूमे सत्त्वात्तद्दुष्टत्वानुपपत्तिरिति वाच्यं एवमपि रूपत्ववान् पर्वतो वह्निमान् तद्रूपादित्यादावव्याप्तेः यदि च तत्र रूपत्व
निष्ठाधेयतायां पर्वतनिरूपितत्वाभावज्ञानस्यापि प्रतिबंधकत्वमपेक्षितं तत्र दुष्टत्वोपपत्तिस्तदा पर्वतनिरूपिताधेयत्वनिरूपिताधेयत्ववान् पर्वतो वह्निमान् पर्वतनिरूपिताधेयत्वादित्या
दौ हेतोर्दुष्टत्वानुपपत्तिः तत्र निरूपकत्वसंबंधावच्छिन्नप्रतियोगिताकतादृशपक्षतावच्छेदकाभावस्य पक्षतावच्छेदकनिष्ठनिरूपितत्वसंबंधावच्छिन्नपर्वतवृत्तित्वाभावस्य तादृशपक्ष
तावच्छेदकनिष्ठाधेयतायां वर्तमानस्य पक्षनिरूपितत्वाभावस्य च प्रकृतहेतावसत्त्वात्। न च तत्र पक्षनिष्ठाधारतायां पक्षतावच्छेदकनिरूपितत्वाभावस्य तथात्वात्तद्वत्त्वस्य हेतौ सत्त्वान्ना
नुपपत्तिरिति वाच्यं। तावतापि पर्वततादृशाधेयत्वान्यतरस्य पक्षतावच्छेदकत्वस्थले प्रकृतहेतौ तादृशान्यतरनिरूपितत्वाभावासत्त्वादनुपपत्तिरेव न रूपत्वाभावव्याप्यः पर्वतवृत्तिरिति
ज्ञानस्य प्रकारतापन्नपर्वतवृत्तित्वमादाय तद्रूपस्य दुष्टत्वव्यवहारसंभवात् एवं तादृशाधेयत्वनिरूपिताधेयत्वाभावव्याप्यः पर्वतवृत्तिरिति ज्ञानप्रकारतापन्नपर्वतवृत्तित्वमादाय तत्र तत्र
दुष्टत्वं बोध्यं न चैवं वह्न्यभावव्याप्यः पर्वत इति (सत्प्रतिपक्षज्ञानस्य संयोगसंबंधावच्छिन्नाधेयतासंबंधावच्छिन्नपर्वतनिष्ठप्रकारताकत्वेनानुमितिप्रतिबंधकतया तेन संबंधेन प
र्वतवत्त्वस्य धूमादौ सत्त्वेन दुष्टताव्यवहारापत्तिसंभवादिति कृतं पक्षविशेष्यकत्वपर्यंतानुधावनं व्यर्थं) मिति वाच्यं। तावतापि प्रसिद्धबाधरूपदोषमादाय तत्र व्यवहारापत्तिः
पक्षविशेष्यकभ्रममादायैव सत्प्रतिपक्षविशेषोऽध्यवसायक्रूरः इति न्यायेन तथोक्तिसंभवात् एवमेव प्रसिद्धधूमादिहेतावपि प्रसिद्धपरस्वारस्यात् परंतु तादृशतादृशदुष्टस्थले पक्षता
वच्छेदकविशिष्टपक्षनिष्ठभेदप्रतियोगित्वबुद्धेरपि पक्षतावच्छेदकवत्ताग्रहविरोधितया तादृशप्रतियोगित्ववत्त्वमादाय दुष्टत्वसंभवान्नानुपपत्तिरिति परं त्वीदृशाशी सा साध्यवान्

(= भ्रमास्थल इति पाठे भ्रमपदस्य निश्चयसामान्यपरत्वेन वक्ष्यमाणतयासंगमनं बोध्यं =)

त्ति २

पक्षनिष्ठभेदप्र[illegible]नियोगि इति पक्षविशेषणकभ्रममादाय दोष इत्यप्याप्यणुरपीति न्यायेन समाधानं बोध्यं अत्र पर्वतो
वह्न्यभाववान् धूमादित्यादौ पर्वते वह्निरिति ज्ञानं तत्रैव धूमवत्वप्रकारकप्रमाविषयत्वे स्वरूपासिद्धिज्ञानं जात्य
भाववान्पर्वतो घटान्यः घटात्व इति प्रमेयादित्यादौ जा[illegible]मत्वे तौ ज्ञानं तत्रैव जातिशून्यघ[illegible]त्व इति प्रमेयहेतुके
पर्वते जातिरिति ज्ञानं रूपत्ववान्पर्वतो वह्निमानित्यादौ रूपत्वे पर्वतनिष्ठाभावप्रतियोगी इति ज्ञानं द्रव्यवान्पर्वतो
वह्निमान्धूमप्रागभावादित्यादौ हेतौ द्रव्यत्वरूपाश्रयासिद्ध्यसत्वेपि द्रव्यत्वे व्याप्यधूमप्रागभावः पर्वते इ
ति ज्ञानं चा[illegible]योपपत्तिप्रकारानेप्रतिकूलाः। वस्तुतस्तु। सर्वत्र तत्तदभावव्याप्यज्ञानविषयदोषवत्वं सुव
चं। वस्तुतस्तु। [illegible] पत्ववान्पर्वतो वाच्यत्ववान् [illegible] यत्वादित्यादावेव दुष्टताव्यवहारानुपपत्तिः अन्यत्रेसा
ध्याभावहेतुभावादिभ्रममादाय तदुपपत्तेर्यथा हि [illegible] तत्र कल्पांगीकारे मते धूमवान्पर्वतो वह्निमान्धूमा त्व२
दित्यादौ साध्याभावभ्रममादाय दुष्टताव्यवहारः स उपपादः स्वरूपसंबन्धावच्छिन्नवह्न्यभावनिष्ठप्रकारताके
त्वेन प्रतिबंधकतापात्तेन संबंधेन धूमादौ वह्न्यभावोपि मत्तासत्वान्नु वास्तवदोषस्येव तत्र व्यवहारापादकत्वमिति सत्प्रदुर्वचत्वात्
वा

प२

57

अन्यथापक्षविशेष्यकभ्रमविषयसाध्याभावस्याज्ञाततया दोषत्वेन तद्व्यवहारानापादकतयादीधितिग्रंथासंगतिः ननु तथापि धूमत्ववान् पर्वतो घटभेदवान् धूमादि
स्याद्धेतौ तादृशव्यवहारानुपपत्तिर्दुर्वारैव न च तादृशव्यवहारनियामकस्य घटत्वरूपसाध्याभावस्य धूमत्वाभावस्य वा सत्त्वात् न च तथापि धूमत्वनिष्ठपक्षतावच्छेदकताघटक
संबंधेन पक्षवृत्तित्वाभावस्याश्रयासिद्धित्वेन तस्यैव तदुपपादकत्वमिति वाच्यं तावतावच्छिन्नस्यानुपपादकत्वात् एवंरूपत्ववान् पर्वतो घटान्यः तद्रूपादिस्याद्धेतौ स्वरूपसंबंधावच्छिन्नपक्षस
मवेतत्वाभावनिष्ठप्रकारताकत्वेन स्वरूपसंबंधावच्छिन्नरूपत्वाभावनिष्ठप्रकारताकत्वेन एवं समवायसंबंधेन साध्याभावरूपघटत्वनिष्ठप्रकारताकत्वेन प्रतिबंधकत्वेपि हेतौ तेन संबंधे
न तद्वत्त्वं नास्तीति न तद्व्यवहारानुपपत्तिरिति चेन्न स्वरूपसंबंधेन हेत्वाभावभ्रमविषयहेत्वाभावमादाय तद्व्यवहारोपपादनात् । न च पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वतः घटान्यः
घटवृत्तिप्रमेयादिसाध्ये हेत्वभावमादायापि न दुष्टताव्यवहारोपपत्तिरिति वाच्यं । पर्वतान्यत्वप्रकारकप्रमाविशेष्यत्वं पर्वतवृत्त्यभावप्रतियोगी साश्रयासिद्धिज्ञानस्य प्रतिबंधकत्वेन पर्वत
वृत्त्यभावप्रतियोगित्वस्य क्वापि सत्त्वात् घटवृत्तिप्रमेये सत्त्वेन पर्वतो घटवृत्त्यभाववानिति भ्रममादाय घटपक्षात्मकघटवृत्तिप्रमेये घटवृत्त्यभावसत्त्वेन च तदुपपादनात् एवं उक्तपक्षसाध्य
के स्वरूपतादात्म्यान्यतरसंबंधेन घटवृत्तिप्रमेयहेतौ घटस्यापि हेतुतया तत्र घटवृत्त्यभावस्यासत्त्वेपि पर्वतान्यत्वप्रकारकप्रमाविषयत्वाभावरूपासिद्धिमादाय पर्वतत्वात्मकघटवृत्तिप्र
मेयेऽलक्षणत्वेऽपि न च पर्वतभेदेऽपि हेतुशरीरप्रविष्टतया दोषासिद्धिमादायापि न लक्षणं नेतुं शक्यमिति वाच्यं तत्र पर्वतविशेषणकोक्ताश्रयादिज्ञानविषयपक्षमादाय तदुपपादनात्
एवमुक्तपक्षसाध्यके पर्वतभिन्नत्वे सति तादात्म्यसंबंधेन घटवृत्तिप्रमेयरूपहेतौ शुद्धघटभिन्नत्वविशिष्टप्रमेयरूपे च हेतौ धूमघटभेदसाध्यके साध्यतावच्छेदकसंबंधावच्छिन्नपक्षवृत्ति
त्वस्य बाधतया तद्भ्रमविषयः प्रायशः हेतौ स्वरूपसंबंधावच्छिन्नपक्षवृत्तित्वाभावरूपबाधोपि बोध्यः । न च पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वतो घटान्यः पर्वतान्यावृत्तिप्रमेया
दिसाध्ये तादात्म्यस्वरूपान्यतरसंबंधेन हेतुतायाः पर्वतनिष्ठहेतुतावच्छेदकस्वरूपतादात्म्यान्यतरसंबंधावच्छिन्नाभावप्रतियोगित्वस्य क्वापि हेतावसत्त्वेन तन्मते तादृशासिद्धिमादाय दुष्टत्वव्य
वहारोऽनुपपन्न इति वाच्यं तत्रापि स्वरूपतादात्म्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकपर्वतान्यावृत्त्यभावं पर्वतान्यत्वप्रकारकप्रमाविशेष्यतावान् पर्वत इति ज्ञानस्य स्वरूपसंबंधावच्छिन्नाधे
यतासंबंधेन पर्वतप्रकारताकत्वेन प्रतिबंधकतया तेन संबंधेन पर्वतवत्त्वस्य पक्षमात्रवृत्तिपदार्थस्वरूपपर्वतान्यावृत्तिप्रमेयरूपहेतौ सत्त्वेन दुष्टताव्यवहारोपपादनादिति दिक् । एवं च धू
मत्ववान् पर्वतो वह्निमानित्यादौ हेतौ भ्रमप्रमामादाय महत्ताप्रबंधेन दुष्टत्वोपपादनं शिष्यबुद्धिवैशद्यार्थमेवेति तत्र स्थलविशेषोपलक्षणतया तत्तुल्यस्थलविशेषे भ्रमासत्त्वेनापसाध्यप्र
मायाउपादानमिति नाबोध्यम् ॥

केचित्तु रूपत्ववान् पर्वतो वह्निमान् पर्वतीयरूपादित्यादौ समवायसंबंधावच्छिन्नपर्वतावृत्तित्वमादायन दुष्टतात्यवहारोपपत्ति
संभवः। न च पर्वते तन्निष्ठासत्ताभावप्रतियोगिरूपत्ववानिति ज्ञानस्य पर्वते रूपत्वप्रकारकज्ञानप्रतिबंधकत्वे तया तादृशरूपत्व
मादायैव तदुपपत्तिः प्रकारताविशेष्यतयोरभेदात् इति वाच्यं। तथा सति पर्वतीयवन्ह्यभाववान्घट इति ज्ञानस्य वन्ह्यभावे
पर्वतवृत्तित्वावगाहित्वेन पर्वते वन्हिमत्ताज्ञानविरोधितया तत्प्रकारीभूतवन्ह्यभाववत्त्वमादायैव दुष्टतापत्तिसं
भवात् सत्त्वविशेष्यकत्वपर्यंतवैयर्थ्यात्। तस्यार्थस्य प्रकारतात्वेनावच्छेदकत्वविशेषणे तु दोषतादवस्थ्यात् तस्मा
त्समवायस्य नानात्वमते नायं दोष इत्याहुः। पर्वते इति पर्वतमात्रे वन्हिसद्भावमभिप्रेत्य। अन्यथा पर्वतविशेषमहा
नसान्यतरत्वहेतुः पर्वतविशेषस्य पक्षत्वे च दृष्टे तेन पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधावच्छिन्नाधेयतासंबं
धावच्छिन्नपर्वतनिष्ठप्रकारताशालिज्ञानस्यैव पर्वतो वन्हिमानित्यनुमितिप्रतिबंधकत्वेन तेन संबंधेन प
र्वतमहानसान्यतरत्वे कथं तद्दृष्टत्वमिति केषांचिदाशंका न पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधस्य शुद्धस्वरू
पसंबंधत्वेनैव संसर्गतावच्छित्तिनलाघवात् तत्र पर्वतत्वव्यापकत्वभानमेव च शुद्धस्वरूपसंबंधावच्छिन्नाधे
यतारूपसंबंधस्यैवानियमेनिवेशात् तेन संबंधेन तद्वत्तत्त्वोक्षत्वमित्यत्र तदुपरि केषांचित्समाधानं तदभ
मप्रयुक्तमिति वेदितव्यं। उक्तस्थले पर्वतविशेषस्यैव पक्षत्वेन तादृशाशंकायाएवानवतारात् यद्वा पर्वतत्वे

हानर

६ इत्यापत्तेर्दुष्टरतयाकथं ६

सामानाधिकरण्येन वन्हेः साध्यत्वाद् एव पर्वतत्वावच्छेदेन वन्ह्यभाववत्ताभ्रमप्रमादायाति आपिर्वाच्या । सा च न संभवति पर्वतत्वव्यापकत्वविशिष्टस्वरूपसंबंधावच्छिन्नप्रकारताकत्वेनैव पर्वतो नि
र्वन्हिरिति ज्ञानस्य प्रतिबंधकत्वात्तेन संबंधेन वन्ह्यभाववत्त्वस्य धूमादावसत्वात् कथं पक्षविशेष्यकभ्रमप्रमादायाति आपिरित्याशंकायाः पर्वतत्वव्यापकत्वरूपं पर्वतत्वावच्छिन्नत्वं न प्रकारतावच्छेद
कसंबंधे भासते किंतु तस्य प्रकारांशे भानं स्वीक्रियते इति शुद्धस्वरूपसंबंधस्यैव प्रकारतावच्छेदकसंबंधतया तेन संबंधेन तद्धत्वस्य हेतावप्रसक्तत्वमिति समाधानं तथा च पक्षविशेषणकभ्र
मे पि पर्वतत्वव्यापकत्वं वन्ह्यभाव एव भासते शुद्धस्वरूपसंबंधावच्छिन्नाधेयतासंबंधेन प्रकारतावच्छेदकेन तद्धत्वमप्रसक्तमिति तत्कुत्र साध्यसामंजस्य । सद्धेताविति अत्र पर्वतमहानसान्यतरत्वरूपहेता
वसद्धेतात्वभ्रमेण कदाचिद् दुष्टताव्यवहार इष्ट इति ब्रूयादिति तत्र भ्रमस्याव्यर्थसद्धेताविति न दुष्टताव्यवहारो वास्तविकदोषातिरिक्तपदार्थमादायाति एवं संगीकरणीयं अन्यथा भ्रमविषयसा
ध्याभावे साध्यादिदीधितिग्रंथस्यादिपदग्राह्यासद्धेतौ दुष्टताव्यवहारापत्तिवारणासंगतेः । एवं च उक्तस्थले । सद्धेतुत्वभ्रमदशायामपि वास्तविकदोषातिरिक्तपक्षादिकमादाय दुष्टताव्यवहारे सद्धेता
विसस्य सार्थक्यं न चासद्धेतौ वास्तविकदोषमादायैव तद्घटकपदार्थमादायापि दुष्टताव्यवहारः कदाचिद् इष्ट इति वक्तुं शक्यते उदासीनपदार्थमादाय तत्र दुष्टताव्यवहारो निष्ट एवेति साध्याभावादी
साध्यादिपदग्राह्योदासीनपदार्थमादायासद्धेतौ दुष्टताव्यवहारापत्तिवारकतया दीधितिग्रंथस्यासंगतिः तथा च प्रकृतपक्षस्य दोषघटकत्वेन तमादाय अन्यतरत्वादिहेतावसद्धेतुत्वभ्रमदशायां
तत्र दुष्टताव्यवहार इष्ट इति वक्तुं शक्यते एवं च सद्धेतौ दोषतद्घटकमुदासीनपदार्थं वा आदाय दुष्टताव्यवहारो निष्ट एवेति तत्र भ्रमव्यावर्त्तकतया सद्धेताविसस्य सार्थक्यमस्त्येवेति वा अयं प्रकृते वास्तवि
कदोषस्याप्रसिद्धत्वेन पक्षस्यापि तद्घटकत्वासंभवात् तमादाय असद्धेतुत्वभ्रमदशायामपि दुष्टताव्यवहार इष्ट इति वक्तुमशक्यत्वात् । न चान्यतरत्वादिरूपहेतावसद्धेतुत्वभ्रमदशायां पक्षस्याविदोषघ
टकस्य स्वघटकत्वभ्रमात्तं कस्यचित्तु शक्यत एव एवं च तद्भ्रमकाले तमादाय दुष्टताव्यवहारो इष्ट इति तस्य स्वघटकत्वभ्रमतया तत्र भ्रमव्यावर्त्तकतया तस्य सार्थक्यमस्त्येवेति वाच्यं तथा सति साध्याभावत्वेन रूपे
ण उदासीनघटादेरपि ग्राहिप्रतिबंधकभ्रमविषयघटादिकमादाय असद्धेताविसाध्यादिपदग्राह्यसद्धेतौ दुष्टताव्यवहारापत्तिवारकतया दीधितौ संभवात् भ्रमपदं निश्चयसामान्यपरमिति साध्यादिपदस्य संगतिः
रतः दोषघटकसाध्याभावादिकमादायैवासद्धेतौ दुष्टताव्यवहारापत्तिवारको दीधितिग्रंथ इत्युपेयं एवं च पक्षस्य दोषघटकताभ्रमदशायामपि दुष्टताव्यवहारो निष्ट एवेत्यसद्धेतुता व्यावर्त्य इत्येकं चि
करतयातद्धेयर्थ्यं दुरुद्धरमेवेति चेन्नहि भ्रमसंतासहिष्णुतासूचनार्थमेवासद्धेताविसुपादानादिति । निश्चयसामान्यपरमिति । इदं तु चिंत्यते । आदिपदग्राह्यो सद्धेतुतानिष्टस्य साध्याभावा
दौ साध्यादिपदग्राह्यस्य साध्याभावत्वेन घटादि भ्रमात्मकप्रतिबंधकज्ञानविषयस्य संभवेन भ्रमविषये तस्य यथाश्रुतार्थकरणे विप्रसम्भाराभावात् न च यत्संबंधावच्छिन्नधर्मावच्छिन्नप्रकारताकत्वेन
साध्यादिकमेव तेन संबंधेन तद्धत्वस्यैव दुष्टताव्यवहारनियामकत्वमित्युक्तेः स्वरूपसंबंधेन घटस्य प्रकारकभ्रमस्यैव प्रतिबंधकत्वे पि तेन संबंधेन घटवत्त्वाप्रसिद्धेर्न तमादाय दुष्टताव्यवहारापत्तिः

व

संभवतीति। नाव्यं साध्याभावत्वेन पक्षाभावगाहि भ्रमस्यैवोपादानादिति। केचित्तु सद्धेतुस्थले ऽसद्धेतुस्थले च साध्याभावत्वेन गगनाभावादेरपि भानसंभवादसद्धेतोर्गगनाभावरूप
प्रकारत्वस्य भावाद्यदुष्टत्वसंभवे ईदृशाकुसृष्टादरो व्यर्थ एवेति। ■ पर्वतप्रकारकज्ञानमादायतु स्वरूपसंबंधावच्छिन्नाधेयतासंबंधेन कस्यापि धूमाऽसत्वेन न पक्षविशेषणकभ्रममादाय दो
षप्रसक्तिरित्याहुः। भट्टाचार्यानुयायिनस्तु विषयइसेकारः प्रामादिकः। एवं चादिपदग्राह्यः पक्षविशेषणकभ्रमो विदाधिकृत्वं मतः। अत एव हेतुविशेष्यकव्यभिचारभ्रमविषयस्य संग्रहान्न
न्यूनता। एवं भ्रमपदमपि न निश्चयसामान्यपरं आदिपदेन भ्रमाविषयसाध्याभावस्यैव संग्रहादिति प्राहुः। विलक्षणविषयतेति। विलक्षणपदघटितो बहुपुस्तकपाठः। अव्यापकावृत्तिविषय
ताशून्यत्वं नास्तीत्यभिप्रायेण तथा च जातिमानत्वन्ह्यभाववानिति ज्ञाने याविषयिता तत्स्यायद्रूपपर्याप्तनिरूपकताकावच्छेदकत्वविरहादेवादोषादिति। उपमेवेति। प्रथाद्वप्रमेयत्वविशिष्ट
दोषे नातिव्याप्तिस्तथा प्रपंचितमप्यस्तात् पर्याप्तीति। न च विशिष्टविषयितात्वान्तर्भावेणावच्छेदकतापर्याप्त्यनभ्युपगमे तद्विशिष्टज्ञानात्कार्यप्रतिबंधानुपपत्तिः प्रतिबंधकतावच्छेदकता
पर्याप्त्यधिकरणधर्मविशिष्टवत्ताया एव कार्यानुसत्तिप्रयोजकत्वादतः निश्चयत्वसहितविशिष्टविषयितायां तत्सहितभ्रमविषयितायां च विभिन्नपर्याप्तीस्वीकार्येत्याच ताद्दशवि
शिष्टविषयितायां पर्याप्त्यभावकथनासंगतिरिति वाच्यं। पर्वतविशेष्यतानिरूपितवन्ह्यभावप्रकारिताशालिनिश्चयत्वेऽवच्छेदकत्वपर्याप्तिमादाय वन्ह्यभाववद्वत्तिप्रसंगानुद्धारान्नि
श्चयत्वविशिष्टयद्रूपावच्छिन्नविषयितात्वं अवच्छेदकतापर्याप्त्यवच्छेदकं इति विवक्षणीयं तत्र च पक्षविशेष्यतानिरूपितत्वसहितमेव वन्ह्यभावविषयितात्वं ताद्दशपर्याप्त्यवच्छेदकत्वमि
ति नातिव्याप्तिः। एवं च विशिष्टविषयितात्वघटितसमुदायस्यावच्छेदकतापर्याप्त्यनवच्छेदकतया ऽसंभवः पक्षान्तवच्छेदकतावच्छेदकांतर्भावेणावच्छेदकत्वं तथा च भ्रमविषयितासाधार
णरूपतद्विषयितानिश्चयत्वैतत्समुदायत्वमेकं पर्याप्त्यवच्छेदकं भ्रमविषयितासाधारणरूपविशिष्टविषयित्वादिनिष्ठसमुदायत्वमपरं तथा न तु तद्घावच्छिन्नविशिष्टविषयितात्वविशिष्ट
विषयित्वादिनिष्ठसमुदायत्वं तथा च पर्याप्त्यनवच्छेदकरूपावच्छेदेन विशिष्टविषयितात्वसहितनिश्चयत्वेन तत्पर्याप्त्यभावोऽक्षतः। अनाहार्यत्वजन्यतासंबंधेनेच्छावदन्यत्वम
नाहार्यत्वं स्वविषयत्वस्वसामानाधिकरण्योभयसंबंधावच्छिन्नेनेदप्रामाण्यज्ञानाभावकूटवत्वं वस्तुतस्तु दोषज्ञानस्य सर्वस्यापि प्रमात्वेन तच्चाप्रामाण्यज्ञानं भ्रम एवेति ईश्वर
ज्ञानावृत्तित्वेनाप्रामाण्यद्वयमनुगमय्य तद्विषयकज्ञानशून्यत्वं ईश्वरावृत्तिज्ञानशून्यत्वं ● तत्र अन्याप्रामाण्यं प्रामाण्यविरोधिभ्रमत्वं प्रमात्वाभावश्च समरूपत्वं [illegible] वने चावच्छेदक
वा

आमता

भेदेन प्रमात्वाप्रमात्वयोः सत्त्वेपि न क्षतिः ह्रदः पर्वतश्च वह्निमानिति समूहालंबने ह्रदत्वावच्छेदेन यत्प्रामाण्यं वर्त्तते तदवच्छेदकावच्छिन्नतदधिकरणतासमानाधिकरणाधिकरणताकान्य

३१ त्वेन तयोरनुगमेन विरोधित्वनिर्वाहात् एवं च समूहालंबनात्मकमेव दोषजन्यज्ञानं विषयतासंबंधावच्छिन्नप्रामाण्यविरोधिताशून्य[illegible]मिति तदाहार्यलक्षणसमन्वयः प्रामाण्यं

च यद्रूपावच्छिन्नविषयितात्वत्वान्न साध्याप्यन्यनिधर्मस्य वारणीयत्वे तु किंचिदवच्छिन्नत्वमप्यनुगमकरूपं निवेश्यमिति तु परे परिशीलितः पंथाः संशयान्यत्वं च स्वसमानाधिक

रणत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वे सति तदुभयसंबंधेन प्रकारिताविशिष्टप्रकारितावदन्यत्वमिति दिक् संशयादावि[illegible]त्या[illegible]दिना आहार्यप्रामाण्यज्ञाना

स्कंदितज्ञानसंस्कारादीनां परिग्रहः ननु तत्तद्व्यक्तित्वमिति मन्वनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयव्यक्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वावच्छिन्नाधिकरणता तादृशप्रतिबंधकता

नतिरिक्तव्यक्तित्वसाधिकरणतां निवेश्यानतिरिक्तव्यक्तित्वघटितलक्षणं सुकरमिति चेन्न सामान्यधर्मावच्छिन्नाधिकरणताया अप्यधिकरणभेदेन भेदाभ्युपगमे तादृशनिश्चयव्यक्तित्ववि

शिष्टवन्यभावत्वावच्छिन्नविषयितात्वावच्छिन्नाधिकरणताव्यक्तेः प्रतिबंधकताशून्यव्यक्तित्वेन वन्यभावत्वविशिष्टेऽतिप्रसक्तेः तादृशाधिकरणतासामान्योक्तौ तादृशातिप्रसंगवारणेपि

सामान्यपदार्थस्याव्यापकत्वादस्य दुर्वचत्वात् नातिरिक्तव्यक्तित्वे तादृशविषयितासामान्यावच्छिन्नाधिकरणतात्वव्यापकत्वनिवेशे नामधेयस्य प्रतिबंधकतायां तादृशविषयिताव्यापकत्वनिवेशे

लाघवात् तादृग्दुर्घटत्वादिति। विशेष्यकत्वे वैशिष्ट्यानुयोगिकाभावानुपगमात् एतेन निरुक्तज्ञानव्यक्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वं तच्छून्यव्यक्तितानवच्छेदकमिसपात्वं यद्यपि तादृशविशि

ष्टविषयकत्वं प्रकृतानुमितिसव्यक्तितादृशविशिष्टत्वं दोषत्वमिसु तावन्नातिरिक्तव्यक्तित्वादिकं यर्थं प्रत्यापि वन्यभाववत्याप्यवान्यर्वतद्वत्सत्वे वह्निमत्सर्वतादावतिप्रसंगात्तथा नोक्तं। तादृशोति। आना

हार्याप्रामाण्यज्ञानानास्कंदितनिश्चये सर्थः वैयर्थ्यप्रसंगादिति। संस्कारादौ तादृशविषयितायाः सत्त्वेपि तादृशनिश्चयाव्यक्तित्वस्यक्षततत्वो यदि चेमूलोक्तज्ञानपदस्य वतादृशार्थद्योतकत्वमुच्यते त

दाप्याहार्य इति। यद्रूपावच्छिन्नविषयितासामान्ये तादृशानिश्चयाव्यक्तित्वनिवेशेन दोषे केदे व्याप्तिव्याप्तिवारणे तादृशानतिरिक्तव्यक्तित्वे यद्रूपावच्छिन्नविषयितात्वव्यापकत्वनिवेशे गौरवं बोध्यं।

स्वसमनतर इति। द्रव्यत्वविशिष्टसत्ताव्यापकमिति व्यवहारानुरोधेन विशिष्टाधिकरणताघटिततायाएव व्यापकताया लाभादिति भावः [illegible] इदं तु बोध्यं यत्तु कारमतं सम्यगेव। प्रकृतानुमितिप्रतिबं

धकतानतिरिक्तव्यक्तिमुख्यविशेष्यितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वं दोषत्वमिति निष्कर्षसंभवात् एवं चाव्यापकविषयिताशून्यत्वानिवेशेनतादृशबोध्यं नापि यद्रूपपदार्थचिं

तायत्वतत्त्वाद्यनुगमो वा अनतिरिक्तव्यक्तित्वघटकनिश्चयहेतुमन्तोज्ञानकालीनो ज्ञास्य इति नासाधारण्यासंग्रहः पर्याप्त्युपादानात् न शुद्धह्रदत्वावच्छिन्नेऽतिप्रसंग इति। ननु प्रकृतानुमितिसप्रतिबंध

३१

कत्वं यादृशविशिष्टविषयकनिश्चयात्वं नितादृशत्वमेवास्तु। व्यापकत्वाघनिवेशेन साध्यवादिति चेत् न असाधारण्येऽव्याप्तेः प्रतिबन्धकतावच्छेदकविषयताभूतं से यन्निवेशे पाषाणमयत्वादाव
तिव्याप्तिः न च पक्षधर्मताज्ञानकालीनत्वासाधारण्यावगाहित्वोभयशून्यत्वेन यादृशविशिष्टविषयकनिश्चयो विशेषणीय इति वाच्यं तथापि वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदे इति व्याप्तेः
यदि चैतन्मते निष्टङ्कयद्विशिष्टान्तराघटितत्वं तन्निवेशनान्दोषः इत्युच्यते तदा प्रतिहेतु व्यापकसाध्याभावेऽव्याप्तेः पूर्वोक्तोभयाभावमत् प्रतिहेतोः पक्षधर्मताज्ञानकालीनत्वे स सत्प्रतिपक्षा
वगाहित्वोभयाभावस्य प्रतिहेतोः पक्षधर्मताज्ञानकालीनत्वस्य वा तद्विशेषणके च निर्धारितत्वसंभवे विशेषस्यापरत्वं दुर्वारमिति बोध्यं। विशेषोऽपि तेति। अविशेषितोऽपि ह्रदत्वादिरूपो धर्मः तदव
छिन्नपक्षके सत्यर्थः किञ्चिद्विशिष्टं ह्रदत्वादि विशिष्टह्रदत्वादितद्घटितस्य ह्रदे वह्निमान् ह्रदत्वादिसादेवन्यभाववद्वृत्ति ह्रदत्वे च विशिष्टरूपस्य ह्रदेऽजासम्भावयानिसादो जातिमद्ध्रदत्वे
विशिष्टरूपबाधादेर्वा दोषस्येत्यर्थः। तादृशविशिष्टविशिष्टविषयितापटकत्वं तन्निरूपकत्वं यद्यपि। यद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयितासमानाधिकरण
भावप्रतियोगितानवच्छेदकं यद्रूपावच्छिन्नविषयिताशून्यप्रतिविषयतानवच्छेदकं यादृशरूपं यद्रूपावच्छिन्नविषयिताशून्यप्रतीसमानि तादृशविशिष्ट(विष्ट)विषयिताकं यद्यद्रूपं
तद्रूपावच्छिन्नविषयितानिरूपकवती या यत्किञ्चिद्रूपावच्छिन्नविषयितातत्शून्यत्वमित्यर्थः यद्यपि ती साकरणानासंभवः ह्रदे वह्न्यभाववानिसाकारकनिश्चयस्याविनिरूपकभिन्न ह्रदत्वे
प वह्नित्वादिनिरवच्छिन्नविषयितोभयशून्यत्वासम्भवात् किञ्चिद्रूपावच्छिन्नेति यद्रूपावच्छिन्नस्य पक्षस्य स्वस्य यादृशविशिष्टघटकत्वे सुकोच यद्रूपावच्छिन्न यद्विषयिताशून्यप्रतीसत्वान्निषोदृश
विशिष्टविषयिताकत्वमर्थः स्यात् तत्र च पर्वतो निर्वह्निः स्यादेव वह्नित्वावच्छिन्नो देशो वह्निमान् सर्वतरूपदोषघटकतानुपपत्तिः वह्निविशिष्टपर्वतत्वावच्छिन्नविषयितायाः वह्नित्वावच्छिन्न महान
सीयवह्निविषयिताशून्यप्रतीतिघटितत्वात् तादृशयद्विषयिताशून्यत्वकूटनिवेशे च यस्य यस्येत्यस्य वैयर्थ्यमिति सततं नोक्तं। तत्तद्रूपावच्छिन्नत्वतन्निष्ठविषयिताभिन्नेति मन्तव्यं निष्ठे
तिकथनात् तत्तद्रूपावच्छिन्नमीयविषयितानां निराकरणेन तत्तन्निष्ठविषयितामेलानां कतिपयानामेव कूटनिविष्टमिति लाघवमिसान्यायेन तत्तन्निष्ठे सुकं। तत्तद्रूपविशिष्टविषयिता
न्यत्वपर्यवसितं। वस्तुतस्तु तत्तद्रूपावच्छिन्नविषयितोत्तावच्छिन्नभेदकूटनिवेशात्तद्धेयपर्याप्तभेदे सर्वत्रैवं यद्विशिष्टाभाववान् यन्नसभाववानिति गृहीयाया अभावत्वेन ह्रदत्वविषयतावारणाय
न तान्निवेशे तुल्यते तदा व्यापकविषयिताशून्यत्वनिवेशस्यातन्द्रहास्यतिवरात्तं गमनमिति बोध्यं। ह्रदेऽनासभाववानिति। यद्यपि विशिष्टघटकतावच्छेदकधर्मावच्छिन्नविष

३२

यत्तान्यत्किंचिदवच्छिन्नविषयताशून्यत्वनिवेशेऽसंभवः वह्न्यभाववत्त्वेन हृदत्वावगाहिबुद्धौ तत्राव्याप्तिवारणात् वह्न्यभाववत्त्वस्य विशिष्टघटकतावच्छेदकत्वात् न च विशिष्टघटकतावच्छेदकता
समानाधिकरणान्यजातीयावच्छेदकताकविषयितान्यत्वं विवक्षितं हृदत्वावच्छिन्नविषयिताया न तादृशी स्वरूपतो हृदत्वस्य घटकतावच्छेदकत्वादि हेतुवह्न्यभाववत्त्वेनावच्छेदकत्वादिति
वाच्यं । तथापि तस्याः प्रकारविधया घटकतावच्छेदकवह्न्यभावावच्छिन्नत्वात् अन्यथा जातिमान् जातिमत्त्वरूपं यद् घटकतानवच्छेदकरूपं तदवच्छिन्नविषयताया: प्रकारविधया घटक
तावच्छेदकजातिमत्त्वावच्छिन्नविषयितात्वेनैवोपादाने रसंगत्यापत्तेः तथापि विशिष्टघटकतावच्छेदकरूपावच्छिन्नत्वभिन्नकिंचिदवच्छिन्नत्वाश्रयविषयिताशून्यत्वं विवक्षितं वह्न्यभा
वावच्छिन्नत्वे वह्न्यभाववत्त्वविशिष्टवत्त्वं तत्रावच्छिन्नत्वं योर्भेदान्नासंभवः धर्मितावच्छेदकभावापन्नजातिमत्त्वावच्छिन्नविषयिताया: प्रकारविधया जातिमत्त्वावच्छिन्नविषयितारूपत्वमिव
तादृशविषयितानिष्ठजातिमत्त्वावच्छेद्यतात्वे जातिमत्त्वावच्छिन्नविषयितात्वमेवास्त्वेनाव्याप्तिर्हृदे हृदत्वे साध्यः अत आह यद्रूपेति । यद्रूपावच्छिन्नविषयितान्यत्वस्य यद्रूपावच्छिन्नविषयिताया
मुक्तौ हृदत्वेन हृदत्वे धर्मितावच्छेदककवह्न्यभाववत्त्वानवगाहित्वानुपपत्तिरतो ज्ञाने शून्यत्वान्तं निवेश्यं । जातिमान् जातिमानिति सप्रतिबन्धकज्ञाने व्याप्तिमाह । अप्रतिबध्यकेति । अप्रतिबं
धकं यज्जातिमान् जातिमानिति ज्ञानं तद्विषयतावच्छेदकं यज्जातिमत्त्वादिकं जातित्वेन धर्मितावच्छेदकतया निविष्टहृदत्वादिकमिति सर्वः । तथा च जातिविशिष्टजातिमत्त्वावच्छिन्नविष
२ यिते वा व्यापकविषयितेति भावः । नैतादृशव्यापकविषयिताशून्यत्वनिवेशे अभाववान् वह्न्यभाववानिति ज्ञाने वह्न्यभाववद्धृदत्वावच्छिन्नविषयितासत्त्वेन स्वरूपतो हृदत्वावच्छिन्नपक्षे
क हृदो वह्निमानित्यनुमिति प्रतिबन्धकत्वेन चासंभवः न हि तत्राभावत्वावच्छिन्नविषयितात्वं वह्न्यभाववद्धृदविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं न वा तत्र वह्न्यभाव
वद्भावावच्छिन्नविषयित्वं अभावत्वेनाभावस्याभानात् येन तादृशबुद्धेर्विशिष्टविशिष्टविषयिताव्यापकविषयितावत्त्वेन व्याप्तिः स्यात् । न च यद्रूपावच्छिन्ने सत्त्रयद्रूपनिष्ठावच्छेदक
ताया स्वव्यधिकरणधर्मानवच्छिन्नत्वं विशेषणं देयं तेनोक्तज्ञानीयहृदत्वनिष्ठावच्छेदकतायाः स्वव्यधिकरणेनाभावत्वेनावच्छिन्नत्वान्न व्याप्तिरिति वाच्यं । एवमपि पर्वतो वह्न्यभा
वान् इत्यस्यापनेयवह्निमत्सर्वतादिव्याप्त्याप्तेः वह्नित्वेन वह्नित्वावगाहिन्यां पर्वतो वह्निमत्त्वानित्यादिबुद्धौ च वह्निमत्सर्वतत्त्वावच्छिन्नविषयितायाः सत्त्वात् न हि तत्र वह्नित्वावच्छिन्नविषयतावह्नि
मत्सर्वतविषयिताव्यापिका न वा तत्र वह्निमद्विशिष्टपर्वतत्वावच्छिन्नविषयिता तादृशस्ति । वह्नित्वेन वह्नित्वस्य भानात् । येनोक्तविशेषणेन तद्बुद्धिव्याप्तिः स्यात् एवं तत्र यद्रूप

३२

पदेन वह्नित्वविशिष्टपर्वतत्वयोरेव व्याप्यतया तदुभयनिष्ठावच्छेदकतायाः अधिकरणधर्मानवच्छिन्नत्वात् वह्नित्वनिष्ठावच्छेदकतावच्छेदकताया एव तथात्वात् इति प्रोक्तविशेषणेनापि
चैतद्दोषानवारणसंभवः यदि च तत्र वह्नित्वविशिष्टनिष्ठावच्छेदकताया वह्नित्वांतर्भावेणापि पर्याप्तिस्तदापि तस्यां न व्यावर्तते स्वअधिकरणधर्मानवच्छिन्नत्वं वक्तुं वह्निवह्नित्वयोरवच्छेदक
तापर्याप्तिर्वह्नित्वस्य तद्घधिकरणधर्मताया एव दुर्घटत्वात् स्वाधिकरणधर्मकिंचिद्धर्मावच्छिन्नत्वं वैयधिकरण्यमिति चेन्न हि उक्तदोषवारणाय दृश्यस्वेतन्नविशेषणं चेदभिमतं तदा
याथार्थ्यरूपविशेषणवैयर्थ्यात् न सर्वस्य द्वितीयलक्षणमोहेति दीधितिकाराणामवतारणमसंगतमापद्येत भवदुक्तविशेष्यावच्छेदकताविशेषणमनुपादाय स्वअधिकरणप्रकारा
वच्छिन्नविशेष्यत्वानिरूपकत्वरूपयाथार्थ्यरूपमौलविशेषणेनैवोक्तबुद्धीनां वारणासंभवेन तत्सार्थक्यासंभवात् स्वोल्लेखितविशेषणमुपादाय मौलविशेषणवैयर्थ्यस्य सिद्धमनं
परिस्फुरत्येति न्यायनयत्वात् स्वावच्छेदकतावच्छेदकसंबंधेन स्वव्यधिकरणधर्मावच्छिन्नाया या अवच्छेदकतानतिरिक्तत्वरूपभवदुक्तविशेषणस्यापि भेदकूटघटितत्वेन लाघवानवकाशा
च्चे। न च यत्संबंधावच्छिन्नयद्रूपावच्छिन्नविषयिताकं यादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संबंधावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वमेवा
व्यापकविषयिताशून्यत्वं समवायावच्छिन्नाभावत्वावच्छिन्नविषयत्वादीनां वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयित्वाव्यापकत्वादुक्तबुद्धिषु दास इति वाच्यं तथापि वह्न्यभाववत्त्वे समवायाव
वच्छिन्नवह्न्यभावसाधनेन वह्निमद्ह्रदस्य वैयर्थ्यस्वरूपबाधाव्याप्तेः वह्निमद्ह्रदत्ववत्ववृत्तित्वानेव वह्नित्वेन वह्नित्वभानात् समवायावच्छिन्नवह्नित्वावच्छिन्नविषयितायाः उक्तबोधविषयिताव्याप
कत्वाच्चेत्यादृशभावत्वात् न च यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिताकं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तत्संबंधावच्छि
न्नतद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं तदर्थः अभाववान् वह्न्यभाववानिति ज्ञाने च वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्न
विषयितायाः तादृशस्य सत्त्वेन तद्धृदास इति वाच्यमेवमप्यभाववान् वह्न्यभाववानिति ज्ञानावारणात् वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयितानिरूपितायाः वह्न्यभावप्रकारितारू
पाभावत्वावच्छिन्नविषयितायाः सत्त्वेन तादृशविषयताव्यक्तेः वह्न्यभाववद्ह्रदविषयिताव्यापकत्वाभावात् तान च यद्रूपावच्छिन्ने सत्त्वं यद्धर्मिपर्याप्तिविवक्षिताभावत्वावच्छिन्नप्र
कारिता न केवलाभावत्वे पर्याप्तावच्छेदकताका अपि तु वह्न्यभावत्वे तदुभयपर्याप्तावच्छेदकताकेवैति न तादृशविशिष्टविषयिताव्यापिकेति वाच्यं वह्न्यभाववानिति ज्ञानेपि

वह्नित्वावच्छिन्नप्रकारितानिरूपिताभावत्वावच्छिन्नप्रकारितेयवन्न्स्यभावत्वावच्छिन्नप्रकारि[illegible]तात्वेनव्यवह्रियते तदुभयनिष्ठविषयितानिरूपकत्वान्नव्यतिरिक्ता तत्र स्वविषयिता
स्सुपेयते भानाभावात् एवं च नवन्न्स्यभावत्वपर्याप्तावच्छेदकतावैनितद्दोषतादवस्थ्यात् । अस्तु वा तत्र यथा तथा नथापि वन्न्स्यभावत्वेन हृदयमवगाहमानायां वन्न्स्यभाववान्न्वन्स्यभा
ववान्निति बुद्धौ व्यापके विषयिता भून्यतमव्याहतमेव यदि च यसंबंधावच्छिन्नयद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितेत्यादिरीत्या [illegible] परिष्कारेनैषदो
षः समवायावच्छिन्नवन्हित्वाभावत्वा[illegible]वच्छिन्नविषयतानिरूपितवन्न्स्यभाववद्वत्त्वावच्छिन्नविषयिताया एव विशिष्टविषयित्वाव्यापिकायाः सत्त्वादिति विभाव्यते तदाप्य
भावोवन्हिमान् दित्यादौ धूमाभाववदभावरूपबाधाव्याप्तिरन्त्याव्यपरिहारेयवन्न्स्यभावत्वेनाभावसमवगाहमानायावन्न्स्यभाववान्न्वन्स्यभाववयानित्याकारिकायायथोक्तवि
नैर्धूण्णाक्रांतायाश्च प्रतिबंधकत्वादिस्वत्रैदं समाधानं विषयितानिरूपितयद्रूपावच्छिन्नविषयिताच्यापद्दृशविशिष्टविषयक[illegible] स्वसमानाधिकरणाभावप्रतियोगि
तावच्छेदकं स्वभिन्नतद्रूपावच्छिन्नविषयितानिरूपितविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वे व्यापकविषयिताशून्यत्वं तत्र [illegible]र्थः एवं चाभाववान्न्स्य
भाववानित्यादिज्ञाने विशिष्टविषयिताव्यापिकायाः वन्न्स्यभावत्वावच्छिन्नविषयितानिरूपितत्वदविषयितानिरूपिताभावत्वावच्छिन्नविषयितायाः [illegible] वन्स्यभा
वप्रकारिताव्यक्तिभिन्नायाः सत्त्वेन न दोषः स्वभिन्नत्वोपादानाच्च वन्न्स्यभावत्वावच्छिन्नविषयितानिरूपितत्वदविषयितानिरूपितत्वात्त्वकवन्न्स्यभावत्वावच्छिन्नविषयि
ताव्यक्तेर्वन्न्स्यभाववान्कदन्द्रत्वाकारकज्ञाने सत्त्वेऽपि न तस्या अव्यापकत्वहानिः न च स्वपदेन यद्रूपावच्छिन्नविषयितात्वविशिष्टस्योपादेयतया तदवच्छिन्नभेदस्य
नवन्न्स्यभावत्वावच्छिन्नविषयितायां संभवतीति कथं वन्न्स्यभाववान्न्वन्स्यभाववानिति ज्ञानव्यावृत्तिः यत्किंचिन्नाद्दृशविषयितानिवेशोऽवच्छेदकवन्न्स्यभाववानित्यादावपिता
दृशविषयितासत्त्वाद्व्यापकत्वमेवासिद्धं यद्दूषयितात्वव्यक्तिनिरूपितविषयितानिरूपितत्वदूषयिताव्यक्ति[illegible]भिन्नयद्दूषयितात्वभित्यादिरीत्यातत्र[illegible]व्यक्ति
त्वेन विषयितानिवेशेऽव्यापकविषयिताशून्यज्ञानस्यैवाप्रसिद्धिः अभाववान्न्वन्स्यभाववानिति विशिष्टविषयकज्ञाने हृदयेयवन्न्स्यभाववानिति[illegible] नीमविषयितायाः अस

ष्टा

६ स्वभिन्नयद्रूपावच्छिन्नविषयितानिरूपित ८

त्वेन तस्या अप्यव्यापकत्वादिति वाच्यं स्वान्यत्वत्वनिरूपितविषयतानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वस्य तेनोक्तत्वात् स्वान्यत्वं स्वत्वउभयाभाववि
धर्मावच्छिन्नत्वमेवेति अत्र वदंति । अभावे पक्षे संयोगेन वह्नेः साध्यत्वे स्वरूपतोऽभावत्वस्य पक्षतावच्छेदकतया स्वरूपतोऽभावत्वघटितेन त्वभाववदभावरूपबाधेऽव्याप्तिः यतः अभाववान्
न स्वभाववानिति अभावत्वेनाभावत्वावगाह्यप्रतिबंधकग्रहो न वार्यते । स्वभिन्नत्वस्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितायाः
अभावो न स्वभाववानिति दोषविषयके निश्चयेपि सांसर्गिकविषयितामादाय सत्त्वेनाविशिष्टविषयिताव्यापकत्वाभावादिति । अत्रेदं बोध्यं स्वभिन्नत्वं यद्रूपावच्छिन्नविषयितात्वउभयाभाववद्ध
र्मान्योभयाभाववद्धर्मवत्त्वे अभावो न स्वभाववानित्यादौ तद्रूपावच्छिन्नप्रकारताकनिश्चयादृशे धर्मः तत्राद्यो व्यापकघटकः न तु द्वितीय इति न दोषः वस्तुतस्तु । स्वनिरूपितविषयितानिरूपितत्वरूप
संबंधघटकविषयितायां सांसर्गिकविषयितान्यत्वं विशेषणं तेन तं प्रति विषयसंबंधेन वन्स्वभावत्वावच्छिन्नविषयिताविशिष्टाभावत्वावच्छिन्नविषयितायाः विशिष्टविषयिताव्यापिकायाः अभा
न वान्न स्वभाववानित्यादावेव सत्त्वाव्याप्तिरिति । यत्तु । शतमते हृदो वह्निमान्नवेति संशयवारणाय निश्चयस्य स्वाव्यापकत्वेपि विषयिताद्वयनिवेशमते तादृशसंशयस्य वह्नित्वावच्छिन्नविष
यितानिरूपितहृदत्वावच्छिन्नविषयितायाः वह्न्यभावविशिष्टहृदत्वविशिष्टविषयिताव्यापिकायाः सत्त्वेनैव वारणसंभवात् मूलोक्तनिश्चयपदं व्यर्थमिति तन्न सर्वत्र तस्य प्रयोजनाभावेपि घटो
जलमित्यादिस्थलीयजलान्यघटत्वकबाधाव्याप्तिवारणार्थत्वात् अन्यथा घटो जलं न वेत्यादिसंशयस्य जलत्वजलभेदकोटिकस्य जलत्वप्रकारताया निरवच्छिन्नत्वेन यद्रूपावच्छिन्नविषयि
तात्वेन ग्रहीतुमशक्यतया निरुक्ताव्यापकविषयिताशून्यत्वस्य तत्राक्षततया तादृशदोषेणाप्यावर्तनादिति अभावे संयोगेन वह्न्यादेः साध्यत्वेऽभावो वह्निमान्नवेति संशयवारणमपि तत्प्र
योजनं अन्यथा वह्नित्वावच्छिन्नविषयितानिरूपितविषयिताया अव्यापकत्वाभावेनाव्याप्तेरिति न किंचिदनुपपन्नं । अत्र केचित् यद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयकत्वसमा
नाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यत्वं न निश्चये दातुं शक्यं । असंभवापत्तेः प्रमेयवत्त्वादिना वह्न्यभावप्रकारकहृदत्वधर्मितावच्छेदककज्ञानसाधारण्याद्वह्न्यभाव
विशिष्टहृदत्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्वह्न्यभावत्वावच्छिन्नविषयितात्वं तच्छून्यत्वस्य दोषविषयकनिश्चयेऽभावात् न च यद्रूपावच्छिन्नविषयिता
निरूपितयद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयिताशालित्वं यादृशविशिष्टविषयकत्वं विवक्षणीयमिति वाच्यं । एवं तेन वह्न्यभावसाधनेन वह्निमत्पर्वते रूपबाध्याव्याप्तेः ।

३४

न च साध्यादिभेदेन लक्षणभेदस्य एवेति वाच्यं एकोक्त्यनादरे तावदन्यतमत्वस्यैव सम्यक्त्वाग्रेनिर्धार्यमाणत्वापत्तेः वह्निव्याप्यवत्सत्त्वरूपसत्प्रतिपक्षासंग्रहाच्च विषयि
ताघटकविधेयावाधासंग्रहात् तस्मादनुमितिप्रतिबन्धकतावच्छेदकलक्षणविषयितासंबन्धेन यद्रूपावच्छिन्नव्यापकत्वं वस्तुमेवादरणीयं। एतेनाभाववत्त्वादिना ह्रदत्वावगा
हिज्ञानवारणाय यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशमित्यादिक्रमेण परिष्कारो नादेय इति तन्तुच्छं याद्रूप्यविशिष्टविषयकत्व
समाने सत्यपि याद्रूप्यविशिष्टविषयकत्वं यद्रूपावच्छिन्नविषयितानिरूपितविषयित्वं यद्रूपं च वह्निविशिष्टाभाववद्ध्रदत्वोभयादिकं पूर्वोक्तं यथाभ्रमत्वगास्ये तत्पाचे
प्रमेयत्वेन वन्ह्यभावावगाह्युक्तज्ञाने वह्निविशिष्टाभावनिष्ठावच्छेदकताकविषयितानिरूपितविषयिताविरहस्य दोषात्। अपरे तु अथ यद्रूपावच्छिन्नविषयितासमा
नाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वनिवेशे अभावत्वेन ह्रदत्वावगाहस्वभाववत्त्वान वन्ह्यभावपयानित्यादिज्ञानवारणा
मन्त्राद्यं अभावत्वावच्छिन्नविषयितात्वस्यैव वन्ह्यभाववद्ध्रदविषयकत्वे समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेन यद्रूपपदेनाभावत्वस्य धर्तुमशक्यत्वात् वन्ह्यभावव
दभाववत्त्वस्य धर्तुमशक्यत्वेऽपि तद्रूपे तद्रूपावच्छिन्नविषयिताशून्यत्वस्य सत्त्वात्। न च यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशं तद्रूपावच्छिन्न
विषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं निवेश्यं तथा चाभावत्वावच्छिन्नविषयितानिरूपितवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयितात्वं न चेति तादृशविषयिताशू
न्यत्वं न तत्रास्तीति वाच्यं अभावत्वावच्छिन्नविषयितानिरूपितवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयिताया अपि वन्ह्यभाववद्ध्रदत्वविशिष्टविषयकत्वाव्यापकत्वाभावात् वन्ह्यभाववत्त्वमात्रा
वच्छिन्नविषयितानिरूपितवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयिताया अव्यापकत्वात् तच्छून्यत्वाभावाऽसंगतिरिति वाच्यं। तथापि वन्ह्यभावत्वेन ह्रदत्वावगाहिभ्रमवारणासं
भवात्। न च भ्रमान्यत्वं विशेषणं देयमिति वाच्यं एतत्कल्पे तस्या उपादेयत्वात्। न च यद्रूपावच्छिन्नविषयिताव्यापकमित्यत्र यद्रूपनिष्ठावच्छेदकत्वं यद्रूपाव्यतिधर्मानवच्छि
न्नत्वं विशेषणं [illegible] ज्ञानत्वप्रमेयत्वादिना ह्रदत्वावगाहिज्ञानस्य प्रमात्वाद्व्यापकविषयिताशून्यत्वेन वारणादिति [illegible] वाच्यं तथापि प्रकारीभूतवह्नित्वस्याभावत्वेन

(क्रूमे?) तो

३४

68

भाव

तानावारणात्॥ ननु वह्निदोऽभाववद्भाववानिति ज्ञानं वाच्यं तच्चाभावत्वेन वह्नित्वाद्यगाहितया शुद्धवह्नित्वावच्छिन्नप्रतियोगितायाः संसर्गत्वानुपगमात्तादृशविशिष्टविषय
कमितिवन्न्यभाववत्ताद्रूपदोषेणाव्याप्तिरिति वाच्यं अभाववत्सर्वत्र वन्न्यभावसाधने वह्निमत्सर्वत्रेव्याप्तेरभिधानात् न च यथा तादृशविषयितात्वं तादृशप्रतियोगितावच्छेदकं तादृशविषयि
तात्वावच्छिन्नाभाववत्त्वविशेषणं देयमिति वाच्यं वह्नित्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितानिरूपितहृदत्वावच्छिन्नविषयितानिरूपिताभावत्वावच्छिन्नविषयितात्वा
दिरूपस्य तादृशविषयितात्वस्यापि तादृशविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावादिति चेन्न तन्नत्वेनाभावत्वेन स्वतन्त्रविशेषणस्यापि देयत्वात्
स्वाभाववन्निष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताकत्वस्वाश्रयनिष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारतावत्त्वोभयसंबंधेन किंचिद्धर्मवज्ज्ञानान्यत्वं देयमिति यद्वा इदन्तु
गतोक्तिसंभवात् केचित्तु स्वविशिष्टविशेष्यताकत्वस्वविशिष्टविशेष्यताकत्वोभयसंबंधेन यत्किंचिद्धर्मविशिष्टान्यत्वं तत्र एकं विशिष्ट्यं स्वनिष्ठप्रकारतानिरूपि
तत्वस्वाश्रयवन्निष्ठोभयसंबंधेन अपरं स्वनिष्ठप्रकारतानिरूपितत्वस्वाभाववन्निष्ठत्वोभयसंबंधेनेत्याहुः परे तु विषयतावच्छेदकांशे स्वव्यधिकरणप्रकार
वच्छिन्नविषयताशून्यत्वमेवमुक्तविषयतावच्छेदकांशे तु स्वकोपादाने ज्ञानपदस्य निश्चयपरत्वे वैयर्थ्यं च मिलितावच्छेदकांशे इत्युक्तौ अभावत्वेन वह्नित्वाव
स्य५ गाहिभ्रमेण वारणं स्यादित्याहुः परे तु यद्रूपावच्छिन्नयत्किंचिद्रूपविषयितानिरूपितयद्रूपावच्छिन्नविषयितासत्त्वे यद्रूपावच्छिन्नविषयितात्वावान्तरध
र्मावच्छिन्ननिरूपितयद्रूपावच्छिन्नविषयितात्वं यद्रूपावच्छिन्नविषयितात्वेन निरूपकतावद्यद्रूपावच्छिन्नविषयितात्वं तादृशमित्यादिक्रमेण निवेशा
न्न कोऽपि दोषः नापि स्वाभाववन्निष्ठेत्यादेरावश्यकत्वं निश्चयत्वसार्थक्यार्थं स्वाश्रयेति यत्र विषयविशेषदोषज्ञाने पदार्थान्तरे भ्रमस्तत्संग्रहाय
स्वाश्रयनिष्ठेति न च यत्र दोषज्ञानं पदार्थान्तरे प्रमा भ्रमोभयात्मकं तत्संग्रह इति वाच्यं तत्रोक्तरीत्या प्रतिबध्यप्रतिबंधकयोर्दोषज्ञानेन तज्ज्ञानान्यत्वानिवे
शादिति याथार्थ्यादिकमन्यदेवेति न तद्वैयर्थ्यं मंगल इत्याहुः वस्तुतो यथेच्छं नातिमान्य वह्न्यभाववानिति ग्रंथ एवापाततः विषयिता संबंधेन यादृश

विशिष्टव्यापकं प्रतिबन्धकत्वं तादृशात्मेयवत्कंपत्र स्वरूपतो। स्वरूपतो बाधादृशविशेषणघटितो यादृशविशिष्टे शेषस्तत्र तादृशविशिष्टनिरूपितविषयिता या एव तादृशविशि-
ष्टस्य संसर्गतास्वीक्रियते न त्वन्यविषयाया इति जातिमद्वह्न्यभाववद्रूपविशिष्टनिरूपितविषयितामादाय स्वरूपतो हृदत्वघटितविशिष्टसंबन्धताविरहेणासंभवाभावात्परं तु यादृशे
मनुगतमिति एतेनाभावत्वेन हृदत्वावगाहित्वानवारणात् यथार्थपदस्यार्थक्यसंभवेन दीधितिकृतां यथार्थपदघटितद्वितीयलक्षणमासस्याविरोध इति परास्तं। अत एवानुमितिग्रंथे
परामर्शगतं व्येनभद्याचार्यैः जातिविशिष्टव्याप्तिप्रसिद्धिस्थले स्वंड्रूपेणा विषयितामनुपादायविषयितासंबन्धेन विशिष्टविषयस्यैव तत्तान्निवेशः कृत इति सारं। अभाववान्वत्समावेनानिति तो
न वारणाय स्वव्यापकरूपविशिष्टपदार्थपदरूपधर्मावच्छिन्नविषयितानिरूपकत्वं यावद्व्याप्याङ्गिनमेवविशेषणं तथाच यद्रूपावच्छिन्नविषयितानिवेशे तु व्यापकविषयिताशून्यत्वनिवे-
शस्य सम्यग्दोषे सप्राहुरिति कृतं पल्लवितेन। ननु यद्रूपावच्छिन्नविषयिताप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतानतिरिक्तवृत्ति सुखो हृदो वह्निमान् धूमादित्यादौ जातिमा-
न्वह्निमान् वह्निव्याप्यधूमवांश्चेत्यनुमितौ प्रतिबध्यताविरहेणासंभवो दुर्वार इति चेन्न यद्रूपावच्छिन्नविषयितात्वे प्रकृतानुमितित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्न-
विषयिताशून्यसमूहालम्बनानुमितित्वव्यापकत्वेन प्रतिबध्यतामाविशेषणीयत्वात् न चैवं तथापि हृदो जलसमाववानित्यादौ जातिमान् जलसमाववान् जलसमावव्याप्यवानित्यादिज्ञानवारणा-
मशक्यमेवानन्याहार्यानुमित्सनं तीकारणता दृशानुमिसप्रसिद्धेर्नदोष इति वाच्यं तथापि हृदो जलसमावत्वानन्नलसमावत्वप्रकारकप्रमाविशेष्यत्ववान् धूमादित्यादौ जातिमान्जलसमा-
वत्त्ववांस्त[illegible]व्याप्यवांश्चेत्यनुमितिवारणमशक्यमेवेति वाच्यं यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वसमूहालंबनानुमितित्वाभावप्रतियोगितावच्छेदकं तद्रूपाव-
च्छिन्नेनिरूपिततद्रूपावच्छिन्नविषयिताशून्यप्रकृतानुमितित्वव्यापकत्वस्य निवेशनीयत्वात् अत एव हृदो वह्निमान् धूमादित्यादौ यन्नित्यादिना हृदत्वावगाहि वह्निमान् अवह्निमान् वह्निव्याप्यधू-
मवानित्याद्यनुमितेरपि [illegible] यत्संबन्धावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशं तत्संबन्धावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वेस्य तादृशानुमितावसत्त्वेन तथापि धूमहृदो वह्निमान् वह्निव्या-
प्यधूमवांश्चेत्यनुमितित्वव्यापकत्वस्य प्रतिबध्यतायामसत्तया न कोपि दोष इति दिक्।। अथ तथापि जातिमान्वह्निमानित्स[illegible]नुमितिवारणाय निरवच्छिन्नविशेष्यतावच्छेदकताकत्व-
मेव निवेश्यं पंच जलवान्वह्निमानित्यादौ जातिमद्धान्यवह्निमानित्यनुमितिवारणाय निरवच्छिन्नतद्यच्छेदकत्वमिति दिगिति चेन्न एकमात्रदोषस्थले इति पंक्तिमग्रिमव्याख्यानालोचनया
~~[illegible]~~ कौक्ति रक्षण एवेदृशानीं निर्भरात् अथाव्यापकविषयिताशून्यानुमितिनिवेशो वह्निमान् धूमादित्यादौ हृदो व-
(४ सम्पाम जातिमत्त्वस्य यद्रूपपदेनोपादाने पूर्वप्रयोजनसैधित्यादाहत एवेति ४=) त्वेन तत्प्रतिबध्यताविरहेणासंभवापत्तावपि वह्नित्वावच्छिन्नविषयितानिरूपित ३५

[illegible]

वह्निमान् पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेत्यनुमितिवारणात् वह्न्यभाववद्वृत्तेरिति व्याप्यभावेन व्यापकत्वविवक्षावैयर्थ्यं। एवं पर्वतो वह्निमान् वह्निविशिष्टधूमादित्यादौ सामानाधिक-
रण्येन वह्नेः साध्यत्वे वह्न्यभाववत्सर्वतेऽतिव्याप्तिस्तथाहि पर्वतत्वव्यापकत्वविशिष्टसंयोगो हेतुतावच्छेदकसंबंधः तत्संबंधेन वह्निवैशिष्ट्यं च तथा च पर्वतो वह्निमान् वह्निव्याप्यतादृशधूमवा-
न् पर्वतत्वावच्छेदेन वह्निमानित्यनुमितौ या पर्वतत्वावच्छिन्नविषयितानिरूपिता वह्नित्वावच्छिन्नविषयितानिरूपिता या पर्वतत्वावच्छिन्नसंयोगस्वरूपयद्रूपावच्छिन्नविषयिता सा प्रकृतानु-
मितित्वव्यापिकैव तादृशसंयोगसंबंधेन वह्निविशिष्टपर्वतत्वात्मकयद्रूपं तत्प्रसिद्धं येन तदवच्छिन्नविषयितायाः प्रकृतानुमितित्वव्यापकतयोक्तविशेषणेन तद्व्यावृत्तिः स्यात् एवं च
तादृशानुमितेरव्यापकविषयिताशून्यत्वाद्दर्शितबाधेऽतिव्याप्तिरिति व्यापकत्वोपादानं। एवं साध्यत्वस्य निरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयि-
ताविशिष्टयद्रूपावच्छिन्नविषयितात्वं द्रव्यादिक्रमेण व्यापकविषयिताशून्यत्वं निवेश्यते तदा पर्वतो वह्निमान् तद्धूमवान् ह्रदश्च वह्निमानित्यनुमितेरवारणमेव ह्रदत्ववह्नि-
त्वावच्छिन्नविषयिताद्वयमध्यगतविषयिताविरहात् सांसर्गिकविषयितास्तीति चेत् तदा अभावो वह्निमानित्यादौ अभाववान् वह्निमानित्यनुमितेरप्रतिबध्यतायाः संग्रहे वारणा-
य तदन्यत्वप्रवेश आवश्यकः वस्तुतस्तु कृविसक्षापंचेतो एकोनेकोवा स्वरूपतो भानार्हः पक्षतावच्छेदकः क्वचित्तु तदवच्छेदकांशे तत्र तादृशतादृशपक्षतावच्छेदके विलक्षणाः

ता पर्याप्यवृत्तिं सामनुगतो खंडलक्षणं। एवं च जातिमान् वह्निमानित्यनुमितेः प्रकृतत्वाभावादेवारणसंभवात् किमव्यापकविषयिताशून्यत्वेन। न चैवमाहार्यज्ञानवारणा-
र्थमनुमितित्वनिवेशः अनुमितिपूर्वोक्तविरोधस्मृतिराश्यां ज्ञानत्वानुमितित्वयोः समव्याप्तिरत्वेपि मूलानुरोधेनानुमितित्वस्यैव निवेश इदुपत्र निर्भरः प्रयोजनं तु पर्याप्यपदनिवेशमभि-
प्रेत्य तत्केचेत्पर्याप्ताव विप्रयोजनं वस्तुतस्तु ह्रदो वह्निमान् वह्निव्याप्यधूमवांश्चेति लौकिकप्रत्यक्षस्य शंखः पीतः पीतत्वव्याप्यवान् शंखत्वावांश्चेति दोषविशेषजन्यप्रत्यक्षस्य वा-
रणमेवानुमितित्वोपादानफलं। लौकिकसंनिकर्षाजन्यज्ञानत्वस्य सिद्धमनुमितित्वव्याप्यत्वे तावल्लाघवाद्गुरुत्वाच्चेति निगर्वः। विशिष्टविषयितासामान्यस्येति। अथात्र
पदस्यार्थमेव। न च यद्रूपावच्छिन्नविषयिताप्रकृतानुमितिप्रतिबंधकतानिरूपितस्वरूपसंबंधरूपावच्छेदकतावती सुरभिवह्न्यभाववद्घटकवन्न्यभावेऽतिव्याप्ति

४ ...रं नु भूप्यमय द्रूपावच्छिन्नविषयितायां पुनः किंचित्वं निवेशनीयमिति ... तेनाभावत्वावच्छिन्नप्रकारितानिरूपितग्रहविषयितात्वव्यापकत्वेपि न क्षतिः निरूपकभेदेपि निरूपकताभेदके विषयताया ऐक्यात् ...

... [illegible] ...

रितिवाच्यं ॥ फक्करी सा संभववारणाय व्यापकविषयिताशून्यत्वस्यावश्यकतया वन्ह्यभाववद्ग्रहत्वावच्छिन्नविषयितात्वं वन्ह्यभावत्वावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियो

गितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यं यद्भ्रमावद्ग्राह्याकारकं ज्ञानमेव तद्धेति त्वविशिष्टवद्भ्रमावत्वावच्छिन्नविषयितायाः प्रत्यक्षानुमितिप्रतिबंधकतानि

रूपितस्वरूपसंबंधेन यद्रूपावच्छेदकत्वानाश्रयत्वेनानिव्याप्तेरनवकाशात् अत्रेदं समाधानं बोध्यं । एतादृशविशिष्टस्यासर्वदोषे ... वारणेपि गोत्वाभावो

गोत्वाभाववान्तद्भ्रान्तित्वादिस्याशेसंदेहो नो गोत्वाभावो गोत्ववानिति भ्रमविषयगोत्वाभावरूपपक्षे । निव्याप्तिः गोत्वविषयिताया अव्यापकत्वासंभवेन

गोत्ववत्त्वे ... सामानाधिकरण्यात् घटत्वादिविषयिताया एवाव्यापकत्वेनोक्तभ्रमस्य तच्छून्यत्वादिसव्यापकविषयिताशून्यत्वेनानिवेशोपि सामान्यपदमावश्यकमिति । गोत्वगोत्वाभावत्वे

तदुभयात्मकं यद्रूपं तदवच्छिन्नविषयिताव गोत्वाभावद्रूति गोत्वत्वेनापीति न गोत्वाभावो गोत्ववानिति ज्ञानस्याव्यापकीभूतविषयिताशालित्वं नेमः कार्यः अत्रेदमाशंक्यते । अभावत्वे

न हृदत्वावगाह्य भावे वान्वेत्स भाववानिति ज्ञानवारणाय पूर्वोक्तरीत्या यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टसमानेत्याद्यर्थं अव्यापकं विषयिताशू

न्यत्वस्यैव तत्क्रियते तदा ... ते गोत्वाभावत्वावच्छिन्नविषयितानिरूपितगोत्वत्वावच्छिन्नविषयिताया अव्यापकत्वेनोक्तभ्रमस्य तच्छून्यत्वेन संभवस्येति दोषविशेषणे सामान्यपदं व्यर्थमिति ।

अत्राहुः गोत्वाभावत्वावच्छिन्नविषयितानिरूपितगोत्वविषयिताया निरवच्छिन्नत्वेन यद्रूपावच्छिन्नविषयितेत्यनेनोपादानैः संभवात् गोत्वाभावे गोभेदसाधकस्य हेतो गोत्वा

भाववारणार्थं सामान्यपदमावश्यकमिति । न च द्वितीय यद्रूपावच्छिन्नत्वं विहाय यन्निष्ठत्वनिवेशे नैवोक्तभ्रमवारणे सामान्यपदं व्यर्थं । तावन्मात्रेणोक्ताभावत्वेन

हृदत्वावगाह्यभाववान् वन्ह्यभाववानिति भ्रमवारणं संभवति हृदत्वावच्छिन्ननिष्ठविषयितानिरूपितहृदनिष्ठविषयिताया वन्ह्यभाववद्विषयिताव्यापकतयोक्त

भ्रमस्य तच्छून्यत्वाभावादिति वाच्यं तथा सति तद्वैयर्थ्यस्येष्टत्वात् । अर्थज्ञानभेदे नाविषयिताया अभेदेपि विषयभेदेन तद्भेदाद् वन्ह्यभावत्वावच्छिन्नविषयितानिरूपिततत्त

अत्रेदं बोध्यं २

६ अत्रेवं रीत्या यदि स्यान्यत्वस्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वमिति द्वितीययद्रूप पदं (स्पे॰) परि॰

सम्यते तदा हृदत्वपर्याप्तावच्छेदकतारूपविषयिताया हृदाभावत्वावच्छिन्नविषयिताविशिष्टविषयितात्वस्य व्यापकतावच्छेदकत्वात्पक्षाऽभाववान् ...

ह्रदत्वावच्छिन्नविषयितानामव्यापकतया दोषनिश्चयेत स्वरूपसत्त्वाभावादसंभवः एवं निरूपितत्वसंबंधेन स्वात्मकस्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन वा यद्रूपावच्छिन्न
विषयिताविशिष्टविषयितात्वं तादृशमिति कल्पयोः ह्रदत्वरूपधर्मितावच्छेदकविषयितामादाय व्यापकत्वाद्भाववान्ह्रदस्वभाववानिति ग्रहेण वार्यते इति द्वितीयं यद्रूपं निवेश्यमिति दिक्
एवं वा। अथ यद्रूपावच्छिन्नविषयितासामान्यमित्यत्र सामान्यपदं व्यर्थं ह्रदो वह्न्यभाववानिति ज्ञानीयह्रदत्वावच्छिन्नयत्किंचिद्विषयितायाः स्वरूपसंबंधरूपावच्छेदकत्वेपि तत्सा
नस्य ह्रदत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्वह्न्यभावत्वावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयिताशून्यत्वाभावादेव वारणात् संभवात् ह्रदद्र
साकारकत्वानीयविषयितास्वस्वरूपसंबंधरूपावच्छेदकत्वविरहात् न चैतत्कल्पे तादृशद्व्यापकविषयिताशून्यत्वं न निविष्टं च वह्न्यभाववज्जातिमत्त्वावच्छिन्नविषयताया
अपि स्वरूपसंबंधरूपावच्छेदकत्वात् जातिमान्वह्न्यभाववानिति ज्ञानस्य जातिमान् ह्रदद्रव्यत्वादिज्ञानीयविशिष्टस्य ह्रदे वह्न्यनुमितिप्रतिबंधकत्वादिति वाच्यं तावतापि ह्रदत्वसामाना
धिकरण्येन वह्न्यभावे व्याप्तेः तत्र जातिसामानाधिकरण्येन वह्न्यभावविषयितायाः स्वरूपसंबंधरूपावच्छेदकत्वाभावेन तादृशाव्यापकविषयिताशून्यत्वदलसार्थक्यात् न च सं
योगः संयोगाभाववान् द्रव्यत्वात् संयोगः संयोगवानिति बाधभ्रमविषये संयोगेऽतिव्याप्तेः तत्र संयोगावच्छिन्नविषयितात्वस्य संयोगत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगि
तानवच्छेदकत्वाभावात् उक्तभ्रमे तद्रूपावच्छिन्नविषयितायाः सत्त्वस्याकिंचित्करत्वादिति वाच्यं संयोगः संयोगवानिति भ्रमे संयोगावच्छिन्नविषयितात्वस्य तादृशतया तादृशविष
यिताशून्यत्वाभावादिति चेन्न गोत्वाभावो गोत्वाभाववानित्याकारे गोत्वाभावो गोत्ववानिति बाधभ्रमविषये गोत्वाभावेऽतिव्याप्तेः तत्र गोत्वाभावत्वविशिष्टविषयकत्वसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वस्य गोत्वावच्छिन्नविषयितात्वे सत्त्वात् न च यत्संसर्गावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशाभावप्रतियोगितावच्छेदकं तत्संसर्गावच्छिन्नतद्रू
पावच्छिन्नविषयिताशून्यत्वार्थः गोत्वाभावत्वविशिष्टविषयित्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं समवायसंसर्गावच्छिन्नगोत्वावच्छिन्नविषयितात्वं गोत्वा
भावज्ञाने प्रतियोगितासंबंधेन गोत्वभानात् तथा च तद्रूपावच्छिन्नसमवायसंबंधावच्छिन्नविषयिताशून्यत्वं गोत्वाभावो गोत्ववानिति ज्ञाने नास्तीति न तत्रातिव्याप्तिरिति वाच्यं
तथापि गोत्ववत्समानकालीनगोत्वाभावपक्षकस्थले तादृशगोत्वाभावेऽतिव्याप्तेः जातिमज्जातिमत्त्वावच्छिन्नविशेष्यतायाः संसर्गानवच्छिन्नतया संसर्गनिवेशे जातिमान्

३८

जातिमानिति ज्ञानकारणाच्च न च यद्रूपावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नसांसर्गिकविषयतानिरूपितयद्रूपावच्छिन्नविषयिताकत्वं तादृशरूपावच्छिन्नसांसर्गिकविषयतानिरूपिततद्रूपावच्छिन्नविषयताशून्यत्वं निवेश्यान्न दोषः समवायत्वावच्छिन्नसांसर्गिकविषयतानिरूपिततादृशगोत्वाभावत्वावच्छिन्नविषयितात्वस्य तथात्वात् तदवच्छिन्नविषयिताशून्यत्वस्य तादृशज्ञाने ऽसत्त्वादिति वाच्यं स्वरूपसंबंधेन यत्र गोत्वस्य गोत्वाभावे भ्रमः तत्र गोत्वाभावत्वस्यापि स्वरूपसंबंधेन भानात् स्वरूपविषयितानिरूपितगोत्वाभावत्वावच्छिन्नविषयितात्वस्य तथात्वेन स्वरूपविषयितानिरूपितगोत्वत्वावच्छिन्नविषयितात्वस्यापि च तथात्वेन गोत्वाभावो गोत्ववानिति भ्रमविषये तादृशप्रसङ्ग इति आपत्तेः न च यद्रूपावच्छिन्नमुख्यविशेष्यितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशमुख्यविशेष्यिताशून्यत्वविवक्षया तत्र न दोषः गोत्वाभाववत्त्वावच्छिन्नमुख्यविशेष्यितात्वस्य गोत्वाभाववानिति ज्ञाननिष्ठाभावप्रतियोगितावच्छेदकत्वात् तदवच्छिन्नविषयिताशून्यत्वस्य तत्र प्रतिबन्धकीभूतज्ञाने ऽसत्त्वादिति वाच्यं तथा सति असंभवापत्तेः ह्रदो वह्न्यभाववानिति ज्ञानासंग्रहात् तत्र तादृशविशिष्टनिरूपितमुख्यविशेष्यिताशून्यत्वाभावात् तादृशवह्न्यभाववद्ह्रदत्वानवच्छेदकतया नमात्रायाः लक्षणसमन्वयासंभवात् किं वह्न्यभाववद्ह्रदावच्छिन्नमुख्यविशेष्यितात्वस्य तादृशतथात्वच्छिन्नमुख्यविशेष्यिताशून्यत्वस्य तत्राभावात् वैशिष्ट्यत्वं यद्रूपावच्छिन्नविषयतात्वमित्यादिविशेषणस्य च संप्रयोजनं तदभावात् सामान्यपदेनैव वारणात् यथा संनिवेशो वैयर्थ्याभावादिति। अन्ये तु स्वाभाववन्निष्ठत्वादिविशेषणस्यैव वृन्यकतये योक्तभ्रमवारणात् सामान्यपदस्य न तत्र प्रयोजनमित्याहुः अत्र यत्संबन्धेन स्वाश्रयत्वं संबन्धावच्छिन्नः स्वाभावो निवेश्यः अन्यथा वह्निमत्कालीन ह्रदो वह्न्यभाववानिति बाधाप्रवेशः तथा चोक्तभ्रमेपि सामान्यपदप्रयोजनमस्त्येवेत्याहुः। अपरे तु वह्न्यभावो वह्निमानित्यादौ वह्न्यभाववद्वह्न्यभावरूपबाधे केऽदेशे वह्न्यभावे इति आप्तिः केवलं वह्न्यभावविषयकत्वस्य तादृशविशिष्टविषयकत्वाव्यापकत्वाभावात् वह्न्यभाववद्विशिष्टवह्न्यभावविषयकत्वस्याव्यापकत्वेपि तादृशविषयिताशून्यवह्न्यभावत्वादिना पदार्थान्तरावगाहि भ्रमात्मकज्ञानीयवह्न्यभावत्वावच्छिन्नविषयिताया एवावच्छेदकत्वादिति सामान्यपदमुक्तमित्याहुः। यदि च यद्रूपावच्छिन्नविषयितात्वावच्छिन्ने निरूपितयद्रूपावच्छिन्नविषयितात्वं यद्रूपविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयतात्वावच्छिन्ने निरूपिततद्रूपावच्छिन्नवि

सर्गादिनिवेशे

३८

74

प्रयतात्वावच्छिन्नाभावनिवेशानन्तदोषः तत्रैवन्त्यभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितत्वं न वन्त्यभावपदस्य इति ज्ञानीयाभावत्वावच्छिन्नविषयतायां किंतु अभाववान्नव
न्त्यभाववानिति ज्ञान एवेत्युच्यते तदा सामान्यपदानुपादाने विशेषाभावादेनातिव्याप्तिः तत्र गोत्वाभावत्वावच्छिन्नविषयितात्वावच्छिन्ननिरूपितगोत्वत्वावच्छिन्नविषयिताल
स्य गोत्वाभावो गोत्ववानिति ज्ञानीयप्रकारविषयितायां सत्त्वात् सामान्यपदं व्यर्थमेवेति। परे तु हृदत्वावच्छेदेन वह्नेः साध्यत्वे वन्त्यभावकालीन हृदो वन्त्यभाववानिति व
न्त्यभावत्वेन प्रकारकग्राहिज्ञानस्य विषये तादृशहृदे इति व्याप्तिवारणाय सामान्यपदं प्रसिद्धरूपेण सार्थकं। न च तादृशहृदत्वावच्छिन्नविषयितानिरूपितवन्त्यभावत्ववि
षयितात्वस्य तादृशज्ञानपात(?)दवच्छिन्ने शून्यत्वाभावान्न दोष इति वाच्यं उक्तक्रमे वह्नित्वेन घटस्याविभानात् यदि चैवमपि तादृशविषयितानिरूपिताभावत्वावच्छिन्नविषयिता
त्वं तादृशं संभवतीति मन्यते तदा वन्त्यभावकालीनाभाववद्धृदविशेष्यकवन्त्यभावप्रकारकज्ञानमादाय दोषः स्यादत आहुः। अन्ये तु सामान्यपदं न व्यर्थं। अन्यथा वह्नित्वं वह्निसामा
ववद् इत्यादौ वह्नित्वं वह्नित्ववद् इति भ्रमविषये वह्नित्वे इति व्याप्तेः। यदि च तत्र वह्नित्वावच्छिन्नविषयितैव व्यापिका तथापि तत्र हृदे वह्निमत्कालीनवह्नित्वे वन्त्यभा
ववानिति [illegible] वन्त्यभाववानिति ज्ञानविषयेऽपि तदतिव्याप्तिः वह्निमत्त्वावच्छिन्नविषयितायामव्यापकत्वात् एवं कपिसंयोगाभाववान् कपिसंयोगाभाववानिति साध्ये अव्याप्य
ये वृत्तिज्ञानाभावविशिष्टस्य कपिसंयोगाभाववान् कपिसंयोगवान् इति ज्ञानस्य प्रतिबंधकत्वमाकपिसंयोगाभाववद्विषयकसमादाय कपिसंयोगाभाववत्सत्ति(?) अव्याप्तेश्चेत्याहुः।
अपरे तु नन्वत्र स्वरूपसंबंधरूपावच्छेदकत्वनिवेशोऽव्यापिविषयितानां व्यापित(?) वन्त्यभावविषयितायामपि स्वरूपसंबंधरूपावच्छेदकत्वादन्त्यभावात् तथापि व्याप्तिरतः सामान्यपदं तदर्थं
व्यापकत्वपर्यवसन्नः पदं तु तन्निवेशो व्यर्थः अव्यापकविषयिताशून्यत्वविशेषणेनैव केवदरवारणात् अथैवं संयोगे संयोगाभाववान् साध्ये संयोगः संयोगवानिति बाधभ्रमविष
यप्रसिद्धेऽव्याप्तिः संयोगत्वावच्छिन्नविषयिताया व्यापकत्वात् संयोगवत्संयोगत्वावच्छिन्नविषयितायाः पूर्णत्वमन्या[illegible] संयोगत्वेन संयोगत्वस्याभानात् संयोगावच्छिन्नविषयितारू
सा व्यापकाभावादिति सामान्यपदमावश्यकं। न चात्र समवायत्वावच्छिन्नविषयितायाऽव्यापकत्वं संयोगत्वविशिष्टविषयितायाः संयोगत्वसंसर्गतया भासमानसमवायत्वाव
च्छिन्नविषयितानियतत्वात् परं तु यद्रूपविशिष्टविषयितायद्रूपावच्छिन्नविषयितात्वेन [illegible] संयोगत्वावच्छिन्नविषयितात्वकालिकादिसंबंधेन संयोगत्वप्रकारकधीसाधार

ण्येवेतिसमवाय [illegible] त्वावच्छिन्नविषयितायास्त [illegible] ध्यापकत्वसंभवः। न चैवं विशेष्यदले यद्रूपनिष्ठावच्छेदकत्वे
पि संबंधनिवेशेनातिप्रसक्तिः। तथा च वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयितायाः। कालिकादिसंबंधेन तादृशह्रदत्वप्रकारकज्ञानसा
धारण्यात् असंभवदुरितवारणाय वह्न्यभावविशिष्टह्रदत्वे सामानाधिकरण्यसंबंधेन वह्न्यभाववद्ह्रदत्वे सामानाधिकरण्यं च स्वरूप
समवायोभयघटित विशिष्टवैशिष्ट्यबोधमर्यादया उद्देश्यतावच्छेदकविधेयसामानाधिकरण्यं तथा च कालिकादिना ह्रदत्वा
वच्छिन्नविशेष्यतावद्वह्न्यभावप्रकारकज्ञाने [illegible] निरूपितसामानाधिकरण्यसंबंधेन वह्न्यभाववद्ह्रदत्वेनैव यन्नावच्छेदकविशेष्य
ध्यतावच्छेदकताघटितसंबंधेनैव सामानाधिकरण्यमाननियमादसंभवात् संभवादिति तन्न उद्देश्यतावच्छेदकविधेयसामानाधिक
रण्यमानोपगमेऽपि निरुक्तविशिष्टतावच्छेदकनिरूपितसामानाधिकरण्यसंबंधेन वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयत्वोक्तविष
यितायाः सत्त्वेन तत्र ज्ञाने निरुक्तव्याप्त्यादेः [illegible] वह्न्यभाववद्ह्रदत्वे एव यद्रूपपदेनोपादेयत्वे तन्निष्ठावच्छिन्नविषयि
तायाः अप्रतिबंधकज्ञानसाधारण्यासंभवदुरितः य [illegible] तु संबंधावच्छिन्नयद्रूपनिष्ठावच्छेदकविषयितानुमिति प्रति
बंधकताने निरुक्तज्ञानस्य संबंधेन तद्रूपावच्छिन्नोद्देश्य [illegible] तथा वह्न्यभाववद्ह्रदत्वोभयावगाहिनः वह्न्यभा
वावच्छिन्नविशेष्यकह्रदत्वप्रकारकज्ञानस्य च वारणार्थं पूर्वविशेषणं च देयं एवं चास्माभिरपि किंचिद्विशेषणं दत्त्वा गमना
ववह्रदत्वे [illegible] यानिति दुर्ग्रहत्वानेवार्यितत्वाद्व्यवन एवेति चेन्न हि ह्रदत्वावच्छेदके विधेयसामानाधिकरण्यमानस्याप्रामाणि
कत्वेनैव [illegible] नूक्त [illegible] परित्यागात् यद्रूपावच्छिन्नवह्न्यभाववद्ह्रदस्येवोपादेयत्वे च यद्रूपनिष्ठावच्छेदकतानिरूपितसंबंधावच्छिन्न



76

त्वस्यावच्छेदकतया समवायसंबंधावच्छिन्नसंयोगत्वावच्छिन्नविषयिताव्यापकविषयिताशून्यत्वमपेक्षणीयं समवायत्वावच्छिन्नविषयितायाश्च नतादृशविषयिताया अ
व्यापकत्वमित्यसत्यापत्तिर्दुर्वारैवेति ध्येयं। अभाववान्वह्न्यभाववानित्यभावत्वेन रूपेण दत्तावगाहिबुद्धिवारणार्थं स्वसंबंधावच्छिन्नविषयितातादृशप्रतियोगितावच्छेदकत्वसं
बंधावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वस्यावलंबनीयतया संयोगत्वविशिष्टविषयिताव्यापकं समवायावच्छिन्नसंयोगत्वावच्छिन्नविषयितात्वमित्यनतिप्रसंगात्।
न संयोगत्वाभावे गोभेदस्य साध्यके गोत्वाभावो गौरिति प्रतिबंधकभ्रमविषयपक्षे ऽतिव्याप्तिरतः सामान्यपदं। न हि तत्र समवायावच्छिन्नगोत्वावच्छिन्नविषयिताया अव्यापक
त्वं शंकनीयं गोत्वस्य स्वरूपतो भानादिति वाच्यं तेजसि समवायेन वह्न्यभावस्य साध्यत्वे वह्नित्वेन तेजस्त्वावगाहिन्यां वह्निमान्वह्निमानित्यप्रतिबंधकबुद्धौ वह्निमत्तेजस्त्वावच्छि
न्नविषयितायाः सत्त्वेनाव्याप्तेः यद्रूपावच्छिन्नविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशतद्रूपावच्छिन्नविषयितानिरूपितविषयिताशून्यत्वस्य वक्तव्यतया समवाय
त्वावच्छिन्नविषयितानिरूपितगोत्वाभावत्वावच्छिन्नविषयितारूपायाश्चाव्यापकविषयितायाः सत्त्वेनादोषादिति अत्रेदं समाधानं। एवमभावो वह्निमानित्यादिबुद्धौ वह्न्यभावत्वं
दभावे ऽव्याप्तिः अभाववान्वह्न्यभाववानित्यप्रतिबंधिकायां अभावत्वेनाभावत्वावगाहिन्यां बुद्धौ वह्न्यभाववदभावत्वावच्छिन्नविषयितायाः सत्त्वात् तादृशद्रूपावच्छिन्नविषयितानिरू
पितविषयितानिरूपितयद्रूपावच्छिन्नविषयितात्वं तादृशं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यत्वं वाच्यं एवं च हृदो नद्यभिमत्वादौ हृदो द्रव्यमित्या
दौ बाधाघटकहृदत्वद्रव्यत्वादेर्वारणायैव सामान्यपदं अत एव हृदः पृथिवी न वेति संशयस्य पृथिवीत्वाभाववद्धृदविषयकत्वाव्यापकविषयिताशून्यतया पृथिवीत्वाभा
ववद्धृदे ऽतिव्याप्तिवारणाय निश्चयपदोपादानमपि संगच्छत इत्याहुः परे तु संयोगः संयोगाभाववानित्यादौ संयोगः संयोगवानिति भ्रमेपि संयोगेनातिव्याप्तिः संयोग
त्वसमवायत्वावच्छिन्नविषयितायाः संयोगत्वविशिष्टविषयित्वाव्यापकत्वाभावेपि संयोगवत्त्वसंयोगत्वस्याप्रसिद्ध्या पर्युदस्तत्वेपि च संयोगावच्छिन्नविषयितायास्तद्व्या
पिकायाः सत्त्वात्। न च संयोगावच्छिन्नत्व एवातिव्याप्तिरतः सामान्यपदं अस्तु निर्धर्मितावच्छेदककसंयोगवानिति निश्चीयीय संयोगावच्छिन्नविषयिताया अतथात्वान्ना
तिप्रसंग इति वाच्यं। स्वाव्यत्वस्वनिरूपितविषयितानिरूपितत्वोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयितात्वं यादृशविशिष्टविषयकत्वं

३९ समाने सादिक्रमेण परिष्कारस्य प्राप्तित्वात् संयोगः संयोगवानिति भ्रमे संयोगत्वावच्छिन्नविषयिताविशिष्टसंयोगत्वावच्छिन्नविषयितायास्तथाविधायाः सत्वेन तद्व्यावर्त्तनासंभवात् तथापि
जलादौ पृथिवीभेदे साध्ये जलं पृथिवीति प्रतिबंधकत्वभ्रमविषयकेवलजलादावतिप्रसंगवारणाय सामान्यपदनिवेशात् तत्र पृथिवीत्वप्रकारताया निरवच्छिन्नतया निरुक्तोभयसंबंधेन
जलत्वावच्छिन्नविषयिताविशिष्टेष्वुक्तोभयसंबंधेन यद्रूपावच्छिन्नविषयिताविशिष्टयद्रूपावच्छिन्नविषयिताशब्देनोपादानात् भ्रमात्मत्वात् इत्याहुः। अन्ये तु सामान्यपदं किमर्थमिति सामान्यगो
त्वाभावयोगोत्ववानिसनुमितिप्रतिबंधकगोत्वाभावयोगोत्ववानिति भ्रमविषयपक्षवारणार्थत्वं निवेश्य यत्किंचित्संबंधावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं पादत्राविशिष्टविषयकत्व समाने
सादिपरिष्कारादरा समवायसंबंधावच्छिन्नगोत्वत्वावच्छिन्नविषयितात्वस्य तादृशतयात्तद्वच्छिन्नशून्यत्वाभावान्न दोष इति तदुपर्यसंस्य तत्समाधानाय गोत्वत्वसमानकालीनगोत्वाभावयोगोत्व
वानिसादेविशिष्टपक्षवारणार्थं सामान्यपदमिति सत्तु संप्रदायप्रक्रिया। वस्तुतः ह्रदो जातिसमभाववानिसादौ जातिमान् जातिमानिति ज्ञानस्य कथं वारणं यद्रूपनत्वेन जातिमज्जातिमत्वस्यो
णोपादेयतया तद्रूपावच्छिन्नविषयिताया विशेष्यतारूपत्वेन संबंधावच्छिन्नतया घटत्वावच्छिन्नविषयिताया एवोपादेयतमोक्तज्ञानस्य तच्छून्यत्वात् तथा च जातिमेकद्वे। व्याप्तेः संबंधेन ● त्राक्यनि
न वेशन इति प्रथमे स्थल एव सामान्यपदस्यावृत्तिः यत्तु यद्रूपावच्छिन्नविशेष्यितात्वमव्यापकतावच्छेदकं तद्रूपावच्छिन्नविशेष्यिताशून्यत्वेन ज्ञानविशेषणेन गोत्वाभावरूपपक्षवारणं तदसदुढंड
त्वेनियम्याः प्राग्दूषितत्वादित्याहुः। तच्चिंत्यं॥ अन्ये तु निरुक्तनिरूपावच्छेदकतोक्त्ये जातिमान् जातिमानिति ज्ञानस्य वारणीयत्वेपि स्वरूपसंबंधरूपावच्छेदकताकत्वेन ह्रदो गोमयोज
नाभावेन संबंधविवेकाय पक्षस्य संचारयितुमशक्यत्वादिति चिंत्यं। ननु संशयनिश्चययोर्विषयिताभेदाद्दोषविषयितात्वव्यापकत्वमवच्छेदकतायां न संभवति। अन्यथा संशयस्यापि प्रतिबंध
कत्वाघटकत्वेऽस्त्वत आह समानेति निश्चयत्वविशिष्टीयतयेति। निश्चयत्वघटकज्ञानत्वादेः स्वरूपतो निवेशार्थं तथा च तदंतर्भावेण धर्मितेने संशयस्य प्रतिबंधकत्वमित्यर्थः॥ ननु भट्टाचार्यमते संश
ये विशेष्यताद्वयस्वीकारात्। वह्न्यभाववद्ह्रदविषयिताया निश्चयसाधारण्येनैकस्यापि स्वविरोधिधर्मधर्मितावच्छेदककस्याहार्यस्य वह्न्यभाववद्ह्रदविषयितायामनाहार्यतद्विषयिताभेदे दु
र्वारः। आहार्यतद्विषयितायां वह्निनिरूपितत्वादनाहार्यतद्विषयितायाश्च तदनिरूपितत्वादित्याशयेन शंकते नन्वेवेति। ताद्रूप्येति। अनाहार्यज्ञानसामग्रीताद्रूप्योपाधिघटिता। अनाहार्यज्ञानसा
मग्री च विपरीतज्ञानाभावघटिता न ह्येतादृशसामग्रीसंवलनसंभव इत्याहार्यसामग्रीप्रयोज्यविषयिताया नानाहार्यज्ञानसाधारण्यसंभवः अनाहार्यसामग्रीप्रयोज्यविषयितायाश्च ना
हार्यसाधारण्यसंभव इति भावः। सामान्यत आहार्यज्ञानसमानाकारानाहार्यज्ञानस्याप्रसिद्धत्वाभिधानेन संगच्छते ह्रदो वह्न्यभाववान् वह्निमांश्चेति समूहालंबनात्मकाहार्यसमानाकार
कस्य ह्रदो वह्न्यभाववान् वह्निमान्वेत्यनाहार्यस्य कैश्चिदुपगमादेतत्त्वादृशोस्युक्तं। लाघवानपायादिति। ननु संशयान्यत्वानिवेशेन लाघवमिति यदुक्तं तन्न संगच्छतेऽन ३९

॥ —अत्र च ह्रदो वह्न्यभाववानिति ज्ञाने वह्न्यभावप्रकारितात्वेन ह्रदत्वावच्छिन्नविशेष्यितात्वेन च परस्परं निरूप्यनिरूपकभावः न तु वह्न्यभाववत्त्वावच्छिन्नप्रकारितात्वेन वह्न्यभाववद्ह्रदत्वावच्छिन्नविशेष्यितात्वे
तिरिक्तवृत्तित्वरूपावच्छेदकत्वमतेपि संशयाप्रत्यक्षत्वस्य प्रयोजनविरहेणानिवेशात् न च तन्मते तद् निवेशे संभवापत्तिः ह्रदो वह्निमान्नवेति संशये वह्न्यभाववद्ह्रदत्वावच्छिन्न
विषयितासत्त्वेन प्रतिबंधकतायाश्चासत्त्वेन व्यापकत्वाभावादिति वाच्यं उक्तसंशये भावांशे संसर्गतया वह्निविशेषभानस्यावश्यकतया तादृशविशेषत्वावच्छिन्नविषयितात्वं ता
दृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तादृशविशेषत्वावच्छिन्नविषयिताशून्यो न संशयः किंतु ह्रदो वह्न्यभाववानिसाकारकनिश्चय एव तत
द्वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वस्य प्रतिबंधकतायां सत्त्वेन संशयाप्रत्यक्षत्वानिवेशादिति चेन्न वह्निविरुद्धवह्न्यभावकालीनह्रदो वह्न्यभाववानिसासेव वह्न्यभा
वविशिष्टवह्न्यभावकालीनह्रदो दोषस्तत्रातिव्याप्तिवारणाय संशयाप्रत्यक्षत्वनिवेशकत्वात् अन्यथा विरोधत्वावच्छिन्नवि षयितात्वेन वह्न्यभावविशिष्टवह्निविरुद्धवह्न्यभावकाली
नह्रदत्वविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं किंतु घटत्वावच्छिन्नविषयितात्वमेव तद्रूपावच्छिन्नविषयिताशून्यत्वं च ज्ञाने वह्निविरुद्धवह्न्यभावकाली
नह्रदो वह्न्यभाववान्नवेति संशयः तद्वृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकत्वस्य प्रतिबंधकतायामभावादव्याप्त्यापत्तेः अत्रेदमवधेयं। यद्रूपावच्छिन्नविषयितात्वावच्छिं
ननिरूपकताकयद्रूपावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्यादिरीत्या निष्कर्षे संशयाप्रत्यक्षत्वनिवेशो निष्फलः वह्नित्वा
वच्छिन्नविषयितानिरूपितवह्निविरुद्धवह्न्यभावकालीनह्रदत्वावच्छिन्नविषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं भवति तद्रूपावच्छिन्नविष
यितानिरूपिततद्रूपावच्छिन्नविषयिताशून्यश्च नोक्तसंशयः अपि तु वह्निविरुद्धवह्न्यभावकालीनह्रदो वह्न्यभाववानिति निर्णय एव तत्र प्रतिसिद्धत्वादिति [ संशयाप्रत्यक्षत्वनि
वेशानप्रयोजनप्रकारः प्रागप्यभिहितः सोपि चैकको व्यंशे एव विशेषमानपक्षे संभवतीति बोध्यं) प्रतिबंधकतासंपत्तये जलावच्छेदेनेति। दोषांतर्भावमन्ये निरस्यति।
ससतीति जलव्यापकवह्न्यभावासामानाधिकरण्यविशिष्टजलाघटितत्वात्॥ न तु यद्रूपावच्छिन्नविषयकत्वमित्यादिना प्रतिबंधकतायां तान्यधोगिस्यानवच्छिन्नत्वं निवे
श्यपाषाणमयत्वस्य सर्वतः तिव्याप्तिवारणं कृतं लाघवं च दर्शितं। परं तु जलावच्छेदेन वह्न्यभाववत्ताघटितवह्न्यभाववत् जलवत्कालीनह्रदत्वावच्छिन्नपक्षकस्थले जलवद्वह्न्यभा
व वेत् जलवत्कालीनह्रदत्वावच्छिन्ने ऽतिव्याप्तिः तादृशपक्षे जलवत्तानिश्चयस्यानियमतो जलावच्छेदेन वह्न्यभाववत्तानिश्चयकालीनतयानुमितिं प्रतिविशिष्टविषयकनिश्चयत्वेन व

४०

प्रतिबंधकत्वात् प्रयोजनाभावेन ज्ञानविशिष्टत्वस्य प्रतिबंधकतावच्छेदककोटौ वनिवेशात् । एवमनतिरिक्तवृत्तित्वरूपावच्छेदकतानिवेशकल्पेपि विशिष्टद्वयाघटितत्वरूपघटकप्रतिबंधकतायामसंभववारणाय ज्ञाने वैशिष्ट्यावच्छिन्नत्वे निवेशस्यावश्यकतया दर्शितप्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वाभावेनु विशिष्टद्वयाघटितत्वस्याप्रततया दर्शितस्थलेऽतिप्रसंगो दुर्वारः । अत्र केचित् यत्र जलसामानाधिकरण्येन वह्न्यभावस्य धर्मितावच्छेदकाघटकतानवे वह्न्यभाववज्जलत्ववत्कालीनहृदविशेष्यकजलवत्तानिश्चयस्य जलत्वावच्छेदेन वह्न्यभाववत्तानिश्चयकालीनत्वेन ज्ञाने विशिष्टत्वेन ताहद्राहश्चयकालीनत्वानियमात् । तत्र जलत्वावच्छेदेन वह्न्यभाववत्तानिश्चयकालीनजेन घटेन वह्न्यभावस्य पक्षतावच्छेदकाघटेदकत्ववत्तानिश्चयत्वेनावश्यप्रतिबंधकत्वं कल्पनीयं । तेनैव च यत्र लोजेन घटेन वह्न्यभावस्य पक्षतावच्छेदकाघटे प्रयोजनाभावात् । न च तत्सामानाधिकरण्येन निश्चयवदन कतात तत्राप्यनुमित्यनुत्पादसंभवे ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वांतरं कल्प्यते प्रयोजनाभावात् सामानाधिकरण्येन विशिष्टबुद्धौ तदवच्छेदेनैवावच्छेदकधर्मदर्शनं विरोधिधियां तवच्छेदकधर्मदर्शनमपि तत्सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबंधकं तथा च सामानाधिकरण्येन विशिष्टबुद्धिप्रतिबंधकत्वावच्छेदकावच्छेदेन तत्स्वाभाववज्जलत्ववत्कालीनहृदत्वव्याप्यसंसर्गकत्वेन धर्मव्यापकतावगाहि तथा च सामानाधिकरण्येन वह्न्यभाववज्जलत्ववत्कालीनहृदत्वव्यापकत्वमावश्यकमिति वाच्यं । तत्सामानाधिकरण्येनावच्छेदकधर्मदर्शनस्यापि प्रतिबंधकतायामेव प्रतिबंधकत्वेन निर्वाह इति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वांतरे विशिष्टद्वयाघटितत्वाभावादेव नातिप्रसक्तिरिति । वस्तुतस्तु अवच्छेदकध्यबंधकतायाः स्वीकारे मथुरानाथमहाचार्यैरुक्तत्वात् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेन तु विशिष्टद्वयाघटितत्वाभावादेव प्रतिबध्यप्रतिबंधकभावभेदः यतः प्रतिबंधकतावच्छेदककोभेददर्शनस्थलेऽवच्छिन्नत्वावगाहित्वसामानाधिकरण्यावगाहित्वप्रयुक्तप्रतिबध्यप्रतिबंधकभावभेदः ४०

(=विधेयक=)

